THE

CHOWKHAMBÂ SANSKRIT SERIES;

A COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 335.

याज्ञवल्क्यस्मृतिः ।

श्रीमित्रमिश्रकृत'वीरमित्रोदय'टीकया श्रीविज्ञानेश्वरकृत-'मिताक्षरा'टीकया च सहिता ।

साहित्याचार्य-खिस्ते नारायणशास्त्रिणा

साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च

संशोधिता ।

YĀJÑAVALKYA SMRTI

With the Commentory of Mitra Mis'ra's Vīramitrodaya and Vijnānes'vara's Mitāksarā.

EDITED BY

Pt. Nārāyana S'āstrī khisto Sāhityāchārya Assistant Librarian

Pt. Jagannātha S'āstrī Hos'inga Sāhityopādhyāya Sādholāl Scholar

Sarasvatibhavana Benares.

FASCICULUS II-२.

PUBLISHED & SOLD BY THE SECRETARY,

CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.

AGENTS:-OTTO HARRASSOWITZ, LEIPZIG:

PANDITA JYESHTHARAM MUKUNDAJI, BOMBAY:

Printed by Jai Krishna Das Gupta,

at the Vidya Vilas Press, Benares.

1925.

'द्विजातीना'मित्यनेन शूद्रादीनां पुराणादिश्रवणमेव परमभ्युदय-साधनमिति सूचितम् ॥४०॥

[मिता०] वेदग्रहणाध्ययनफलमाह--

यज्ञानामिति । यज्ञानां श्रौतस्मार्तानां, तपसां कायसन्तापरूपाणां चान्द्रायणादीनां, शुभानां च कर्मणां उपनयनादिसंस्काराणां अवबोधकत्वेन वेद एव द्विजातीनां परो निःश्रेयस(१)करो नान्यः । वेद एवेति तन्मूलकत्वेन स्मृतेरप्युपलक्षणार्थम् ॥ ४० ॥

[वी० मि] ब्रह्मचारिणा प्रत्यहं शक्तितो वेदादिपाठरूपो ब्रह्मयज्ञः कर्तव्य इत्यभिप्रेत्य तत्फलमाह-'नित्यं स्वाध्यायवान् द्विजः' इत्यन्तरैष्टभिः श्लोकैः—

मधुना पयसा चैव स देवांस्तर्पयेद्द्विजः ॥
पितॄन्मधुघृताभ्यां च ऋचोऽधीते (२)तु योऽन्वहम् ॥४१॥
यजूंषि शक्तितोऽधीते योऽन्वहं सघृतामृतैः ॥
प्रीणाति देवानाज्येन मधुना च पितॄँस्तथा ॥ ४२ ॥
स तु सोमघृतैर्देवांस्तर्पयेद्योऽन्वहं पठेत् ॥
सामानि तृप्तिं कुर्याच्च पितॄणां मधुसर्पिषा ॥ ४३ ॥
मेदसा तर्पयेद्देवानथर्वाऽङ्गिरसः पठन् ॥
पितॄंश्च मधुसर्पिर्भ्यामन्वहं शक्तितो द्विजः ॥ ४४ ॥

यो द्विजो यथाशक्ति ऋग्यजुःसामाऽथर्वभागान् पठति स मधुपयोभ्यां सो(३)मघृताभ्यां मेदसा मेध्यपशुधातुविशेषेण यथाक्रममिन्द्रादीन् देवान् मधुघृताभ्यां च पितॄन् दिव्यान् स्वजनकादींश्चाऽन्वहं प्रतिपाठं तर्पयतीति सङ्कलितार्थः । अत्र प्रकृतपाठेन देवादीनां मध्वादीन्युपतिष्ठन्ते । मध्वादिकरणकतृप्तितुल्या तृप्तिर्वा भवतीति तात्पर्यम् । आङ्गिरसो ऽङ्गिरसा दृष्टो ऽभिचारप्रधानको ऽथर्वभाग एव । पृथङ्निर्देशस्त्वतिप्रशंसार्थः ॥ ४१, ४२, ४३, ४४ ॥

---

(१) करो मोक्षकरो ख० ।
(२) 'हि'-'च'-इति पाठद्वयं मुद्रितपुस्तके ।
(३) सोमघृताभ्यां-इति ख० पुस्तके नास्ति ।

(वी० मि०)

वाकोवाक्यं पुराणं च नाराशंसीश्च गाथिकाः ॥
इतिहासांस्तथा विद्यां यो(१)ऽधीते शक्तितोऽन्वहम् ॥४५॥
मांसक्षीरौदनमधुतर्पणं स दिवौकसाम् ॥
करोति तृप्तिं च (२)तथा पितॄणां मधुसर्पिषा ॥ ४६ ॥

वाकोवाक्यं=प्रश्नोत्तररूपोपनिषद्भागः, पुराणं=प्रसिद्धम्, चकारान्मन्वादिधर्मशास्त्रं च, नाराशंस्यः=ऋग्वेदे खिलग्रन्थे पठिता 'इदं जरा उपस्कृता' इत्याद्यास्तिस्रः ऋचः, गाथिकाः=इन्द्रगाथाद्याः, इतिहासाः=भारतादयः, विद्याः=वारु(३)ण्याद्याः ॥ ४५, ४६ ॥

(वी० मि०) देवादितृप्तेः स्वतः फलत्वाऽभावेन तत्प्रयुक्तं स्वनिष्ठं फलमाह—

ते तृप्तास्तर्पयन्त्येनं सर्वकामफलैः शुभैः ॥

ते=देवाद्याः । एनं=स्वतर्पयितारम् । सर्वैः=काम्यमानैः फलैस्तर्पयन्ति नन्दयन्ति ।

(वी० मि०) क्रतुपाठस्य फलान्तरमाह—

यं यं क्रतुमधी(४)यीत तस्य तस्याऽऽप्नुयात् फलम् ॥४७॥

यं यं क्रतुं यद्यत्क्रतुप्रतिपादिकं वेदभागं पठति तत्तत्क्रतुफलसमानं फलं लभत इत्यर्थः ॥ ४७ ॥

(वी० मि०) सामान्यतो वेदपाठस्य फलमाह—

त्रिर्वित्तपूर्णपृथिवीदानस्य फलमश्नुते ॥
तपसश्च(५) परस्येह नित्यं(६) स्वाध्यायवान् द्विजः ॥४८॥

स्वाध्यायवान् वेदपाठकर्ता । त्रिरिति दानान्वितम् । परस्योत्कृष्टस्य । नित्यमित्यनेन संव(७)लिताधिकारयोः संवलनं वाऽभिप्रैति ॥ ४८ ॥

---

(१) 'विद्याः शक्त्याऽधीते हि योऽन्वहम्'–इति मुद्रितपुस्तके पाठः ।
(२) 'कुर्याच्च'–इति मुद्रितपुस्तके पाठः । (३) 'वारुण्याद्याः'–इति ख० पुस्तके पाठः ।
(४) 'क्रतुमधीते च'–'क्रतुमधीतेऽसौ'–इति मुद्रितपुस्तके पाठद्वयम् ।
(५) तपसो यत्परस्य ख० । (६) 'नित्यंस्वाध्यायवान्'–इति मुद्रितपुस्तके पाठः ।
(७) संवलिताधिकारमाधिकारयोः–इति ख० पुस्तके पाठः ।

(मिता०) ग्रहणाध्ययनफलमुक्त्वेदानीं (१)काम्यब्रह्मयज्ञाध्ययनफलमाह—

मधुनेति, यजूंषीति, स त्विति च । योऽन्वहमृचोऽधीते स मधुना पयसा च देवान् पितॄंश्च मधुघृताभ्यां तर्पयति । यः पुनः शक्तितोऽन्वहं यजूंष्यधीते स घृतामृतैर्देवान् पितॄंश्च मधुघृताभ्यां त(२)र्पयति । यस्तु सामान्यन्वहमधीते स सोमघृतैर्देवान् पितॄंश्च मधुसर्पिर्भ्यां प्रीणाति । ऋगादिग्रहणं सामान्येन ऋगादि(३)मात्रप्राप्त्यर्थम् ॥ ४१ ॥ ॥ ४२ ॥ ४३ ॥

मेदसेति, वाकोवाक्यमिति, मांसेति, ते इति च । यः पुनः शक्तितोऽन्वहं अथर्वाङ्गिरसोऽधीते स देवान् मेदसा पितॄंश्च मधुसर्पिर्भ्यां तर्पयति । यस्तु वाकोवाक्यं (४)प्रश्नोत्तररूपं वेदवाक्यम् । पुराणं ब्राह्मादि । चकारान्मानवादिधर्मशास्त्रम् । नाराशंसीश्च रुद्रदैवत्यान् मन्त्रान् । गाथा यज्ञगाथेन्द्रगाथाद्याः । इतिहासान् महाभारतादीन् । विद्याश्च वारुण्याद्याः । शक्तितोऽन्वहमधीते स मांसक्षीरौदनमधुभिर्देवान् पितॄंश्च मधुसर्पिर्भ्यां तर्पयति ॥ ४४ ॥ ४५ ॥ ४६ ॥

ते पुनस्तृप्ताः सन्तो देवाः पितरश्च एनं स्वाध्यायकारिणं सर्वकामफलैः शुभैरनन्योपघातलक्षणैस्तर्पयन्ति ।

प्रशंसार्थमाह—

यं यमिति, त्रिर्वित्तेत्यादि च । यस्य यस्य क्रतोः प्रतिपादकं वेदैकदेशमन्वहमधीते तस्य तस्य क्रतोः फलमवाप्नोति । तथा वित्तपूर्णायाः पृथिव्याः त्रिः त्रिवारं दानस्य यत्फलं परस्य तपसश्चान्द्रायणादेर्यत्फलं तदपि नित्यस्वाध्यायवानाप्नोति । नित्यग्रहणं काम्यस्यापि सतो नित्यत्वज्ञापनार्थम् ॥ ४७ ॥ ४८ ॥

(वी० मि०) ब्रह्मचारी द्विविधः—उपकुर्वाणको नैष्ठिकश्च । तत्र सामान्यतो धर्मानुक्त्वा नैष्ठिकस्य विशिष्य तमाह—

नैष्ठिको ब्रह्मचारी (५)च वसेदाचार्यसन्निधौ ॥
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥ ४९ ॥

---

(१) काम्यव्रत ख० ।   (२) प्रीणयति क० ।   (३) मन्त्रप्राप्त्यर्थं ख० ।

(४) यथा—पृच्छामि त्वा परमन्तं पृथिव्याः इति प्रश्नः, इयं वेदिः परो अन्तः इत्युत्तरम् एवमन्यदपि वाकोवाक्यं ज्ञेयम् ।

निष्ठा जीवनसमाप्तिस्तत्पर्यन्तं ब्रह्मचर्यसङ्कल्पः कृतो येन स नैष्ठिकः । चस्त्वर्थः । क्वचित्तथैव पाठः । वसेदिति । यावज्जीवमिति शे(१)षः । तदभावे आचार्यसान्निध्यभावे अस्य तनये आचार्यतनयसन्निधौ आचार्यतनयसन्निध्यभावे आचार्याणीसन्निधौ सर्वेषामभावे ब्रह्म(२)चर्याग्निसन्निधौ वसेन्न तु समावर्तेतेत्यर्थः । पत्नी चाऽत्राऽऽ(३)चार्यसवर्णैव 'गुरुदारे सवर्णे वा' इति मनुवचनात् ॥४९॥

(वी० मि०). नैष्ठिकब्रह्मचर्यफलमाह—

अनेन विधिना देहं साधयन् विजितेन्द्रियः ॥
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥ ५० ॥

विशेषेण यावज्जीवं जितानि योषिदादिभ्यो निवर्त्तितानीन्द्रियाणि येन सः । अनेन पूर्वोक्तेन कृत्स्नेन विधिना प्रकारेण देहं साधयन् यावज्जीवब्रह्मचर्येणाऽवसादयन् हिरण्यगर्भलोकं प्राप्नोति । तदुत्तरं चेह संसारे न जायते मुच्यत इति यावत् ॥ ५० ॥

इति श्रीमत् याज्ञवल्क्यव्याख्याने ब्रह्मचारिप्रकरणम् ।

(मिता०) एवं सामान्येन ब्रह्मचारिधर्मानभिधायाऽधुना नैष्ठिकस्य विशेषमाह—

नैष्ठिक इति अनेनेति च । (४)उक्तेन प्रकारेणात्मानं निष्ठां उत्क्रान्तिकालं नयतीति नैष्ठिकः । स यावज्जीवमाचार्यसमीपे वसेत् । न (५)वेदग्रहणोत्तरकालं स्वतन्त्रो भवेत् । तदभावे तत्पुत्रसमीपे तदभावे तद्भार्यासमीपे तदभावे (६)वैश्वानरेऽपि । अनेनोक्तविधिना देहं साधयन् क्षपयन् विजितेन्द्रियः इन्द्रियजये विशेषप्रयत्नवान् ब्रह्मचारी ब्रह्मलोकममृतत्वमाप्नोति । न कदाचिदिह पुनर्जायते ॥४९॥ ॥५०॥

इति ब्रह्मचारिप्रकरणम् ।

---

(१) तु- इति मुद्रितपुस्तके पाठः । (२) विशेषः-इति क० पुस्तके पाठः ।
(३) आचार्याग्निसन्निधौ-इति ख० पुस्तके पाठः ।
(४) चाऽत्र-इति क० पुस्तके नास्ति । (५) अनेनोक्तप्रकारेण ख० ।
(६) ग्रहणकालोत्तरं ख० । (७) स्वोपास्याग्निसंनिधौ ख० ।

(वी० मि०) उपकुर्वाणब्रह्मचारि(१)णोऽनन्तरकृत्यमाह—

गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया ॥
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा ॥ ५१ ॥

प्रोक्ता(२)नुसारेण वेदान् वेदौ वेदं वा व्रतानि ब्रह्मचारिधर्मास्तान् वा वेदसहितानि व्रतानि वा पारं समाप्तिं प्रापयित्वा वरमभिलषितं 'धनं क्षेत्रं हिरण्यमश्वं रत्नादि' मनूक्तं 'गौर्ब्राह्मणस्य, वरो ग्रामो राजन्यस्या,ऽश्वो वैश्यस्ये'ति कात्यायनाद्युक्तं वा गुरवे दक्षिणां दत्त्वा गुर्वनुज्ञया स्वगृह्योक्तविधिना स्नानं कुर्यात् इत्यर्थः। वरदानाशक्तौ तदनुज्ञयेति पक्षान्तरम्। तथा च गौतमः- 'विद्यान्ते गुरुमर्थेन निमन्त्र्य'। 'कृत्वाऽनुज्ञां तस्य वा स्नान'मिति प्राञ्चः। वरमित्यत्र धनमिति क्वचित्पाठः। एतेन स्नातकस्य(३) त्रैविध्यमुक्तम्। अत एव कात्यायनः-'त्रयः स्नातका भवन्ति, विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातकः'इति। समाप्य वेदमसमाप्य व्रतं यः समावर्त्तते स विद्यास्नातकः। समाप्य व्रतमसमाप्य वेदं यः समावर्त्तते स व्रतस्नातकः। उभयं समाप्य यः समावर्त्तते स विद्याव्रतस्नातक इति। अत्र च विकल्पः शक्त्याद्यपेक्षया। वेदसमाप्तिश्चाऽर्थज्ञानपर्यन्ता। यदाह व्यासः-

न वेदपाठमात्रेण सन्तोषं कारयेद्बुधः ।
पाठमात्रावसाने तु पङ्के गौरिव सीदति ॥
यथा पशुर्भारवाही न तस्य लभते फलम् ।
द्विजस्तथाऽर्थानभिज्ञो न वेदफलमश्नुते ॥
वेदस्याऽध्ययनं सर्वं धर्मशास्त्रस्य(४)चाऽपि यत् ।
अजानतोऽर्थं तत्सर्वं तुषाणां कण्डनं यथा ॥
योऽधीत्य विधिवद्वेदं वेदार्थं न विचारयेत् ।
स साऽन्वयः शूद्रसमः पात्रतां न प्रपद्यते ॥
अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः ।
स्वर्गलोकमवाप्नोति धर्मानुष्ठानविद्धि सः ॥

---

(१) ब्राह्मणो-इति क० पुस्तके पाठः ।
(२) प्रागुक्तानुसारेण-इति ख० पुस्तके पाठः ।
(३) त्रैविध्यमित्यारभ्य विद्याव्रतस्नातकः-इत्यन्तो ग्रन्थः क० पुस्तके नास्ति ।
(४) चाऽपि-इति क० पुस्तके पाठः ।

श्रुतहीनमधीतं यन्नेह नाऽमुत्र तद्भवेत्।
श्रुतं तु केवलमपि समुद्धाराय कल्पते॥
समन्वितं स्तोकमपि श्रुताधीतं विशिष्यते।
पाठमात्रवतो नित्यं द्विजातींश्चाऽर्थवर्जितान्॥
पशूनिव च तान् प्राज्ञो वाङ्मात्रेणाऽपि नाऽर्चयेत्।

श्रूयते च—'स्थाणुरयं भारहारः किलाऽभूदधीत्य वेदं न विजानाति योऽर्थं, योऽर्थज्ञः स सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा'(१)इति। एतच्च स्वाध्यायविधौ प्रपञ्चितं जैमिनीयैरिति नाऽधिकं विविच्यते। अत्र च स्नानकाले स्वेच्छया गार्हस्थ्याद्याश्रयणम्।
तथा च विष्णुपुराणम्—

गृहीतविद्यो गुरवे दत्त्वा तु गुरुदक्षिणाम्।
गार्हस्थ्यमिच्छन् भूपाल! कुर्याद्दारपरिग्रहम्॥
गुरोः शुश्रूषणं कुर्यात्तत्पुत्रादेरथाऽपि वा।
वैखानसो वाऽपि भवेत् परिव्राडथवेच्छया॥

अनाश्रमी तु क्षणमपि न तिष्ठेत्।

अनाश्रमी न तिष्ठेत क्षणमात्रमपि द्विजः।
आश्रमेण विना तिष्ठन् प्रायश्चित्तीयते द्विजः (२)॥
जपे होमे तथा दाने स्वाध्याये निरतोऽपि सन्।
नाऽसौ फलमवाप्नोति कुर्वाणोऽप्याश्रमाच्च्यु(३)तः॥

इति दक्षात्।

योगी (४) च-

चत्वारो ब्राह्मणस्योक्ता आश्रमाः श्रुतिदेशिताः।
क्षत्रियस्य त्रयः प्रोक्ता द्वावेको वैश्यशूद्रयोः॥

तत्राऽपि व्युत्क्रमाश्र(५)माश्रयणमशास्त्रीयम्। 'ब्रह्मचर्यं समाप्य गृही भवेत् गृही भूत्वा वनी भवेत् वनी भूत्वा प्रव्रजेत्' इति देवला(६)दिव्यवस्थितम्।

---

(१) पाप्यः-इति क० पुस्तके पाठः। (२) प्रायश्चित्ती यतेन्द्रियः-इति क० पु० पाठः।
(३) च्च्युतिम्-इति क० पुस्तके पाठः। (४) च-इति क० पुस्तके नास्ति।
(५) आश्रम-इति ख० पुस्तके नास्ति।
(६) देवलान्यध्येवैकव्याश्रमोल्लङ्घनं लिखितविष्णुपुराणादिवलादिति व्यवस्थितम्-इति क० पुस्तकेऽधिकम्।

(मिता०) यः पुनर्वैवाह्यस्तस्य विवाहार्थं स्नानमाह—

गुरव इति । पूर्वोक्तेन न्यायेन वेदं मन्त्रब्राह्मणात्मकम्, व्रतानि ब्रह्मचारिधर्माननुक्रान्तान्, उभयं वा पारं नीत्वा समाप्य गुरवे पूर्वोक्ताय वरमभिलषितं यथाशक्ति दत्त्वा स्नायात् । अशक्तौ तदनुज्ञया अदत्तवरोऽपि । एषां च पक्षाणां शक्तिकालाद्यपेक्षया व्यवस्था ॥ ५१ ॥

(वी० मि०) तत्र यः समाप्तब्रह्मचर्यो गार्हस्थ्यमिच्छति तं प्रत्याह—

अविप्लुतब्रह्मचर्यो लक्षण्यां स्त्रियमुद्वहेत् ॥
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥ ५२ ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ॥
पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ॥ ५३ ॥
दशपूरुषविख्याताच्छ्रोत्रियाणां महाकुलात् ॥
स्फीतादपि न सञ्चारिरोगदोषसमन्वितात् ॥ ५४ ॥

अविप्लुतमस्खलितं ब्रह्मचर्यं यस्य स तथा । अवकीर्ण्यपि चीर्णप्रायश्चित्तोऽस्खलितब्रह्मचर्यतयैव च विवक्षितः । दश=मातृतः पञ्च पितृतश्च पञ्च पूरुषाः पुरुषा विख्याता यत्र तस्मात् 'वाहिताग्न्यादिषु'[पा०सू०२।२।३७] इति निष्ठायाः परनिपातः । यद्वा दशभिः पूरुषैः विशुद्धत्वेन ख्यातात् । श्रोत्रियाणां सम्पूर्णशाखाध्यायिनां कुटुम्बबहुत्वेन महतः कुलात् । गोऽजाऽविधनधान्यैः समृद्धत्वेन स्फीतमुज्ज्वलमपि यत्सञ्चारिणः शुक्रशोणितद्वारेणाऽनुप्रवेशभाजो रोगाः कुष्ठापस्मारादयो दोषाश्च ।

हीनक्रियं निःपुरुषं नि(१)छन्दोलोमशार्शसम् ।

इति मन्वाद्युक्ताः तदुक्तं यद्यत्कुलं तद्भिन्नात् । आहृत्येत्यध्याहार्यम् । यद्वा ल्यब्लोपे पञ्चम्या, कुलं प्राप्येत्यर्थः । स्त्रियं कन्यामुद्वहेत् विवाहयेत् । अपिशब्देन ना(२)स्फीतस्य वर्जनं कैमुतिकन्यायेनाऽभिप्रैति । लक्षण्यां ।

---

(१) निःछदो-इति ख० पुस्तके पाठः । (२) स्फीतस्य-इति ख० पुस्तके पाठः ।

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंस(१)वारणगामिनीम् ।
तनुलोम(२)केशदशनां मृद्वङ्गीं चारुहासिनीम् ॥

इति मन्वाद्युक्तैर्बाह्यैः 'अष्टौ पिण्डान् कृत्वा' इत्याश्वलायनाद्युक्तप्रकारानुमितैरदृष्टविशेषरूपैराभ्यन्तरैश्च शुभलक्षणैर्युक्ताम् । उपलक्षणमेतत्, अशुभलक्षणहीनामित्यपि द्रष्टव्यम् । यदाह मनुः—

नोद्वहेत्कपिलां कन्यां नाऽधिकाङ्गीं न रोगिणीम् ।
नाऽलोमिकां नाऽतिलोम्नीं न वाचालां न पिङ्गलाम् ॥

इत्यादि । अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषान्तरापरिगृहीतां कान्तां कमनीयां वोढुर्मनोनयनानन्दकारिणीमिति यावत् । तथा च आपस्तम्बः—'यस्यां मनश्चक्षुषोर्निर्बन्धस्तस्यामृद्धिः' । असपिण्डामिति स्वजनकसापिण्ड्यरहितामित्यर्थः । तथा च मनुः—

असपिण्डा च या मातुरसगोत्रा च या पितुः ।
सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने ॥

पिण्डश्चेह शरीरं तेन समान एकः पिण्डः साक्षात् परम्परया वाऽऽरम्भको येषान्ते सपिण्डाः स्ववंश्या इति यावत् । 'वान्यस्मिन् सपिण्ड०' [पा० सू० ४ । ४ । १६५] इति निपातनात् समानस्य सभावः । यद्यप्ययं योगार्थो ऽप्स्यादिसाधारणः, तथाऽपि वीजिनमारभ्य सप्ता(३)न्यतमत्वं प्रयोगोपाधिः । न्यायमते तु रूढ्यर्थ इति नाऽतिप्रसङ्गः ।

न चैवं पितृवंश्यायाः सप्ताधिकाया विवाह्यत्वापत्तिः, सगोत्रत्वेन तन्निरासात् । एवं च मातृ(४)सपिण्डाचरणार्थमसपिण्डापदं सार्थकमिति मन्तव्यम् । अयं च सपिण्डशब्दस्यार्थः प्रकृते ग्रन्थसन्दर्भानुसारेणोक्तः । मुख्यस्तु तदर्थो निरूप्यते, तथा हि(५)सपिण्डपदस्य एकशरीरारब्धत्वं योगार्थः प्रयोगापाधिरूढ्यर्थो वा । वीजिनमारभ्य सप्तान्यतमत्वं च स्ववंश्यत्वं चेह न विवक्षितं गौरवात् । योगार्थस्य व्यावर्त्तकत्वेऽपि न शब्दार्थत्वक्षतिः पङ्कजादिपद इव तत्प्रकारकौत्सर्गिकानुभवबलात् । मातुलभागिनेयादीनां सापिण्ड्त्वेप्यशौचाऽपकर्षो वचनबलात् । एवं च—

(१) चारणं—इति क० पुस्तके पाठः । (२) भौम—इति क० पु० पाठः ।
(३) सप्तान्यमन्त्रपाधिः—इति ख० पु० पाठः । (४) मातृमपिण्डापदं—इति ख० पु० पाठः ।
(५) तथापि—इति क० पु० पाठः ।

सगोत्रे खलु सापिण्ड्यं विज्ञेयं साप्तपौरुषम् ।
विगोत्रे तत्तु सर्वत्र विज्ञेयं पाञ्चपूरुषम् ॥

इति वचनं मातृतः षष्ठ्यादिविवाह्यतामात्रपरम् ।

सपिण्डता तु कन्यानां सवर्णानां त्रिपूरुषी ।

इति ब्रह्मपुराणम् । 'अप्रमत्तानां कन्यानां(१)त्रिपुरुष'मिति वसिष्ठवचनं (२)त्वाशौचे शपथे च योज्यं, तेन त्रिपूरुषोर्ध्वं कन्यामरणे नाऽऽशौचं (३) भङ्गो वेत्येतावन्मात्रपरं, न तु सपिण्डतापदार्थव्युत्पादकम् ।

सापिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी ।

इति शङ्खवचनविरोधात् नानार्थत्वे च गौरवात् । सपिण्डपदादुत्सर्गतः सप्तान्यतमस्यैव प्रतीतेः । एवं च–

पञ्चमात्सप्तमादूर्ध्वं मातृतः पितृतस्तथा ।
सपिण्ड(४)ता निवर्त्तेत सर्ववर्णेष्वयं विधिः ॥

इति शातातपवचनमर्थप्राप्तानुवादमात्रम् । पञ्चमादूर्ध्वमित्यस्याऽष्टमत्वादिपरत्वादिति । केचित्त्वेतद्वचनबलादेव मातृतःपञ्चान्यतमपितृतःसप्तान्यतमान्यतरत्वं प्रयोगोपाधिरूढ्यर्थे वा मन्यन्ते । अथैवमपि पत्न्याः पतिसापिण्ड्यं न स्यात्, एकवीज्यन्वयाभावादिति चेन्न, 'अस्थिभिरस्थिनी' इत्यादिश्रुति(५)बलेन पतिवीज्यन्वयात् । 'तत्सपिण्डैरपि तद्वारकमेव सापिण्ड्य'मिति हरिनाथोपाध्यायवाचस्पतिमिश्रादयः । वस्तुतस्तु स्ववंश्यभिन्नस्य वीज्यवधिक(६)सप्तान्यतमस्य सपिण्डपदार्थत्वे मानाभावः । न चोक्तयोगार्थसत्त्वमेव तत्र मानं, भूयः प्रयोगबलेन स्ववंश्यत्वस्याऽपि प्रयोगोपाधौ रूढ्यर्थे वा निवेशाऽवश्यकत्वात् ।

अथोक्तशातातपादिवचनविरोधान्न (७)तन्निवेश इति चेन्मैवं, तथाऽपि विगोत्रयोः षष्ठसप्तमयोः सापिण्ड्यस्याऽनुप(८)पादनात् । न च शास्त्रे यावत्सु सपिण्डपदप्रयोगस्तावत्साधारण एव प्रयोगोपाध्यादिराद्रियताम् । अस्तु वा नानार्थतैवेति वाच्यम्, उभयथाऽपि गौरवात् ।

---

(१) कन्यानां–इति ख० पुस्तके नास्ति । (२) चाशौच—इति क० पु० पाठः ।
(३) कन्यामरणे चाशौचं–इति क० पु० पाठः । (४) सवर्णता—इति ख० पु० पाठः ।
(५) वचनेन—इति ख० पु० पाठः । (६) वीज्यबाधक—इति ख० पु० पाठः ।
(७) विरोधात्तन्निवेश—इति ख० पु० पाठः । (८) अनुपादानात्—इति ख० पु० पाठः ।

क्वाचित्कप्रयोगमात्रस्य शक्त्यसाधकत्वात् । उक्तशातातपादिवचना-नामशौचसङ्कोचावकाशादिमात्रपरत्वेन शक्तौ तात्पर्यभावा(१)त् । शक्तिसाधकस्य च भूयःप्रयोगस्य स्ववंश्यमात्रविषयकत्वात् ।

किञ्च गोत्र(२)स्य सपिण्डत्वे 'सपिण्डास्तु सनाभयः' इत्यनुशासनविरोधः । तस्य नाभिः सप्तपुरुषावधिकं कुलत्वमानं येषान्ते सनाभयः इति प्रामाणिकनिबन्धृभिर्व्याख्यानात् । अत एव—

सपिण्डता तु सर्वेषां गोत्रतः साप्तपौरुषी ।

इत्यत्र विगोत्रव्यावर्त्तकं वंशवाचि गोत्रपदं घटते । यवीयसीं वयोन्यूनां प्रमाणन्यूनां च । तथा च गर्गः—

उद्वहेद्वयसा न्यूनां न्यूनामाकारतोऽपि च ।

अरोगिणीं कुष्ठापस्मारादिदीर्घरोगाननुपसृष्टां भ्रातृमतीमिति पुत्रिकाशङ्कानिरासार्थम् । यथाह मनुः—

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वा पिता ।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कया ॥

तेनाऽ(३)भ्रातृकापि पुत्रिकाशङ्काशून्या विवाह्यैव । भ्रातृपदेन पितृपुत्रः सामान्यत एव विवक्षितः, तन्मात्रेणैव पुत्रिकाशङ्कानिवृत्तेः । असमानेति । आर्षं प्रवर और्वादिः, गोत्रं वत्सादि प्रसिद्धं, समानमेकं आर्षं गोत्रं यस्य स समानार्षगोत्रस्तस्माज्जाता समानार्षगोत्रजा तद्भिन्नामित्यर्थः । अत्र चाऽसमानार्षजामसमानगोत्रजामिति प्रत्येकं पर्युदासः । 'असमानप्रवरैर्विवाहः' इति गौतमेन 'असगोत्रा च या पितुः' इति मनुना चाऽभिधानात् । समानप्रवरता च नामतः सङ्ख्यातः समुच्चये भवति । यत्र चैकस्य द्वयोर्वाऽन्यत्वं [सङ्ख्याऽन्यत्वं (४) वा] तत्राऽप्यसमानतैव । अत्र च समानार्षगोत्रजापर्युदासस्त्रैवर्णिकपरः शूद्रस्य गोत्रादिशून्यत्वात् । यद्यपि क्षत्रियवैश्ययोरपि न गोत्रप्रवरौ, तथापि 'यजमान-

---

(१) तात्पर्यात्—इति क० पु० पाठः ।
(२) विगोत्रस्य—इति क० पु० पाठः ।
(३) तेन भ्रातृकापि—इति ख० पु० पाठः ।
(४) सख्यानृत्वं—इति ख० पुस्तके, संख्या न वृता—इति च क० पुस्तके पाठः ।

स्यार्षेयान् प्रवृणीते' इत्युक्त्वा 'पौरोहित्यान् राजविशां प्रवृणीते' इत्याश्वलायनात्पुरोहितगोत्रप्रवरयोरेव तत्र पर्युदास इति । अत्राऽसपिण्डामित्यनेन यथाव्याख्या । तेन मातृसपिण्डायाः (१)पितृसपिण्डाया अपि (२)असमानार्षजामित्यनेन स्ववंश्याया अपि समानप्रवराया विगोत्रायाः सगोत्रायाः अपि समानगोत्रजामित्यनेनाऽस्ववंश्यायाः असमानप्रवरायाः सगोत्रायाः स्ववंश्याया अपि प्रायशः समानप्रवराया अपि पर्युदासः। एकेन विशेषणेन वारितस्य(३)वारितवारकेण विशेषणे दोषाभावात् । एवं च एतद्विशेषणत्रयवत्याः पितृबान्धवमातृबान्धवादिसुताया वारणार्थमाह पञ्चमादिति । मातृतः स्वमातृवीजितः पञ्चमादूर्ध्वं पञ्चमपर्यन्तभिन्नां पितृतः स्ववीजितः सप्तमादूर्ध्वं सप्तमपर्यन्तान्यसमुच्चयः । तेन स्वापत्यभूतायाः स्वसप्तम्या विगोत्राया अपि व्युदासः। अत्र च स्ववीजी स्ववंश्य एव विवक्षितः। तेन मातृमातामहादिषष्ठ्या अपि विवाह्यत्वं(४)धर्मसंमतं न वि(५)रुध्येत। माता च स्वारम्भप्रयोजकत्वशोणिता वोध्या, तेन पितृमातामहपुत्र्यादेर्व्युदासः । एवं च पितृमातामहाद्यवधिकसप्तम्याः परिणयावारोऽपि सङ्गच्छते ।

न चैवं तत्षष्ठी परिणेयाऽप्यस्त्विति वाच्यं, इष्टत्वात् । अत एव पितृमातृपक्षस्तु मातृपक्षस्तु मातृपक्ष एवेति तत्षष्ठ्यपि परिणेयेति प्रतिहस्तका अप्याहुः । तद्वर्जने तु शिष्टाचार एव मानम् । एवं—

पञ्चमीं मातृपक्षाच्च पितृपक्षाच्च सप्तमीम् ।
गृहस्थ उद्वहेत्कन्यां न्यायेन विधिना नृप ! ॥

इति विष्णुपुराणवचनम्—

उद्वहेत्पितृमात्रो(६)स्तु सप्तमी पञ्चमी च या ।

इति मार्कण्डेयपुराणवचनं च निषेधप्रकरणान्मानात्तत्परमेवेति। हित्वेत्यध्याहार्य्य योज्यम् । तेन प्रकृतवचनसमानार्थकतयैवाऽनयोर्गृहस्थपदं कृतसमावर्त्तनत्वे सति विवाहेच्छावत्त्वार्थकं निबन्धेषु तथाव्याख्यानादिति साम्प्रदायिकाः ।

---

(१) पितृसपिण्डायाः-इति क० पुस्तके नास्ति ।
(२) समानार्षजामित्यसमानेन स्ववंश्यायाः-इति ख० पु० पाठः ।
(३) वारितस्य-इति क० पु० नास्ति । (४) सर्वसंमतं-इति ख० पु० पाठः ।
(५) विरुध्यते-इति क० पु० पाठः । (६) श्च-इति ख० पु० पाठः ।

अन्ये तु विधायकमेवैतद्वचनद्वयम्, अध्याहारेणैकवाक्यत्वस्याऽतिप्रसञ्जकत्वात्। न च भोजनादिवद्विवाहस्य रागप्राप्तत्वेन विधेयत्वान्नैतदिति वाच्यम्, आश्रमाङ्गत्वेन प्राप्ततया विधिसम्भवात्। न(१)च 'समानार्षेयीं कन्यां वरयेत् पञ्च मातृतः परिहरेत् सप्त पितृतस्त्रीन्मातृतः पञ्च पितृतः इति च' इति पैठीनसिवचनविरोधः, अष्टम्याद्यलाभे वचनात्(२)। एवं च 'त्रीन्मातृतः' इत्यादि पञ्चमीसप्तम्याद्यलाभे द्रष्टव्यम्। अथवा समानजातीयापरं आसुरादिविवाहपरं वा 'त्रीन्मातृत' इत्यादि। मातृतः पञ्चम्या नियमतो वर्जनन्तु सङ्कराऽस्वीकृतिमात्रनिबन्धनमिति वदन्ति।

अत्र व्यासः—

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि।
जन्मनाम्नोरविज्ञानादुद्वहेदविशङ्कितः॥

मातृसगोत्रा मातृसमाननामधेया उपसंहारे नामकीर्तनात्। 'अक्ताः शर्कराः' इति(३) वत् 'गोत्रं तु नाम्नि च' इत्यमरकोषेण गोत्रपदस्य नाम्न्यनुशासनात् नाम्नो विज्ञानाभावात्। जन्मनः पञ्चमाभ्यन्तराज्ञानं अभावादेव। सुमन्तः—'पितृष्वसृसुतां मातुलसुतां समानार्षेयीं च विवाह्य चान्द्रायणं चरेत् परित्यज्य चैनां बिभृयात्'। दाक्षिणात्यानां तु मातुलकन्यापरिणयाचारो दुराचार एव। न चाऽर्जुनादेः सुभद्रादिपरिणयाचारात्कथमेवमिति वाच्यं, एकस्या द्रौपद्याः पञ्चभिः परिणयवद्देवचरितकल्पत्वेनाऽन्यैरनादरणीयत्वात्। तथा मातृसम्बन्धादासप्तमादविवाह्याः कन्यका भवन्ति। आपञ्चमादन्येषां सर्वाः पितृपत्न्यो मातरस्तद्भ्रातरो मातुलास्तद्दुहितरो भगिन्यस्तदपत्यानि भागिनेयानि ताः परिणीताः सङ्करकारिण्यस्तथाऽध्यापयितुरेतदेव। आसप्तमादिति मातृसपिण्डापरं लिखितमनुवचनात्।

मातुः सपिण्डा यत्नेन वर्जनीया द्विजातिभिः।

इति व्यासवचनात्। भ्रातरः सोदरा एव, तत्रैव भ्रातृपदशक्तेः। अत्र 'ता' इत्यनेन यदपत्यानीति नपुंसकोपस्थापितप्रत्यवमर्षस्याऽव्युत्पन्नत्वात् दुहितर एवाऽनुकृष्यन्ते, तेन तदपत्यानि भागिनेयानीति तु

(१) वा-इति ख० पु० पाठः। (२) विधा इति क० पु० पाठः।
(३) यावत्-इति ख० पु० पाठः।

दुहितृनिन्दामात्रार्थमिति । मातुलदौहित्रीपरिणये दोषाभाव इति केचित्, तन्न तदपत्यानि भागिनेयानीत्यनेन निन्दाया अप्रतीतेः, तस्मात्ता इत्यनेन कन्यात्वेन रूपेणोपस्थितानां तदपत्यानामपरामर्श (१)इति । नारदः—

पञ्चमे सप्तमे चैव येषां वैवाहिकी क्रिया ।
ये च सन्तानिनः सर्वे पतिताः शूद्रसंमिताः ॥

गौतमः—'असमानप्रवरैर्विवाह ऊर्ध्वं सप्तमात् पितृबन्धुभ्यो वीजिनश्च मातृबन्धुभ्य पञ्चमात्' । वीजिनश्चेत्यत्र ऊर्ध्वं सप्तमादित्यनुवर्त्तते । एतच्च वाक्यान्तरस्वरसात् पितृपक्षपरम् । वीजी=स्ववंशहेतुवीजयोगी । परभार्यायां वीजवीजप्रक्षेपक इति केचित् । अन्यानि शुभलक्षणानि स्मृत्यन्तरेष्वनुसन्धेयानि विस्तरभयान्नेह लिखितानि । तत्राऽसमानार्षगोत्रजेत्यादिनिषेधानामदृष्टार्थानामतिक्रमे भार्यात्वमेव नोत्पद्यते भार्यापदस्य यूपाहवनीयादिपदवत्संस्कारविशेषविशि(२)ष्टवचनत्वात् । तस्य च कारणाभावनाऽनुपपत्तेः । संचारिरोगदोषेत्यादिदृष्टार्थनिषेधानां त्वतिक्रमे भार्यात्वमुत्पद्यत एव, किन्तु निषेधाद्यतिक्रमात् प्रायश्चित्तमात्रमित्यवधेयम् ॥ ५२-५४ ॥

(मिता०) स्नानानन्तरं किं कुर्यादित्यत आह—

अविप्लुतेत्यादि । अविप्लुतब्रह्मचर्योऽस्खलितब्रह्मचर्यः । लक्षण्यां बाह्याभ्यन्तरलक्षणैर्युक्ताम् । बाह्यानि 'तनुलोमकेश(३)दशनाम्' इत्यादीनि (३ । १०) मनुनोक्तानि । आभ्यन्तराणि 'अष्टौ पिण्डान् कृत्वा' इत्याद्याश्वलायनोक्तविधिना ज्ञातव्यानि । पूर्वस्यां रात्रौ गोष्ठवल्मीककितवस्थानह्रदेरिणक्षेत्रचतुष्पथश्मशानेभ्यो मृत्तिकां गृहीत्वा पिण्डाष्टकं कर्तव्यम् । तत्राऽनुक्रमेण प्रथमे पिण्डे स्पृष्टे धान्यवती भवेत् । द्वितीये स्पृष्टे पशुमती भवेत् । तृतीयेऽग्निहोत्रशुश्रूषणपरा भवति । चतुर्थे विवेकिनी चतुरा सर्वजनार्जनपरा भवति । पञ्चमे रोगिणी । षष्ठे वन्ध्या । सप्तमे व्यभिचारिणी । अष्टमे विधवा भवेदित्याश्वलायनस्मरणात् । स्त्रियं नपुंसकत्वनिवृत्तये स्त्रीत्वेन परीक्षिताम । अनन्यपूर्विकां दानेनोपभोगेन वा पुरुषान्तरापरिगृहीताम् । कान्तां कमनीयां वोढुर्मनोनयनानन्दकारिणीम् । 'यस्यां मन-

---

(१) अपि परामर्शः इति क० पु० पाठः । (२) विशिष्ट-इति क० पुस्तके नास्ति ।
(३) केशादीनि मनुनोक्तानि क० ।

अक्षुषोर्निर्बन्धस्तस्यामृद्धिः' इत्यापस्तम्बस्मरणात्। एतच्च न्यूनाधिकाङ्गादिवाह्यदोषाभावे। असपिण्डां समान एकः पिण्डो देहो यस्याः सा सपिण्डा ताम्। सपिण्डता च एकशरीरावयवान्वयेन भवति। तथा हि पुत्रस्य पितृशरीरावयवान्वयेन पि(१)त्रा सह। एवं पितामहादिभिरपि पितृद्वारेण तच्छरीरावयवान्वयात्। एवं मातृशरीरावयवान्वयेन मात्रा। तथा मातामहादिभिरपि मातृद्वारेण। तथा मातृष्वसृमातुलादिभिरप्येकशरीरावयवान्वयात्। तथा पितृव्यपितृष्वस्रादिभिरपि। तथा पत्या सह पत्न्या एकशरीरारम्भकतया। एवं भ्रातृभार्याणामपि परस्परमेकशरीरार(२)ब्धैः सहैकशरीरारम्भकत्वेन। एवं यत्र यत्र सपिण्डशब्दस्तत्र तत्र साक्षात्परम्परया वा एकशरीरावयवान्वयो वेदितव्यः। यद्येवं मातामहादीनामपि 'दशाहं शावमाशौचं सपिण्डेषु विधीयते' इत्यविशेषेण प्राप्नोति। स्यादेतत्, यदि तत्र तत्र 'प्रत्तानामितरे कुर्युः' इत्यादिविशेषवचनं न स्यात्। अतश्च सपिण्डेषु यत्र विशेषवचनं नास्ति तत्र 'दशाहं शावमाशौचम्' इत्येतद्वचनमवतिष्ठते। अवश्यं चैकशरीरावयवान्वयेन सापिण्ड्यं वर्णनीयम्। 'आत्मा हि जज्ञ आत्मनः' इत्यादिश्रुतेः। तथा 'प्रजामनु प्रजायसे' इति च। अथाऽपि 'स एवाऽयं विरूढः प्रत्यक्षेणोपलभ्यते' इत्यापस्तम्बवचनाच्च। तथा गर्भोपनिषदि—'एतत् षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतोऽस्थिस्नायुमज्जानः त्वङ्मांसरुधिराणि मातृतः' इति तत्र तत्राऽवयवान्वयप्रतिपादनात्। निवा(३)प्यपिण्डान्वयेन तु सापिण्ड्येऽङ्गीक्रियमाणे मातृसन्ताने भ्रातृपु(४)त्रादिषु च सापिण्ड्यं न स्यात्। समुदायशक्त्यङ्गीकारेण रूढिपरिग्रहेऽवयवशक्तिस्तत्र तत्राऽवगम्यमाना परित्यक्ता स्यात्। (अ(५)सत्स्ववयवार्थेषु योऽन्यत्रार्थे प्रयुज्यते, तत्रा(६)ऽन्यगतिकत्वेन समुदायः प्रसिद्ध्यति।) परस्परैकशरीरावयवान्वयेन तु सापिण्ड्ये यथा नाऽतिप्रसङ्गस्तथा वक्ष्यामः। यवीयसीं वयसा (७)प्रमाणतश्च न्यूनां। उद्वहेत् परिणयेत् स्वगृह्योक्तविधिना ॥ ५२ ॥

---

(१) सह सापिण्ड्यं ख०। (२) एकशरीरारम्भैः क०।
(३) पिण्डनिर्वापणयुक्त्या० निर्वाप्यसपिण्डा० ख०। (४) भ्रातृपितृव्यादिषु क० भ्रातृव्यपितृव्या० ग०।
(५) क० पुस्तकेऽधिकमिदम्। (६) तत्रानन्यगतित्वेन क०। (७) प्रमाणेन च क०।

विशेषान्तराण्याह —

अरोगिणीमिति । अरोगिणीं अचिकित्सनीयव्याध्यनुपसृष्टाम् । भ्रातृमतीं पुत्रिकाकरणशङ्कानिवृत्तये । अनेनाऽपरिभाषिताऽपि पुत्रिका भवतीति गम्यते(१) । असमानार्षगोत्रजां ऋषेरिदमार्षं नाम प्रवर इत्यर्थः । गोत्रं वंशपरम्पराप्रसिद्धम् । आर्षं च गोत्रं च आर्षगोत्रे समाने आर्षगोत्रे यस्यासौ समानार्षगोत्रस्तस्माज्जाता समानार्षगोत्रजा न समानार्षगोत्रजा असमानार्षगोत्रजा ताम् । गोत्रप्रवरौ च पृथक्पृथक्पर्युदासनिमित्तम् । तेनाऽसमा(२)नार्षजामसमानगोत्रजामिति । तथा च 'असमानप्रवरैर्विवाहः' इति गौतमः । तथा 'असपिण्डा च या (३)मातुरसपिण्डा च या पितुः । सा प्रशस्ता द्विजातीनां दारकर्मणि मैथुने' ॥ इति (३ । ५) मनुः । तथा मातृगोत्रामप्यपरिणेयां केचिदिच्छन्ति(४) । (५)'मातुलस्य सुतामूढ्वा मातृगोत्रां तथैव च । समानप्रवरां चैव (६)त्यक्त्वा चान्द्रायणं चरेत्' ॥ इति प्रायश्चित्तस्मरणात् । अत्र चाऽसपिण्डामित्यनेन पितृष्वसृमातृष्वस्रादिदुहितृनिषेधः । तथा असगोत्रामित्यनेनाऽसपिण्डाया अपि भिन्नसन्तानजायाः समानगोत्राया निषेधः । तथा असमानप्रवरामित्यनेनाऽप्यसपिण्डाया असगोत्राया अपि समानप्रवराया निषेधः । तथा च असपिण्डामित्येतत्सार्ववर्णिकं सर्वत्र सापिण्ड्यसद्भावात् । असमानार्षगोत्रजामित्येतत्त्रैवर्णिकविषयम् । यद्यपि राजन्यविशां (७)प्रातिस्विकगोत्राभावात्प्रवराभावस्तथाऽपि पुरोहितगोत्रप्रवरौ वेदितव्यौ । तथा च 'यजमा-

---

(१) अत्र टिप्पणी—

अभ्रातृकां प्रदास्यामि तुभ्यं कन्यामलङ्कृताम् ।
अस्यां यो जायते पुत्रः स मे पुत्रो भविष्यति ॥

(२) असमानगोत्रजां असमानार्षजामित्यर्थः ख० । (३) असगोत्रा च ख० ग० ।

(४) अत्र क० पुस्तके 'सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्मणि । जन्मनाम्नोरविज्ञाने तूद्वहेदविशङ्कितः' ॥ इति व्यासः, इति विशेषः ।

(५) अत्र टिप्पणी—

तथा च भृगुः—

समानगोत्रप्रवरां विवाहयति यः सुताम् ।
असम्भाष्यो ह्यपाङ्क्तेयः पतितः स तु नाऽन्यथा ॥

(६) गत्वा क० ।

(७) गोत्रप्रवर्तकऋष्यपत्यत्वप्रयुक्तत्वमत्र प्रातिस्विकत्वम्० प्रातिस्विकगोत्राभावस्तथापि ख०

नस्यार्षेयान्प्रवृणीते' इत्युक्त्वा 'पौरोहित्यान् राजन्यविशां प्रवृणीते' इत्याहाऽऽश्वलायनः । सपिण्डासमानगोत्रासमानप्रवरासु भार्यात्वमेव नोत्पद्यते । रोगिण्यादिषु तु भार्यात्वे उत्पन्नेऽपि (१)दृष्टविरोध एव ॥

असपिण्डामित्यत्रैकशरीरावयवान्वयद्वारेण साक्षात्परम्परया वा सापिण्ड्यमुक्तं, तच्च सर्वत्र सर्वस्य यथाकथञ्चिदनादौ संसारे सम्भवतीत्यतिप्रसङ्ग इत्यत आह—

पञ्चमादिति । मातृतो मातुः सन्ताने पञ्चमादूर्ध्वं पितुः सन्ताने सप्तमादूर्ध्वं सापिण्ड्यं निवर्तत इति शेषः । अतश्चाऽयं सपिण्डश(२)ब्दोऽवयवशक्त्या(३) सर्वत्र वर्तमानोऽपि निर्मन्थ्यपङ्कजादिशब्दवन्नियतविषय एव । तथा च पित्रादयः षट् सपिण्डाः पुत्रादयश्च षट् आत्मा च सप्तमः । सन्तानभेदेऽपि यतः सन्तानभेदस्तमादाय गणयेद्यावत्सप्तम इति सर्वत्र योजनीयम् । (तथा च मातरमारभ्य तत्पितृपितामहादिगणनायां पञ्चम(४)सन्तानवर्तिनी मातृतः पञ्चमीत्युपचर्यते । एवं पितरमारभ्य तत्पित्रादिगणनायां सप्तमपुरुषसन्तानवर्तिनी पितृतः सप्तमीति । तथा च 'भगिन्योर्भगिनीभ्रात्रोर्भ्रातृपुत्रीपितृव्ययोः । विवाहेऽद्व्या(५)दिभूतत्वाच्छाखाभेदोऽव(६)गण्यते' ॥) यदपि वसिष्ठेनोक्तं–'पञ्चमीं सप्तमीं चैव मातृतः पितृतस्तथा' इति 'त्रीनतीत्य मातृतः पञ्चाऽतीत्य च पितृतः' इति च पैठीनसिना, तदप्यर्वाङ्निषेधार्थं न पुनस्तत्प्राप्त्यर्थमिति सर्वस्मृतीनामविरोधः । एतच्च समानजातीये द्रष्टव्यम् । विजातीये तु विशेषः । यथाऽऽह शङ्खः—'यद्येकजाता बहवः पृथक्क्षेत्राः पृथग्जनाः । एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्तते त्रिषु' ॥ एकस्मात् ब्राह्मणादेर्जाताः एकजाताः । पृथक्क्षेत्राः भिन्नजातीयासु भिन्नासु स्त्रीषु जाताः । पृथक् जनाः समानजातीयासु भिन्नासु स्त्रीषु जातास्ते एकपि(७)ण्डाः किन्तु पृथक्शौचाः । पृथक्शौचमाशौचप्रकरणे वक्ष्यामः । 'पिण्डस्त्वावर्तते त्रिषु' त्रिपुरुषमेव सापिण्ड्यमिति ॥ ५३ ॥

---

(१) दृष्टदोषविरोधः क० । (२) शब्दो योगेऽवयव० क० ।(३) वयवशक्त्या प्रवर्त० क० ।
(४) पञ्चमपुरुषवर्तिनी ख० । (५) व्यादि ख० । (६) वगम्यते क० ।
(७) एकपिण्डाः सपिण्डाः ख० ।

दशेति । पुरुषा एव पूरुषाः दशभिः पुरुषैः मातृतः पञ्चभिर्विख्यातं यत्कुलं तस्मात् । श्रोत्रियाणामधीतवेदानाम् । अध्ययनमुपलक्षणं श्रुताध्ययनसम्पन्नानाम् । महच्च तत्कुलं च महाकुलं पुत्रपौत्रपशुदासीग्रामादिसमृद्धं तस्मात्कन्यका आहर्तव्येति नियम्यते ॥

एवं सर्वतः प्राप्तौ सत्यामपवादमाह—

स्फीतादिति । सञ्चारिणो रोगाः श्वित्रकुष्ठापस्मारप्रभृतयः शुक्रशोणितद्वारेणाऽनुप्रविशन्तो दोषाः । पुनः हीनक्रियानिःपौरुषत्वादयो मनुनोक्ताः। एतैः समन्वितात् स्फीतादपि पूर्वोक्तान्महाकुलादपि नाहर्तव्या ॥ ५४ ॥

(वी० मि०) कन्याग्रहणे एवं नियममुक्त्वा कन्यादाने वरनियममाह—

एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः ॥
यत्नात् परीक्षितः पुंस्त्वे युवा धीमान् जनप्रियः ॥ ५५ ॥

एतैर्गुणैः=अनन्यपूर्वकत्वयवीयस्त्वाऽभ्रातृमत्त्वव्यतिरिक्तैः सर्वैः पूर्वोक्तविशेषणैः। सवर्णोऽहीनवर्णः। श्रोत्रिय इति त्रैवर्णिकपरम् । यत्नादिति ।

यस्याऽप्सु प्लवते वीर्य्यं ह्रादि मूत्रं च फेनिलम् ।
पुमान् स्याल्लक्षणैरेतैर्विपरीतस्तु पण्डकः ॥

इत्यादिनारदाद्युक्तोपायेनेत्यर्थः युवा=न वृद्धः । धीमान्=लौकिकवैदिकव्यवहारेषु निपु(१)णमतिः । जनप्रियोऽनुरक्तबहुतरजनः। अत्र युवत्वादीनि विशेषणानि प्रशंसार्थानि। पुंस्त्वे परीक्षित इत्यादीनि तु नियमार्थानीति यथायथमुन्नेयम् । अत्र सवर्णोऽहीनवर्ण इत्युक्तम् ॥ ५५ ॥

(मिता०) एवं कन्याग्रहणनियममुक्त्वा कन्यादाने वरनियममाह—

एतैरिति । एतैरेव पूर्वोक्तैर्गुणैर्युक्तो दोषैश्च वर्जितो वरो भवति तस्याऽयमपरो विशेषः । सवर्ण उत्कृष्टो वा न हीनवर्णः । श्रोत्रियः स्वयं च श्रुताध्ययनसम्पन्नः । यत्नात्प्रयत्नेन पुंस्त्वे परीक्षितः । परीक्षोपायश्च नारदेन दर्शितः–'यस्याप्सु प्लवते बीजं ह्रादि मूत्रं च फे-

(१) नियमः-इति ख० पुस्तके पाठः ।

निलम्। पुमान्स्याल्लक्षणैरेतैर्विपरीतैस्तु षण्ढकः॥ (ह्लादि(१)फेनिल-मूत्रश्च गुरुशुक्रर्षभस्वरः। पुमांस्स्यादन्यथा पाण्डुर्दुश्चिकित्स्यो मुखे भगः॥ शुभबीजवति क्षेत्रे पुत्राः सन्तानवर्धनाः। निष्ठाविवाहमन्त्राणां तासां स्यात्सप्तमे पदे'॥') इति। युवा न वृद्धः। श्रीमान् लौकिकवैदिकव्यवहारेषु निपुमतिः। जनप्रियः (२)स्मितपूर्वमृद्वभिभाषणादिभिरनुरक्तजनः॥ ५५॥

(वी० मि०) एवं च (३)द्विजातीनां शूद्रापरिणयप्रसक्तिमाशङ्क्याह—

यदुच्यते द्विजातीनां शूद्राद्दारोपसङ्ग्रहः॥
नैतन्मम मतं (४)यस्मात्तत्रात्मा जायते स्वयम्॥ ५६॥

द्विजातीनां शूद्रापरिणयः।

शूद्रैव भार्या शूद्रस्य सा च स्वा च विशः स्मृते।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाऽग्रजन्मनः॥

इति मन्वादिभिर्यदुच्यते तन्न मम संमतमनुमतार्थकं न, यस्मात्तत्र दारेषु आत्मा उपसङ्ग्राहकस्य स्वयमेव जायते न तु परं जनयति। तथा च श्रुतिः 'तज्जायाया जायात्वं (५)भवति यदस्यां जायते पुनः' इति साम्प्रदायिकाः। परे तु जायते गर्भमाधत्त इत्यर्थः। तच्च गर्हितम्।

आपद्यपि न कर्त्तव्या (६)शूद्रा भार्या द्विजेन तु।
तस्यां तस्य प्रसूतस्य निःकृतिर्न विधीयते॥

इति शङ्खवचनात्। नन्वेवं मन्वादिवचनविरोध इति चेन्न। मनुवचनस्याऽपूर्वो(७)पाधिवेदनत्वमिति सत्यामापदि तन्मात्रनिर्णयपरत्वात्। प्रकृतवचनस्य चाऽऽपद्यपि व्युत्क्रमेण शूद्राविवाहवर्जनाविषयत्वात्।

---

(१) अयं पाठः क० पुस्तकेऽधिकः।
(२) स्मितमृदुपूर्वाभिभाषणः क०।
(३) 'द्विजातीनां' इत्यारभ्य 'आशङ्क्याह' इत्यन्तो ग्रन्थः क० पु० नास्ति।
(४) तस्मात्–इति ख० पुस्तके पाठः।
(५) प्रभवति–इति क० पुस्तके पाठः।
(६) 'शूद्रा'–इत्यत आरभ्य 'मन्वादि'–इत्यन्तो ग्रन्थः क० पुस्तके नास्ति।
(७) वचनस्य पूर्वोपाधि इति ख० पु० पाठः।

यदुक्तं ब्राह्मे—

क्षत्राविट्शूद्रकन्यास्तु न विवाह्या द्विजातिभिः ।
विवाह्या ब्राह्मणीं पश्चाद्विवाह्या क्वचिदेव तु ॥

क्वाचि(१)दधिवेदनानिपाते । केचित्तु 'विवाहस्त्रिविधः—धर्मार्थः, प्रजार्थः,रत्यर्थश्चे'ति । तत्र गृहस्थाद्याश्रमविहिततत्तत्कर्माङ्गभूतपत्नीसम्पादको धर्मार्थः सवर्णाविवाह एव । प्रजार्थस्तु सवर्णापुत्रा(२)सम्भवे । नित्यः काम्यश्च द्विविधोऽपि क्षत्रियवैश्यकन्ययोरपि । तत्राऽपि क्षत्रियकन्याभावे वैश्यकन्यायाः । रत्यर्थस्तु शूद्रकन्यायाः अपि ।

रत्यर्थमेव सा तस्य कामार्त्तस्य प्रकीर्त्तिता ।

इति विष्णुपुराणात् । एवं च प्रकृतवचने प्रजार्थे क्षत्रादिकन्याभ्यनुज्ञा, शूद्रायास्तु निरासः । स्मृत्यन्तराणामप्येतदनुसारेणैवाऽविरोधो द्रष्टव्य इति सर्वं चतुरस्रम् । न च शूद्रायां पारशवं पुत्रमभिधाय 'विन्नास्वेष विधिःस्मृतः' इति ।

चतुस्त्रिद्व्येकभागानां वर्णशो ब्राह्मणात्मजाः ।

इति चाऽग्रे मुनिनाऽभिधानान्नैवमिति वाच्यं,रत्यर्थं प्रवृत्तस्याऽऽनुपङ्गिकपुत्रोत्पत्तौ तयोः सावकाशत्वात् । एवं च—

शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ।

इत्यादिवचनान्यपि पुत्रोद्देश्यतदधिगमपराण्येवेत्याहुः। एत(३)च्च सति सम्भवेऽहीनवर्णैव परिणेयेति व्यवस्थितम् ॥ ५६ ॥

(मिता०) रति–पुत्र–धर्मार्थत्वेन विवाहस्त्रिविधः । तत्र पुत्रार्थो द्विविधः–नित्यः काम्यश्च । तत्र नित्ये प्रजार्थे 'सवर्णः श्रोत्रियो वरः' इत्यनेन सवर्णा मुख्या दर्शिता । इदानीं काम्ये नित्यसंयोगे चाऽनुकल्पो वक्तव्य इत्यत आह—

यदिति । यदुच्यते 'सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि । कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः' ॥ इत्युपक्रम्य ब्राह्मणस्य चतस्रो भार्याः क्षत्रियस्य तिस्रो वैश्यस्य द्वे इति द्विजातीनां शूद्रावेदनमिति । नैतद्याज्ञवल्क्यस्य मतम् । यस्मादयं द्विजातिस्तत्र स्वयं जायते । 'तज्जाया जाया भवति यदस्यां जायते पुनः' इति-

(१) क्वचिदनधिवेदननिमित्तादिपाते–इति क० पु० पाठः ।
(२) पुत्रसम्भवे–इति ख० पु० पाठः ।
(३) एवं च– इति ख० पु० पाठः ।

श्रुतेः । अत्र च तत्रायं जायते स्वयमिति हेतुं वदता नैत्यकपुत्रोत्पादनाय काम्यपुत्रोत्पादनाय वा प्रवृत्तस्य शूद्रापरिणयननिषेधं कुर्वता नैत्यकपुत्रोत्पादनानुकल्पे काम्ये च पुत्रोत्पादने ब्राह्मणस्य क्षत्रियावैश्ये क्षत्रियस्य च वै(१)श्या भार्याऽभ्यनुज्ञाता भवति ॥ ५६ ॥

(वी०मि०) यदा तूक्तलक्षणा सवर्णा न लभ्यते पूर्वा च(२)विनष्टाऽवश्यमधिवेदनीया वाऽसामर्थ्यादिनाऽऽश्रमा(३)न्तरेऽसावधिक्रियते तदा क्षत्रियादिकन्यापरिणयप्राप्तावनुक्रमार्थमाह—

तिस्रो वर्णानुपूर्व्येण द्वे तथैका यथाक्रमम् ।
ब्राह्मणक्षत्रियविशां भार्याः स्वा शूद्रजन्मनः ॥ ५७ ॥

वर्णानुपूर्व्येण=वर्णानुलोम्येन तेन व्युत्क्रमेण विवाहो निषिद्धः । यथाक्रममिति ब्राह्मणस्य तिस्रः क्षत्रियस्य द्वे वैश्यस्यैकेत्यर्थः । स्वा शूद्रा । तेन सङ्करजाव्यावृत्तिः, ब्राह्मण्यादिव्यावृत्तेः सवर्ण इत्यनेनैव प्राप्तेः । शूद्रजन्मनः शूद्रजातीयजातस्य । एतेन पारशवोऽपि सङ्गृहीतः । एवं च ब्राह्मणादितः क्षत्रियादिकन्यासु जातानां स्वमा(४)तृजातीयानुत्कृष्टकन्ययैव विवाह इति सूचितम् ॥ ५७ ॥

(मिता०) इदानीं रतिकामस्योत्पन्नपुत्रस्य वा विनष्टभार्यस्याश्रमान्तरानाधिकारिणो गृहस्थाश्रमावस्थामात्राभिकाङ्क्षिणः परिणयनक्रममाह—

तिस्र इति । वर्णक्रमेण ब्राह्मणस्य तिस्रो भार्याः । क्षत्रियस्य द्वे । वैश्यस्यैका । शूद्रस्य तु स्वैव भार्या भवति । सवर्णा पुनः सर्वेषां मुख्या स्थितैव । पूर्वस्याः पूर्वस्या अभावे उत्तरोत्तरा भवति । अयमेव च क्रमो नैत्यकानुकल्पे काम्ये च पुत्रोत्पादनविधौ । अतश्च यच्छूद्रापुत्रस्य पुत्रमध्ये परिगणनं विभागसङ्कीर्तनं च, तथा 'त्रिप्रान्मूर्धावसिक्तो हि' इत्युपक्रम्य 'विन्नास्वेष विधिः स्मृतः' इति च तद्रतिकामस्याश्रममात्राभिकाङ्क्षिणो वा (५)नान्तरीयकतयोत्पन्नस्य ॥ ५७ ॥

(१) च -इति ख० पुस्तके नास्ति ।
(२) आश्रमान्ते-इति ख० पु० पाठः ।
(३) वैश्याभ्यनुज्ञा ख० ।
(४) स्वभ्रातृ-इति ख०पु०पाठः ।
(५) अन्योद्देश्यकव्यापारनिर्वर्त्यत्वं, यमन्तरा नोद्देश्यासिद्धिस्तत्त्वं वा नान्तरीयकत्वम् ।

(वी०मि०) विवाहप्रभेदान् कथयन्नेव तल्लक्षणान्याह चतुर्भिः श्लोकैः–

ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता ॥
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम् ॥ ५८ ॥

यस्मिन् वरमाहूय तस्मै यथाशक्त्यलङ्कृता कन्या दीयते स विवाहो ब्राह्मसंज्ञः। अत्र विशेषमाह मनुः—

आच्छाद्य चाऽर्हयित्वा च (१)श्रुतशीलवते स्वयम् ।
आहूय दानं कन्याया ब्राह्मो धर्मः प्रकीर्तितः ॥

बौधायनोऽपि–'श्रुतशीले विज्ञाय ब्रह्मचारिणेऽर्थिने देयेति स ब्राह्मः'। व्यासः—

आच्छाद्याऽलङ्कृतां कन्यां त्रिः परिक्रम्य पावकम् ।
नामगोत्रे समुद्दिश्य दद्याद्ब्राह्मो विधिस्त्वयम् ॥
अद्भिर्या दीयते कन्या ब्रह्मदेयेति तां विदुः ।

शङ्खलिखितौ–'सवर्णः सवर्णाय विदितो विदिताय नग्नि(२)कां दद्यात्स ब्राह्मः'। हारीतः–'विधिवद्वस्त्रयुगं दत्त्वा सहधर्मश्चर्यतामिति ब्राह्मः'। पैठीनसिः–'कन्यां सहिरण्यां दद्यादयं ब्राह्मो विवाहः'। ब्रह्मपुराणे—

अलङ्कृत्य यथाशक्त्या पूरयित्वा धनेन च ।

इति । उभयतो=मातृकुले पितृकुले च । एकविंशतिम् ।

दश पूर्वान् दशावरानात्मानं चैकविंशकम् ।

इति मनुनोक्तान् । एवं च निरुपाधिककन्यादानपूर्वकः सवर्णापरिणयो ब्राह्मो विवाह इति पर्यवस्यति । उपाधयश्च ऋत्विक्त्वद्रव्यग्रहणसमयबन्धादयः ॥ ५८ ॥

(मिता०) विवाहानाह—

ब्राह्म इति। स ब्राह्माभिधानो विवाहः, यस्मिन्नुक्तलक्षणाय वरायाहूय यथाशक्त्यलङ्कृता कन्या दीयते उदकपूर्वकं, तस्यां जातः पुत्र उभयतः पित्रादीन्दश पुत्रादींश्च दश आत्मानं चैकविंशं पुनाति सद्वृत्तश्चेत् ॥ ५८ ॥

यज्ञस्थायर्त्विजे दैव आदायार्षस्तु गो(३)द्वयम् ॥
चतुर्दश प्रथमजः पुनात्युत्तरजश्च षट् ॥ ५९ ॥

---

(१) श्रुति–इति ख०पु०पाठः । (२) नग्निकानां–इति क० पु० पाठः ।
(३) गोयुग्मम्–इति क० पु० पाठः ।

(वी० मि०) ऋत्विजे यज्ञं कुर्वते। दक्षिणादानकाले ऋत्विक्कर्मकौशलजनितपारितोषो(१)पाधिना यत्र कन्या दीयते स विवाहो दैवः। तदाह बौधायनः—'दक्षिणासु दीयमानास्वन्तर्वेदि यदृत्विजे स दैवः'। हारीतोऽपि—'वेद्यन्ते गोमिथुनं दत्त्वा स दैवः'। वेद्यन्ते=वेद्या एकदेशे। गोमिथुनमत्र स्वीयमेव दात्रा वराय देयमुक्तम्। अस्य च विवाहस्य सोपाधिकत्वेन ब्राह्मान्न्यूनत्वं भेदश्च। गोमिथुनं वराद् गृहीत्वा तेनैव सह यत्र कन्यादानं स विवाह आर्षः। तथा च देवलः—

प्रदानं यत्र कन्यायाः सह गोमिथुनेन च।
शस्ताय चाऽसगोत्राय तमार्षमृषयो विदुः॥

'गोमिथुनं दक्षिणात्वेन वराय देय'मिति केचित्। 'कन्याधनार्थं तस्यै देय'मिति कल्पतरुः। तदर्थमेव गोमिथुनं वराद्ग्राह्यं न तु शुल्कत्वेन।

एते विवाहाश्चत्वारो धर्म्यास्तोयप्रदानिकाः।
अशुल्का ब्राह्मणार्षाश्च तारयन्ति द्वयोः कुलम्॥

इति ब्राह्मादिचतुष्टयमुपक्रम्य देवलवचनात्। मनुः—

एकं गोमिथुनं द्वे वा वरादादाय धर्मतः।
कन्याप्रदानं विधिवदार्षोऽयं धर्म उच्यते॥

अत्र प्रथमजो दैवविवाहोत्पन्नश्चतुर्दश सप्त पूर्वान् सप्ताऽवरान् पुरु(२)षान्। उत्तरज आर्षविवाहोत्पन्नः त्रीन् पूर्वान् त्रीनवरान् पुरुषान् पुनाति आत्मानं च पुनाति। 'सहात्मने'त्यग्रेऽभिधास्यमानस्याऽप्यत्राऽन्वयादिति॥ ५९॥

(मिता०) दैवार्षविवाहौ—

यज्ञस्थ इति। स दैवो विवाहो यस्मिन्यज्ञानुष्ठाने वितते ऋत्विजे शक्त्यालङ्कृता कन्या दीयते। यत्र पुनर्गोमिथुनमादाय कन्या दीयते उदकपूर्वं स आर्षः। प्रथमजो दैवविवाहजश्चतुर्दश पुनाति सप्त वरान् सप्त परान्। उत्तरज आर्षविवाहजः षट् पुनाति त्रीन् पूर्वान् त्रीन् परान्॥ ५९॥

---

(१) पारितोषण्याधिना- इति ख० पु० पाठः।
(२) पुरुषान्-इति क० पुस्तके नास्ति।

सहो(१)भौ चरतां धर्ममित्युक्त्वा दीयतेऽर्थिने ॥
स कायः पावयेत्तज्जः षट् षड् वंश्यान् सहाऽऽत्मना॥६०॥

(वी० मि०) 'उभौ सह धर्मं चरता' मिति वाक्यमुच्चार्य नियमबन्धपूर्वकं यत्र कन्यादानं स विवाहः कायः प्राजापत्यः । ब्राह्मे च समयबन्धाभावान्नाऽतिव्याप्तिः । तथा च देवलः—

सहधर्मक्रियाहेतोर्दानं समयबन्धनात् ।
अलङ्कृत्यैव कन्याया विवाहः स प्रजा(२)पते ॥

तज्जः प्राजापत्यविवाहजः पूर्वान् षट् अवरांश्च षट् आत्मानं चेति त्रयोदश पुरुषान् पुनातीत्यर्थः । 'षड् वंश्यांश्चे'ति केषाञ्चित्संमतः पाठस्तेषां (३)च मते त्रीन् पूर्वान् त्रीनवरानात्मानं चेति सप्त पुरुषानित्यर्थः ॥ ६० ॥

(मिता०) प्राजापत्यविवाहलक्षणम्—

इतीति । सह धर्मं चरतामिति परिभाष्य कन्यादानं स प्राजापत्यः । तज्जः षट् पूर्वान् षट् परान् आत्मना सहेत्येवं त्रयोदश पुनाति ॥ ६० ॥

आसुरो द्रविणादानाद्गान्धर्वः समयान्मिथः ॥
राक्षसो युद्धहरणात्पैशाचः कन्यकाछलात् ॥ ६१ ॥

(वी० मि०) उक्तगोमिथुनातिरिक्तद्रवि(४)णग्रहणपूर्वकं यत्र कन्या दीयते स विवाह आसुरः । न चाऽऽर्षाऽऽसुरयोर्वरेण धनदानं कन्यादात्रा च तद्ग्रहणमुक्तम् । तथा च कन्यायाः क्रयो विक्रयश्च पर्यवसन्नः । यदाह वसिष्ठः-'पणित्वा (५)धनक्रीतां स मानुषः । तस्माद् दुहितृमते शतमधिरथं देयमिति क्रयो विज्ञायते' । पणित्वा पणनानुकूलव्यापारं कृत्वा स्थितस्य यत्र (६)विवाह्या कन्या धनक्रीता भवति स विवाहो मानुष आसुर इत्यर्थः । एवञ्च कश्यपादिवचनविरोधः । तथा हि—

---

(१) इत्युक्त्वा चरतां धर्मं सह या-इति मुद्रितपुस्तके पाठः ।
(२) प्रजापतिः-इति ख० पु० पाठः ।
(३) च- इति ख० पुस्तके नास्ति ।
(४) द्रव्य-इति ख० पु० पाठः ।
(५) धन-इति ख० पुस्तके नास्ति ।
(६) विवाह्य-इति ख० पु० पाठः ।

क्रीता द्रव्येण या नारी न सा पत्नी विधीयते।
न सा दैवे न सा पित्र्ये दासीं तां कश्यपोऽब्रवीत्॥

आपस्तम्बः—

दानं विक्रयधर्मश्च अपत्यस्य (२)विधयिते।
न कन्यायाः पिता विद्वान् गृह्णीयाच्छुल्कमण्वपि॥
गृह्णन् शुल्कं च लोभेन स्यान्नरो गव्यविक्रयी।
आददीत न शूद्रोऽपि शुल्कं दुहितरं ददत्॥
शुल्कं हि गृह्णन् कुरुते छन्नं दुहितृविक्रयम्।
(३)नत्वेतद्धर्मजातित्वे तत्पूर्वेष्वपि जन्मसु॥
शुल्कसंज्ञेन मूल्येन पापं दुहितृविक्रयम्।
आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत्॥
अल्पोऽप्ययं महान्वाऽपि तावानेव स विक्रयः।

कश्यपः—

शुल्केन ये प्रयच्छन्ति स्वसुतां लोभमोहिताः।
आत्मविक्रयिणः पापा महाकिल्विषकारकाः॥
पतन्ति निरये घोरे घ्नन्ति चाऽऽसप्तमं कुलम्।

इति। अत्र कृते कन्यार्थं धनग्रहणे दोषाभावः, स्वार्थं तद्ग्रहणे च दोषो विवाहाऽनिष्पत्तिश्चेति वदन्ति। उक्तं चैतत्। तथा हि मनुः—

यासां नाऽऽददते शुल्कं ज्ञातयो न स विक्रयः।
अर्हणं तत्कुमारीणामानृशंस्यं प्रयोजनम्॥

आनृशंस्यं=अनुकम्पा। आपस्तम्बोऽपि–'विवाहे दुहि(४)तृमते दानं काम्यं धर्मार्थं श्रूयते तस्माद् दुहितृमतेऽधिरथं शतं देयं तन्मिथुनायाकुर्या'दिति। तस्यां क्रयशब्दः संस्तुतिमात्रं धर्माद्धिसम्बन्धः। काम्यं आनृशंस्यप्रयुक्तकामनाविषयः। अधिरथं शतं=रथाधिकं गोशतं। मिथुनायाकुर्यात् मिथुनीकुर्यात् पतिपत्नीभावं जनयेत्। छान्दसः प्रयोगः। गान्धर्व इति। त्वं मे पतिस्त्वं मे भार्येत्येवं कन्यावरयोः परस्परं नियमबन्धात् पित्रादिकर्तृकदा(१०)ननिरपेक्षाद्यो विवाहः

(१) न विद्यते-इति ख० पु० पाठः। (२) नत्वेतदिति पद्यं क० पुस्तके नास्ति।
(३) दुहितृमते-इत्यारभ्य, तस्मात्-इत्यन्तो ग्रन्थः ख० पुस्तके नास्ति।
(४) दानाद्यपेक्षाद्यो-इति ख० पु० पाठः।

स गान्धर्व इत्यर्थः । तथा च मनुः—

इच्छयान्योन्यसंयोगः कन्यायाश्च वरस्य च ।
गान्धर्वः स तु विज्ञेयो (१)मैथुन्यः कामसम्भवः ॥

संयोगः समागमः । एवं च स्वयंवरोऽपि गान्धर्वविवाह एव । अत्राऽपि वैवाहिको विधिरस्ति ।

गान्धर्वादिविवाहेषु विधिर्वैवाहिको मतः ।
कर्त्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः ॥

इति वचनात् । अत एवोखाऽनिरुद्धादेर्वैवाहिकविधिं स्मरन्ति । युद्धे बलात्कारोपलक्षणम् ।

प्रसह्य कन्याहरणं राक्षसो विधिरुच्यते ।

इति मनुवचनात् । तेन कन्यापक्षीयानभिभूय कन्याहरणं यत्र स राक्षसो विवाह इति पर्यवसितम् । कन्यकाया विवाह्यायाः छलनाद्यो विवाहः स पैशाचः । छलनमाह मनुः—

सुप्तां मत्तां प्रमत्तां वा रहो यत्रोपगच्छति ।
स पापिष्ठो विवाहानां पैशाचश्चाऽष्टमोऽधमः ॥

उपगच्छति आलिङ्गनादिना योजयति न तु स भुङ्क्ते, एवं क्षतयोनित्वेनाऽग्रे पाणिग्रहणजन्यसंस्काराभावापत्तेः । संस्कारश्चोक्तो बह्वृचपरिशिष्टे—

ब्राह्मेष्वार्षेषु दैवेषु प्रजापत्येषु याज्ञिकैः ।
पूर्वं होमविधिः प्रोक्तः पश्चात्परिणयः स्मृतः ॥
गान्धर्वासुरपैशाचविवाहा राक्षसश्च यः ।
पूर्वं परिणयस्तेषां पश्चाद्धोमो विधीयते ॥

एषां विवाहानां मध्ये कस्य वर्णस्य को धर्मः (२)कोऽधर्मः, इत्यत्राह मनुः—

षडानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् ।
विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥
चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।
राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥
पञ्चानान्तु त्रयो धर्म्या द्वावधर्म्यौ स्मृताविह ।
पैशाच आसुरश्चैव न कर्त्तव्यौ कदाचन ॥

---

(१) मैथुनः-इति क० पु० पाठः । (२) को धर्मो-इति ख० पु० पाठः ।

पृथक् पृथक् वा मिश्रौ वा विवाहौ पूर्वदेशितौ ।
गान्धर्वो राक्षसश्चैव धर्म्यौ क्षत्रस्य तौ स्मृतौ ॥

आनुपूर्व्या यथोक्तक्रमेण प्रथमान् । अवरान् इति पश्चादुक्तान् । विहितेष्वपि प्रशस्तानाह चतुर इति । 'ब्राह्मदैवार्षप्राजापत्याः ब्राह्मणस्य प्रशस्ताः यथापूर्वं तेष्वपि पूर्वः पूर्वः श्रेया'निति बौधायनात् । गान्धर्वस्तु (३)धर्माविरोधी । आसुरस्तु विहितनिषिद्धोऽतः पञ्चानामसम्भवे करणीयः । राक्षसपैशाचौ त्वतीव निषिद्धौ । क्षत्रियस्य तु राक्षसः प्रशस्तः । आर्षप्राजापत्यगान्धर्वास्तु धर्माविरोधिनः । आसुरपैशाचौ विहितनिषिद्धावापदि करणीयौ, तत्राऽप्यासुरासम्भवेऽन्यः पैशाचः । ब्राह्मदैवौ न सम्भवतः ।

ब्राह्मणानां सतामेष सदा धर्मो युधिष्ठिर ! ॥

इति ब्राह्मं प्रक्रम्य भारते नियमनात् । दैवस्य च ऋत्विक्त्वसापेक्षत्वात् क्षत्रियस्य तदभावादिति । वैश्यस्य त्वासुरः प्रशस्तः । आर्षप्राजापत्यगान्धर्वास्तु धर्माविरोधिनः तदभावे राक्षसः । 'गान्धर्वासुरौ राजन्यस्य राक्षसो वैश्यस्य पैशाचः शूद्रस्ये'ति पैठीनसिवचनात् । पैशाचस्त्वत्यन्तापदि ब्राह्मदैवौ त्वसम्भविनावेवेति । शूद्रस्य च राक्षसो विवाहो नास्ति । शेषं वैश्यवत् । एवेत्याखण्डलकार्थः ? ॥ ६१ ॥

(मिता०) आसुरगान्धर्वादिविवाहलक्षणानि—

आसुर इति । आसुरः पुनर्द्रविणादानात् । गान्धर्वस्तु परस्परानुरागेण भवति । राक्षसो युद्धेनापहरणात् । पैशाचस्तु कन्यकाछलात् । छलेन छद्मना स्वापाद्यवस्थास्व(४)पहरणात् ?॥ ६१ ॥

(वी० मि०) सवर्णादिपरिणये विशेषमाह—

पाणिर्ग्राह्यः सवर्णासु गृह्णीयात् क्षत्रिया शरम् ॥
वैश्या प्रतोदमादद्यात् वेदने त्वग्रजन्मनः ॥ ६२ ॥

सवर्णासूह्यमानासु सर्ववर्णैर्विधिवत्पाणिरेव ग्राह्यः । अग्रजन्मनो वर्णोत्कृष्टस्य वेदने विवाहे क्षत्रिया वरधृतैकदेशं शरं, वैश्या तु तादृशं प्रतोदं गृह्णीयात् । तयोरव पाणिस्थानीयत्वेन वरग्राह्यता । शूद्रापरिणयस्तु ग्रन्थकृता निषिद्ध एवेति न प्रकृते प्रदर्शितः । मनुना तु—

(३) धर्मा-इति ख० पुस्तके नास्ति । (४) यवस्थासु हरणात् क० ।

वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने ।

इत्युक्तम् ॥ ६२ ॥

(मिता०) सवर्णादिपरिणयने विशेषमाह—

पाणिरिति । सवर्णासु विवाहे स्वगृह्योक्तविधिना पाणिरेव ग्राह्यः । क्षत्रियकन्या तु शरं गृह्णीयात् । वैश्या प्रतोदमादद्यात् । उत्कृष्टवेदने शूद्रा पुनर्वसनस्य दशाम् । यथाह मनुः (३ । ४४)-'वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदने' इति ॥ ६२ ॥

(वी० मि०) कन्यादानाधिकारिक्रममाह—

पिता पितामहो भ्राता सकुल्यो जननी तथा ॥
कन्याप्रदः पूर्वनाशे प्रकृतिस्थः परः परः ॥ ६३ ॥
अप्रयच्छन् समाप्नोति भ्रूणहत्यामृतावृतौ ॥
गम्यं त्वभावे दातॄणां कन्या कुर्यात् स्वयंवरम् ॥ ६४ ॥

पूर्वनाशे पूर्वपूर्वासम्भवे प्रकृतिस्थ उन्मादपातित्यादिदोषशून्यः । अत्र पिता पितामहो भ्राता सकुल्यो मातामहो माता चेति कन्याप्रदाः । 'पूर्वाभावे परः परः' इति विष्णुपुराणवचनात् । मातृत्वे सत्त्वेऽपि मातामहस्य दानाधिकारो यद्यपि यथाश्रुतः प्रतीयते तथाऽपि व्यवहारानुसारात् सकुल्यान्तरस्य विष्णुवाक्यस्थपूर्वशब्दे प्रतिपाद्यतया मातुरभावे मातामहाधिकार इति रत्नाकरः । हलायुधनिबन्धे नारदवाक्यम्—

पिता दद्यात्स्वयं कन्यां भ्राता वाऽनुमतः पितुः ।
मातामहो मातुलश्च सकुल्यो बान्धवस्तथा ॥
माता त्वभावे सर्वेषां प्रकृतौ यदि वर्त्तते ।

अत्राऽपि पूर्वोक्तयुक्त्या पितृभ्रातृसकुल्या एव सर्वपदेन विवक्षिता इति मन्तव्यम् । कात्यायनः—

स्वयमेवौरसीं दद्यात्पिताऽभावे स्वबान्धवाः ।
मातामहस्ततोऽन्यां तु माता वा धर्मजां सुताम् ॥

ततोऽन्यामौरसीभिन्नाम् । अत्र च मात्रा औरसी सर्वथैव न देयेति न विवक्षितम् । तथा च स एव—

अर्थप्रवासयुक्तेषु पौगण्डेषु च बन्धुषु ।
माता तु समये दद्यादौरसीमपि कन्यकाम् ॥

समये कन्यादानोचिते । अप्रयच्छन्निति कन्या(१)दानाधिकारी। तद्दानोचितसमये तामददत् । तस्या ऋतावृतौ ब्रह्मगर्भहत्याजनित-पापतुल्यं पापं सम्पूर्णमाप्नोतीत्यर्थः । यत्तु—

कामममरणात्तिष्ठेद् गृहे कन्यर्तुमत्यपि ।
न स्वेनैनां प्रयच्छेत्तु गुणहीनाय कर्हिचित् ॥

इति मनुवचनं तद्गुणवद्वरासम्भवे गुणहीनाय सर्वथैव कन्या न देये-त्येतावन्मात्रपरं, न तु यथाश्रुतार्थकम् । 'वरं विषं भुङ्क्ष्व मा चाऽस्य गृहे भुङ्क्थाः' इतिवत् काममिति वचनसन्दर्भस्वरसात् ।

दद्याद्गुणवते कन्यां नग्निकामेव शक्तितः ।
न त्वेवं गुणहीनाय नोपरुध्याद्रजस्वलाम् ॥

इति यमादिनानास्मृतिविरोधाच्चेति । यदा पुनरुक्तदातॄणामभावस्त-दा स्वयं कन्यैव गम्यं अनपकृष्टवर्णं पातित्यादिदोषरहितं वरं भर्तारं कुर्यात् । एतच्च रजोदर्शनात्प्रागेवेति केचित् । परे तु जीवत्पितृकाया इव ऋतुत्रयाद्यन्तरमेव दातृहीनाया अपि स्वयंवराधिकार इत्याहुः ।
विष्णुः—

'ऋतुत्रयमतीत्यैव कन्या कुर्यात्स्वयंवरम् ।
ऋतुत्रये व्यतीते तु प्रभवत्यात्मनः सदा ॥

बौधायनः—

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृशासनम् ।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ॥
अविद्यमाने सदृशे गुणहीनमपि श्रयेत् ।

पित्रादीनां यत्नवतामपि केनचिन्निमित्तेन कन्यादानासम्भवे स-तीदम् । विष्णुवचनन्तु यथोक्तवरसम्पत्तावप्युपेक्षादिना तददाने द्रष्ट-व्यमित्यविरोधः ।

अत्र विशेषमाह नारदः—

यदा तु नैव कश्चित्स्यात् कन्या राजानमाव्रजेत् ।
अनुज्ञया वरं तस्य परीक्ष्य वरयेत् स्वयम् ॥ ६३-६४ ॥

(मिता०) कन्यादातृक्रममाह—

पितेति, अप्रयच्छन्निति च । एतेषां पित्रादीनां पूर्वस्य पूर्वस्याभावे परः परः कन्याप्रदः प्रकृतिस्थश्चेत् यद्युन्मादादिदोषवान्, भवति ।

---

(१) कन्याया दानाधिकारी-इति क० पुस्तके पाठः ।

अतो यस्याऽधिकारः सोऽप्रयच्छन् भ्रूणहत्यामृतावृतावाप्नोति। एतच्चोक्तलक्षणवरसम्भवे वेदितव्यम्। यदा पुनर्दातॄणामभावस्तदा कन्यैव गम्यं गमनार्हमुक्तलक्षणं वरं स्वयमेव वरयेत् ॥ ६३ ॥ ६४ ॥

(वी० मि०) कन्यादानाधिकारिणां समये तद्दानमिव दत्त्वा हरणमपि दोषावहमित्याह—

सकृत् प्रदीयते कन्या हरंस्तां चौरदण्डभाक् ॥

कन्या सकृदेव दीयते इति शास्त्रार्थः। मनुनारदबृहस्पतिकात्यायनैः—

सकृदंशो निपतति सकृत्कन्या प्रदीयते।
सकृदाह ददानीति त्रीण्येतानि सकृत्सकृत् ॥

इत्यभिधानात्। अतस्तामेकस्मै वराय दत्त्वा वरान्तराय तां दातुमपहरन् चौरवद्दण्ड्यः।

(मिता०) कन्याहरणे दण्डः—

सकृदिति। सकृदेव कन्या प्रदीयत इति शास्त्रनियमः। अतस्तां दत्त्वा अपहरन् कन्यां चौरवद्दण्ड्यः ॥

(वी० मि०) वाग्दानमात्रे तु कृते विशेषमाह—

दत्तामपि हरेत्पूर्वाच्छ्रेयांश्चेद्वर आव्रजेत् ॥ ६५ ॥

दत्तां दातुं प्रतिश्रुतां पूर्वाद्वरात् श्रेयान् विद्याकुलादिभिरधिकः आव्रजेत् कन्याविवाहत्वेन स्वीकुर्यात्। अत्र (१)च विशेषमाह नारदः—

ब्राह्मादिषु विवाहेषु पञ्चस्वेषु विधिः स्मृतः।
गुणापेक्षं (२)भवेद्दानमासुरादिषु च त्रिषु ॥

एष विधिर्वाग्दत्तापहाराभावविधिः, तेन गुणाधिकायाऽपि वराय दातुं ब्राह्मादिविवाहे (३)कन्या नाऽपहर्त्तव्येति कश्चित्। रत्नाकरकृतस्तु एष विधिः सकृत्कन्यादानविधिरित्यर्थः। स च नाऽऽसुरराक्षसपैशाचेषु विवाहितायां अपि गुणवद्वरलाभे पुनर्विवाहो न दोषायेत्याहुः ॥ ६५ ॥

(मिता०) एवं सर्वत्र प्रतिषेधे प्राप्तेऽपवादमाह—

दत्तामिति। यदि पूर्वस्माद्वराच्छ्रेयान्विद्याभिजनाद्यतिशययुक्तो वर आगच्छति। पूर्वस्य च पातकयोगो दुर्वृत्तत्वं वा। तदा दत्तामपि

---

(१) च इति क० पुस्तके नास्ति। (२) गुणापेक्षे—इति ख० पुस्तके पाठः।
(३) कन्या—इति ख० पुस्तके नास्ति।

हरेत् । एतच्च सप्तमपदात्प्रागद्रष्टव्यम् ॥ ६५ ॥

अनाख्याय ददद्दोषं दण्ड्य उत्तमसाहसम् ॥

अदुष्टां (१)तु त्यजन् दण्ड्यो दूषयंस्तु मृषा शतम् ॥६६॥

(वी०मि०)कन्याप्रदो यदि कन्यादोषं जानन् वरेणाऽविदितमकथयित्वा तां प्रयच्छति तदा उत्तमसाहसं पणसहस्रं दण्ड्यः । एवमदुष्टां कन्यां परिणीय त्यजन् वरोऽपि पणसहस्रं दण्ड्यः । यस्तु वरो मृषा दोषैः अविद्यमानैरपस्मारादिभिः द्वेषादिना परिणयात्प्रागेव कन्यां दुष्टत्वेनाऽभिधत्ते स पणशतं (२)दण्ड्य इत्यर्थः । पणं च वक्ष्यति । वरस्याऽपि स्वदोषमनाख्याय विवाहे दण्डमाह नारदः—

गूह(३)यित्वाऽऽत्मनो दोषं विन्दते द्विगुणो दमः ।
वरस्य दत्तनाशश्च भवेत् स्त्री च विवर्तते ॥

कात्यायनोऽपि—

वरो दोषमनाख्याय पाणिं गृह्णाति यो नरः ।
याचनां वा प्रकुर्वीत तद्दत्तं नाप्नुयात्तु सः ॥
कन्यादोषेऽप्ययं धर्मो दाता दण्ड्यो वरस्तथा ।
दद्याद् गृहीतं दाता च न त्वेवाऽभिप्रजातयोः ॥

अ(४)भिप्रजातयोः=जातापत्योः ॥६६॥

(मिता०) अनाख्यायेति । यः पुनश्चक्षुर्ग्राह्यं दोषमनाख्याय कन्यां प्रयच्छति असावुत्तमसाहसं दण्ड्यः । उत्तमसाहसं च व(५)क्ष्यते । अदुष्टां तु प्रतिगृह्य त्यजन्नुत्तमसाहसमेव दण्ड्यः । यः पुनर्विवाहात्प्रागेव द्वेषादिना असद्भिर्दोषैर्दीर्घरोगादिभिः कन्यां दूषयति स पणानां वक्ष्यमाणलक्षणानां शतं दण्ड्यः ॥ ६६ ॥

(वी० मि०) अनन्यपूर्विकामुद्वहेदित्युक्तं, तत्राऽन्यपूर्विका कीदृशीत्यपेक्षायामाह—

अक्षता च क्षता चैव पुनर्भूः संस्कृता पुनः ॥

स्वैरिणी या पतिं हित्वा सवर्णं कामतः श्रयेत् ॥ ६७ ॥

अनन्यपूर्विका द्विविधा पुनर्भूः स्वैरिणी चेति । तत्र पुनर्वैवाहिक-

---

(१) च—इति ख० पुस्तके पाठः । (२) सहस्रं—इति ख० पुस्तके पाठः ।
(३) इदं पद्यं क० पुस्तके नास्ति । (४) इदं क० पुस्तके नास्ति । (५) अग्रे व्यवहाराध्याये ।

विधिना संस्कृता पुनर्भूः । या तु कौमारं पतिं त्यक्त्वा सवर्णं कामतो वैवाहिकविधिं विनैव श्रयते सा स्वैरिणी । पुनर्भूरपि द्विवि(१)धा क्षता वाऽक्षता च । क्षता उपभुक्ता । एतच्चोपलक्षणम्, अविवाहिताऽपि परपुरुषोपभुक्ताऽन्यपूर्विकेत्यपि द्रष्टव्यम् । एवं च पुरुषान्तरेण परिणीता उपभुक्ता वा न परिणेये(२)ति पर्यवसितार्थः ॥ ६७ ॥

(मिता०) अनन्यपूर्विकामित्यत्रानन्यपूर्वा परिणेयोक्ता तत्राऽन्यपूर्वा कीदृशीत्याह—

अक्षतेति । अन्यपूर्वा द्विविधा पुनर्भूः स्वैरिणी चेति । पुनर्भूरपि द्विविधा क्षता चाऽक्षता च । तत्र क्षता संस्कारात्प्रागेव पुरुषसम्बन्धदूषिता । अक्षता पुनः संस्कारदूषिता । या पुनः कौमारं पतिं त्यक्त्वा कामतः सवर्णमाश्रयति सा स्वैरिणीति ॥ ६७ ॥

(वी० मि०) विवाहमैथुनयो(३)स्तुल्ययोगक्षेमत्वात् सर्वैवाऽन्यपूर्विका यथा न परिणेया तथा न गम्याऽपीति सा(४)मान्यत एव प्रसक्तौ विशेषमाह—

अपुत्रां गुर्वनुज्ञातो देवरः पुत्रकाम्यया ॥
सपिण्डो वा सगोत्रो वा घृताभ्यक्त ऋतावियात् ॥ ६८ ॥
आगर्भसम्भवाद्गच्छेत् पतितस्त्वन्यथा भवेत् ॥
अनेन विधिना जातः क्षेत्र(५)कस्य भवेत्सुतः ॥ ६९ ॥

अपुत्रां योग्यपुत्रहीनां स्त्रियाः पतिश्वशुरादिभिरनुज्ञातस्तस्यां पुत्रकाम्यया पुत्रोत्पादनेच्छया देवरः पत्युर्भ्राता तदभावे तत्सपिण्डस्तदभावेऽसपिण्डोऽपि सगोत्रोऽनपकृष्टवर्णः ऋतुसमये घृताभ्यक्तसर्वाङ्गो गच्छेत् । पुत्रकाम्ययेत्यनेन वन्ध्याया भोगार्थगमनं व्युदस्तम् । अत्र विशेषमाह मनुः—

देवराद्वा सपिण्डाद्वा स्त्रिया सम्यङ् नियुक्तया ।
प्रजेप्सिताऽधिगन्तव्या सन्तानस्य परिक्षये ॥

(१) द्विधा—इति ख० पुस्तके पाठः ।
(२) परिणीया—इति ख० पुस्तके पाठः ।
(३) 'विवाह'—इत्यारभ्य 'परिणेया'—इत्यन्तो ग्रन्थः ख० पुस्तके नास्ति ।
(४) सामान्यतयेव—इति ख० पुस्तके पाठः ।
(५) क्षेत्रजोऽस्य—इति मुद्रितपुस्तके पाठः ।

यमः—

ऋतौ तु तस्यां स्नातायां वाग्यतस्तामसे निशि।
स्वश्मश्रुनखरोमा(१)णां गन्धस्पर्शांश्च वेदयन्॥

विष्णुः—'नियुक्तायां सवर्णेनोत्तम(२)वर्णेन वोत्पादितः क्षेत्रज सु(३)तः'। म(४)नुः—

यस्तल्पजः प्रमीतस्य क्लीबस्य व्याधितस्य वा।
स्वधर्मेण नियुक्तायां स ज्ञेयः क्षेत्रजः सुतः॥

विशेषमाह—आगर्भसम्भवादिति। एतेन गर्भसमये गमनं निषिद्धम्। प्रसवानन्तरन्तु जातस्य कन्यात्वाऽयोग्यत्वसद्योमरणादौ पुनर्गच्छेदेव मनावीप्सितपदस्मरणात्। ईप्सितत्वं च(५) वैदिकपुत्रकृत्यानधिकारप्रयो(६)जकरूपशून्यत्वम्, अन्यथा विध्युल्लङ्घनेन गमने। तथा च मनुः—

नियुक्तौ यौ विधिं हित्वा वर्त्तयातां तु कामतः।
तावुभौ पतितौ स्यातां स्नुषागगुरुतल्पगौ॥

अनेनेत्यादि। तथा चैतादृश्या अनन्यपूर्विकाया गमनेऽपि(७) न दोषः। क्षेत्रजपुत्रोत्पादनविध्यनुमतत्वादिति भावः। क्षेत्रिकस्येति प्रायोवादः। यदा तु निरपत्यो देवरादिः 'अत्र यदपत्यं भविष्यति तदावयोः समान'मिति व्यवस्थया गच्छति, तदा स पुत्रो बीजिक्षेत्रिणोरुभयोरपि भवति। तदाह मनुः—

क्रियाभ्युपगमार्थेन बीजार्थं यत्प्रदीयते।
तस्येह भागिनौ दृष्टौ बीजी क्षेत्रिक एव च॥

स्यादेतत्—

नाऽन्यस्मिन्विधवा नारी नियोक्तव्या द्विजातिभिः।
अन्यस्मिन् हि नियुञ्जाना धर्मं हन्युः सनातनम्॥

इति वचनमनेन विरुध्यत इति। अत्र समाहितं बृहस्पतिना—

उक्तो नियोगो मनुना निषिद्धः स्वयमेव च।
युगह्रासादशक्योऽसौ कर्तुमन्यैर्विधानतः॥

---

(१) लोमाणां—इति क० पुस्तके पाठः।
(२) सवर्णेनोत्तमेन वर्णेनोत्पादितः—इति ख० पुस्तके पाठः।
(३) सुतः—इति ख० पुस्तके नास्ति। (४) मनुः—इति क० पुस्तके नास्ति।
(५) तु—इति ख० पुस्तके पाठः। (६) प्रयोजकरूप—इति ख० पुस्तके नास्ति।
(७) अपि—इति ख० पुस्तके नास्ति।

तपोज्ञानसमायुक्ताः कृतत्रेतायुगे नराः ।
द्वापरे च कलौ नृणां शक्तिहानि(१)र्विजायते ॥
अनेकधा कृताः पुत्रा ऋषिभिर्ये पुरातनैः ।
न शक्यन्तेऽधुना कर्तुं शक्तिहीनैरिदन्तनैः ॥

इति दिक् ॥ ६८—६९ ॥

(मिता०) एवं सर्वप्रकारेणान्यपूर्वापर्युदासे प्राप्ते विशेषमाह—

अपुत्रामिति, आगर्भादिति च। अपुत्रामलब्धपुत्रां पित्रादिभिः पुत्रार्थमनुज्ञातो देवरो भर्तुः कनीयान् भ्राता सपिण्डो वा उक्तलक्षणः सगोत्रो वा। एतेषां पूर्वस्य पूर्वस्याऽभावे परः परः घृताभ्यक्तसर्वाङ्गः ऋतावेव वक्ष्यमाणलक्षणे इयात् गच्छेत् आगर्भोत्पत्तेः । ऊर्ध्वं पुनर्गच्छन् अन्येन वा प्रकारेण तदा पतितो भवति । अनेन विधिनोत्पन्नः पूर्वपरिणेतुः क्षेत्रजः पुत्रो भवेत् । एतच्च वाग्दत्ताविषयमित्याचार्याः। 'यस्या म्रियेत कन्याया वाचा सत्ये कृते पतिः। तामनेन विधानेन निजो विन्देत देवरः' ॥ इति (९।६९) मनुस्मरणात् ॥६८॥६९॥

(वी० मि०) विध्युल्लङ्घनेन परपूर्वागमने पुरुषस्येव पत्यतिरिक्तगमने स्त्रिया अपि दोष इति दर्शयितुं तस्या न्यक्कारमाह—

हृताधिकारां मलिनां पिण्डमात्रोपजीविनीम् ॥
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥ ७० ॥

व्यभिचारिणीं अविधिपुरुषान्तरगामिनीं पत्नीं हृताधिकारां भृत्यभरणाद्यधिकाररहितां मलिनां अञ्जनाभ्यञ्जनशुक्लवस्त्राभरणादिशून्यां देहधारणमात्रक्षमान्नभोजनां परिभूतां धिक्कृतां क्षामाङ्गीं वा भूतलशायिनीं स्वगृह एव वासयेत् । इदं चाऽनपकृष्टे वर्णे व्यभिचारे । अन्यत्र त्वाह बृहस्पतिः—

हीनवर्णोपभुक्ता या त्याज्या वध्या च सा भवेत् ।

इदं (२)च पुनर्व्यभिचारनिवृत्त्यर्थं (३)न तु शुद्ध्यर्थम् ।

यत्पुंसः परदारे(४)षु तच्चैनां चारयेद्व्रतम् ।

इति मनुना पृथक् प्रायश्चित्तबोधनात् ॥ ७० ॥

---

(१) शक्तिहानिः प्रजायते—इति ख० पुस्तके पाठः ।
(२) तु—इति ख० पुस्तके पाठः । (३) न तु शुद्ध्यर्थम्-इति ख० पुस्तके नास्ति ।
(४) परदारेषु—इति ख० पुस्तके पाठः ।

(मिता०) व्यभिचारिणीं प्रत्याह—

हृतेति। या व्यभिचरति तां हृताधिकारां भृत्यभरणाद्यधिकाररहिताम्। मलिनां अञ्जनाभ्यञ्जनशुभ्रवस्त्राभरणशून्याम्। पिण्डमात्रोपजीविनीं प्राणयात्रामात्रभोजनाम्। धिक्कारादिभिः परिभूतां भूतलशायिनीं स्ववेश्मन्येव वासयेत्। वैराग्यजननार्थं न पुनः शुद्ध्यर्थम्। 'यत्पुंसः परदारेषु तच्चैनां चारयेद्व्रतम्' इति पृथक्प्रायश्चित्तोपदेशात्॥ ७० ॥

(वी० मि०) मानसादिव्यभिचारे तु स्वल्पापराधे स्त्रीणां नाऽयं प्रकार इति दर्शयितुं स्त्रीः स्तौति—

सोमः शौचं ददौ (१)तासां गन्धर्वाश्च शुभां गिरम्॥
पावकः सर्वमेध्यत्वं मेध्या (२)वै योषितो ह्यतः॥ ७१ ॥

सोमादिभिरवस्थाभेदेनोपभुज्य सन्तुष्टैः शौचं मधुरभाषित्वं सर्वयज्ञार्हत्वं च क्रमेण वरो दत्तः स्त्रीणामतस्ता मेध्या अल्पाशौचहेतुभिर्न च दुष्यन्तीत्यर्थः॥ ७१ ॥

(मिता०) तस्या अल्पप्रायश्चित्तार्थमर्थवादमाह—

सोम इति। परिणयनात्पूर्वं सोमगन्धर्ववह्नयः स्त्रीर्भु(३)क्त्वा यथाक्रमं तासां शौचमधुरवचनसर्वमेध्यत्वानि दत्तवन्तः। तस्मात्स्त्रियः सर्वत्र स्पर्शालिङ्गनादिषु मेध्याः शुद्धाः स्मृताः॥ ७१ ॥

(वी० मि०) स्वल्पस्तु दोषो भवत्येव, स च ऋतुप्राप्तिमात्रेणैव नश्यति न तु प्रायश्चित्तं तत्र कार्यमित्याह—

व्यभिचारादृतौ शुद्धिर्गर्भे त्यागो विधीयते॥
गर्भभर्तृवधादौ च तथा महति पातके॥ ७२ ॥

व्यभिचारात्, मानसादिव्यभिचारे छान्दसो विभक्तिव्यत्ययः। अत्रैव मनुः—रजसा स्त्री मनोदुष्टा।

एवं बला(४)त्कारेण परोपभुक्ताया अपि ऋतुप्राप्त्यैव शुद्धिरित्याहुः। केचित्तु शुद्धिरिति संव्यवहार्यत्वमात्रपरं, प्रायश्चित्तं त्वल्पं वर्त(५)त एव। 'मनसा भर्तुरतिचारे त्रिरात्रं यावकं

(१) ददावासां ख० ग० ददौ स्त्रीणां क०—इति मुद्रितस्तके पाठौ।
(२) तस्मान्मेध्या हि योषितः—इति ख० पुस्तके पाठः। (३) स्त्रियो भुक्त्वा क०।
(४) बलात्कारिणापि— इति ख० पु० पाठः। (५) वर्तत—इति ख० पुस्तके नास्ति।

क्षीरौदनं वा भुङ्क्तेऽधःशयीत ऊर्ध्वं त्रिरात्रादप्सु नि(१)मज्य गायत्र्यष्टशतेन शिरोभिर्जुहुयात्पूता भवतीति विज्ञायत' इति वसिष्ठवचनादित्याहुः । अधिकापराधे तु (२)भर्त्ता वा बन्धुवर्गो वा तां न गृहे वासयेदित्याह–गर्भ इति । द्विजातिस्त्रियाः शूद्राद्गर्भे जाते त्यागो विधेयः । तदाह वसिष्ठः—

ब्राह्मणक्षत्रियविशां स्त्रियः शूद्रेण सङ्गताः ।
अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः ॥

गर्भहनने भर्तृहनने च महापा(३)तके कृते स्त्रियस्त्यागः कार्यः । आदिपदं शिष्यगागुरुगादिसङ्ग्रहार्थम् । तदाह वसिष्ठः—

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा तथा ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

जुङ्गितः प्रतिलोमजः । मनु ४)श्च—

ऋतुस्नाता तु या नारी भर्त्तारं नोपगच्छति ।
तां ग्राममध्ये विख्याप्य भ्रूणघ्नीं तु विवासयेत् ॥ ७२ ॥

(मिता०) न च तस्यास्तर्हि दोषो नास्तीत्याशङ्कनीयमित्याह–व्यभिचारादिति । अप्रकाशितान्मनोव्यभिचारात्पुरुषान्तरसम्भोगसङ्कल्पाद्यदपुण्यं तस्य ऋतौ रजोदर्शने शुद्धिः । शूद्रकृते तु गर्भे त्यागः । 'ब्राह्मणक्षत्रियविशां भार्याः शूद्रेण सङ्गताः । अप्रजाता विशुद्ध्यन्ति प्रायश्चित्तेन नेतराः' ॥ इति स्मरणात् । तथा गर्भवधे भर्तृवधे महापातके च ब्रह्महत्यादौ । आदिग्रहणाच्छिष्यादिगमने च त्यागः । 'चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या । पतिघ्नी च विशेषेण जुङ्गितोपगता च या' ॥ इति व्यासस्मरणात् । प्रतिलोमजश्चर्मकारादिः । त्यागश्चोपभोगधर्मकार्ययोः, न तु निष्कासनं गृहात्तस्याः । 'निरुन्ध्यादेकवेश्मनि' इति नियमात् ॥७२॥

(वी०मि०)'अविप्लुतब्रह्मचर्य' इत्यादिना ब्रह्मचारिण एव विवाहाधिकारो यथाश्रुतो लभ्यते तत्रोपलक्षणत्वमभिप्रेत्य पुनर्विवाहमाह—

सुरापी व्याधिता धूर्त्ता वन्ध्याऽर्थघ्न्यप्रियंवदा ॥
स्त्रीप्रसूश्चाऽधिवेत्तव्या पुरुषद्वेषिणी तथा ॥ ७३ ॥

---

(१) निमज्य—इति ख० पुस्तके नास्ति । (२) तु—इति क० पुस्तके नास्ति ।
(३) कृते महति पातके—इति ख० पु० पाठः । (४) च—इति ख० पुस्तके नास्ति ।

केचित्तु 'गर्भे त्यागो विधीयत' इत्युक्तमतः कथं वैराग्याभावादाश्रमान्तरानधिकारिणा स्थातव्यमनाश्रमित्वस्य निषिद्धत्वादित्याकाङ्क्षायामिमं श्लोकमवतारयन्ति।

सुरां पिबतीति सुरापी द्विजातिस्त्री। व्याधिता व्याधियुक्ता, व्याधयश्च कुष्ठादयो वैदिक(१)कर्मविरोधिनः,अपस्मारोन्मादादयश्च लौकिककर्मविरोधिनो द्रष्टव्याः। धूर्त्ता पतिवञ्चनशीला। वन्ध्या प्रसिद्धैव। अर्थघ्नी अतिव्ययादिना धननाशनशीला। अप्रियंवदा परुष(२)भाषणशीला। स्त्रीप्रसूः स्त्रीमात्रजनयित्री। तज्ज्ञानं च क्वचित् सामुद्रिकादिशास्त्रबलान्निर्णयरूपमेव, क्वचिच्च भूयः स्त्रीजन(३)दर्शननिबन्धनमुत्कटकोटिकसंशयरूपमिति मन्तव्यम्। पुरुषद्वेषिणी पतिदोषशीला,पुरुषसङ्गमविमुखी वा। एताश्चाऽधिवेत्तव्याः सपत्नीयोजिताः कार्याः। अत्र विशेषमाह मनुः—

वन्ध्याष्टमेऽधिवेत्तव्या दशमे तु मृतप्रजा।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥

अष्टम इत्यादौ वर्षे इति पूरणीयम्।

आकाङ्क्षेताऽष्टवर्षाणि भर्त्ताऽतिप्रवां स्त्रियम्।

इत्यादिदेवलवचनात्। अतिप्रसवां उचितकालेऽप्यजातरजसम्। एतच्चाऽधिवेदननिमित्तनिश्चयार्थमिति प्रतिभाति। एवं च येष्वधिवेदननिमित्तेषु सम(४)यः श्रूयते तेषु तेषु यावता समयेन तन्निर्णयस्तावान् समयः प्रतीक्ष्य इति। इदं चाऽधिवेदननिय(५)तनिमित्तपरिगणनम्। इच्छया त्वन्यत्राऽप्यधिवेदनम्। तदाह देवलः—

एकामुद्वाह्य कामार्थमन्यां लब्धुं य इच्छति।
समर्थस्तोषयित्वाऽर्थैः पूर्वोढा(६)मपरां वहेत्॥

समर्थः सम्यगर्थः स्त्रीसन्तोषनिमित्तधनवानिति यावत्। यत्पुनरापस्तम्बेनोक्तं–'धर्मप्रजासम्पन्ने दारे नान्यां कुर्वीताऽन्यतरापाये कुर्वीत' इति, तद्देवलोक्तातिरिक्तविषयतया नेयम्॥ ७३॥

(मिता०) द्वितीयपरिणयने हेतूनाह—

सुरां पिबतीति सुरापी शूद्रापि। 'पतत्यर्धं शरीरस्य यस्य

---

(१) धर्म –इति ख० पु० पाठः। (२) परुषभाषिणी—इति ख० पु० पाठः।
(३) जननि०–इति ख० पु० पाठः। (४) समयः श्रूयते तेषु तेषु इति क० पुस्तके नास्ति।
(५) नियम-इति ख० पु० पाठः। (६) पूर्वोढामपि तां—इति ख० पु० पाठः।

भार्या सुरां पिबेत्' इति सामान्येन प्रतिषेधात् । व्याधिता दीर्घरोगग्रस्ता । धूर्ता विसंवादिनी । वन्ध्या निष्फला । अर्थघ्नी अर्थनाशिनी । अप्रियंवदा निष्ठुरभाषिणी । स्त्रीप्रसूः स्त्रीजननी । पुरुषद्वेषिणी सर्वत्राऽहितकारिणी । अधिवेत्तव्येति प्रत्येकम(१)भिसम्बध्यते । अधिवेदनं भार्यान्तरपरिग्रहः ॥ ७३ ॥

(वी० मि०) अधिवेदननिमित्तदोषे सत्यप्यधिविन्नाऽवश्यं भर्तव्या, न तु तेन दोषेणाऽभावोऽपीत्याह—

अधिविन्ना तु भर्तव्या महदेनोऽन्यथा भवेत् ॥

एनः पापम् । अन्यथाऽभरणे मनुः—

अधिविन्ना च या नारी निर्गच्छेत् दुःखिता गृहात् ।
सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥

तथा—

या रोगिणी स्याद् दुहिता सम्पन्ना चैव शीलतः ।
साऽनुज्ञाप्याऽधिवेत्तव्या नाऽवमान्या च कर्हिचित् ॥

किञ्चाऽधिविन्नाभरणे न केवलं पापपरीहारः, किं तु त्रिवर्गोपयुक्तायास्तस्याः पोषणे परस्परानुकूल्ये त्रिवर्गवृद्धिरपीत्याह—

यत्रानुकूल्यं दम्पत्योस्त्रिवर्गस्तत्र वर्द्धते ॥ ७४ ॥

यत्र गृहस्थाश्रमे आनुकूल्यमैकमत्यं त्रिवर्गो धर्मार्थकामाः वर्द्धन्ते पुनस्तद्धेतुकर्मनिष्पत्तेः । दम्पत्योः परस्परानुकूल्यस्योभयसाध्यत्वात् ॥ ७४ ॥

(मिता०) किञ्च—

अधिविन्नेति । सा अधिविन्ना पूर्ववदेव दानमानसत्कारैर्भर्तव्या । अन्यथाऽभरणे महदपुण्यं वक्ष्यमाणो दण्डश्च । न च भरणे सति केवलमपुण्यपरिहारः । यतः—यत्र दम्पत्योरानुकूल्यं चित्तैक्यं तत्र धर्मार्थकामानां प्रतिदिनमभिवृद्धिश्च ॥ ७४ ॥

(वी० मि०) स्त्रीरपि तत्र प्रणा(२)वयितुमसाधारणफलोपदर्शने-

(१) सर्वत्र सम्बध्यते क० ।
(२) प्रवणायितुं—इति ख० पु० पाठः ।

न नियुङ्क्ते—

मृते जीवति वा पत्यौ या नाऽन्यमुपगच्छति ॥
सेह कीर्तिमवाप्नोति मोदते चोमया सह ॥ ७५ ॥

यद्वा 'वर्णाश्रमेतराणा'मिति सामान्येनोपक्रमात् स्त्रीणाम(१)पि धर्मस्य वक्तव्यत्वात्तमाह 'मृत' इत्यादीत्यवतारिका। एवमन्यत्राऽप्यूह्यमिति। वाशब्दः समुच्चये। अन्यं पतिमुपपतिमित्यत्रैवोपगच्छतीति प्रकृतेऽप्युपशब्दो निन्दातात्पर्यकस्तेनाऽविधिगमनव्युदासात् क्षेत्रजोत्पादनार्थं पत्यन्यगमनमभ्यनुज्ञातमिति मन्तव्यम्। इह लोके उमया भवान्या सह मोदते हृष्यति क्रीडति वाऽर्थादमुत्र यद्यपि पत्यव्यभिचारो नित्य एव तथाऽप्यानुषाङ्गिकं फल(२)मिदम्। केचित्तु नोपगच्छति कायवाङ्मनोभिः, एवं च सतीफलमिदमित्याहुः ॥ ७५ ॥

(मिता०) स्त्रियं प्रत्याह—

मृत इति। भर्तरि जीवति मृते वा या चापल्यादन्यं पुरुषं (३)नोपगच्छति सेह लोके विपुलां कीर्तिमवाप्नोति। उमया च सह क्रीडति पुण्यप्रभावात् ॥ ७५ ॥

(वी० मि०) शास्त्रीयाऽधिवेदननिमित्ताभावे स्त्रियमधिविन्दन् शास्त्रीयत्यागनिमित्ताभावे त्यजन् वा दोषभागित्याह—

आज्ञासम्पादिनीं दक्षां वीरसूं प्रियवादिनीम् ॥
त्यजन् दाप्यस्तृतीयांशमद्रव्यो भरणं स्त्रियः ॥ ७६ ॥

(वी० मि०) आज्ञेति आदिष्टार्थकरणशीलामित्यर्थः। अनेनाऽधिवेदननिमित्तत्वेनोक्तस्य धूर्तत्वस्याऽभाव उक्तः। दक्षां गृहकृत्यादिसमर्थाम्। अनेन व्याधितत्वस्याऽभावो दर्शितः। वीरसूं पुत्रवतीम्। अनेन वन्ध्यात्वस्य स्त्रीप्रसूतस्य चाऽभावोऽभिप्रेतः। प्रियवादिनीं मधुरभाषणशीलाम्। अनेन 'सद्यस्त्वप्रियवादिनी' इति मनूक्तस्य कटुभाषित्वस्याऽत्रैवोक्तस्य पुरुषद्वेषित्वस्य वाऽभावोऽभिसंहितः। कटुभाषणस्य द्वेषनैयत्यात्। इदं च सर्वं प्रपञ्चमात्रमधिवेदननिमित्तसामान्याभावोपलक्षणं त्यागनिमित्तसामान्याभावोपलक्षणं च त्यजन्

(१) अपि—इति ख० पु० पाठः।
(२) फलमाह—इति ख० पु० पाठः। (३) नैवोपगच्छति क.।

अधिविन्दन् भरणादिना वियोजयन्वा भरणोपयोग्याधिकधनवान् स्ववित्तस्य तृतीयं भागं,भरणमात्रपर्याप्तधनाधिकधनशून्यस्तु ग्रासाच्छादनादि स्त्रियै दाप्यो ऽर्थाद्राज्ञा तत्सामर्थ्यादित्यर्थः ॥ ७६ ॥

(मिता०) अधिवेदनकारणाभावे अधिवेत्तारं प्रत्याह—

आज्ञेति । आज्ञास(१)म्पादिनीमादेशकारिणीं, दक्षां शीघ्रकारिणीं, वीरसूं पुत्रवतीं, प्रियवादिनीं, मधुरभाषिणीं यस्त्यजति अधिविन्दति स राज्ञा स्वधनस्य तृतीयांशं दाप्यः । निर्धनस्तु भरणं ग्रासाच्छादनादि दाप्यः ॥ ७६ ॥

(वी० मि०) स्त्रीधर्मानाह—

स्त्रीभिर्भर्तृवचः कार्यमेष धर्मः परः स्त्रियाः ॥
आशुद्धेः सम्प्रतीक्ष्यो हि महापातकदूषितः ॥ ७७ ॥

भार्याभिः सति सम्भवे सदा भर्तृवाग्विषयोऽर्थः सम्पाद्यः । न च स्त्रीणां कृत्यान्तरस्याऽपि शास्त्रे धर्मतयोपदेशात्तद्विरोधे का गतिरित्यत्राऽऽह 'एष' इत्यादि । भर्तृवचःकरणं भार्यायाः सर्वेभ्यो धर्मान्तरेभ्यः पर उत्कृष्टः, उत्कृष्टस्वर्गादिसाधनत्वात् । तथा चैतद्विरोधि धर्मान्तरं त्याज्यमिति सम्यक् । अत एव मनुः—

नास्ति स्त्रीणां पृथक् यज्ञो न व्रतं नाऽप्युपोषितम् ।
पतिं शुश्रूषयेत् यत्तु (२)तेन स्वर्गे महीयते ॥

पृथगित्युक्ते भर्तृसाहित्ये न दोषः । अत एव विष्णुः—'समानव्रतचारित्वं स्त्रीधर्मः' इति । अविरोधे तु धर्मान्तरमपि कार्यमेव । यदाह शङ्खः-'कामं भर्तुरनुज्ञया व्रतोपवासनियमेज्यादीनामभ्यासः स्त्रीधर्मः' इति । एतच्चाऽप्रोषितभर्तृकाविषयम् ।

भर्त्तर्येव प्रवसिते त्यक्ता वा पतिना शुभम् ।
कुर्वीताराधनं नारी उपवासादिना हरेत् ॥

इत्यादिना प्रोषितभर्त्तृकाया उपवासाद्युपदेशात् । एवं च—

पत्यौ जीवति या नारी उपोष्य (३)व्रतचारिणी ।
आयुः संहरते प(४)त्युः सा नारी नरकं व्रजेत् ॥

इति विष्णुवचने जीवति अप्रोषिते चेति द्रष्टव्यमित्याहुः । साम्प्रदा-

---

(१) आदेशसम्पादिनीं ख० । (२) यस्तु-इति ख०पु० पाठः ।
(३) व्रतमाचरेत्-इति क० पु० पाठः । (४) भर्तुः-इति ख०पु० पाठः ।

शिकास्तु प्रोषितभर्तृकाया अप्युपवासव्रते सामान्यतः प्राक्तनी भर्त्रनुज्ञाऽपेक्षितैवेति वदन्ति। तत्किं महापातकिनोऽपि पत्युर्मैथुनाद्यर्थं वचः कार्यं? नेत्याह 'आशुद्धेः' इत्यादि। महापातकेन ब्रह्महत्यादिना दूषितो जातपापः। तेन तत्त्वज्ञानी व्यवच्छिन्नः। आशुद्धेः ब्रह्मवधादिजनितस्य पापस्य प्रायश्चित्तादिना अपगमपर्यन्तं सम्यक् प्रतीक्ष्योऽनुरोद्धव्यः। शास्त्राविरोधि तत्पारतन्त्र्यं कार्यं न त्वन्यदिति संशब्दोपादानपर्यवसितार्थः॥ ७७॥

(मिता०) स्त्रीधर्मानाह—

स्त्रीभिरिति। स्त्रीभिः स(१)दा भर्तृवचनं कार्यम्। यस्मादयमेव पर उत्कृष्टो धर्मः स्त्रीणां स्वर्गहेतुत्वात्। यदा तु महापातकदूषितस्तदा आशुद्धेः संप्रतीक्ष्यः। न तत्पारतन्त्र्यम्। उत्तरकालं तु पूर्ववदेव तत्पारतन्त्र्यम्॥ ७७॥

(वी० मि०) उक्तविधिनोढायां स्त्रियां वोढुरनन्तरकृत्यमाह—

लोकानन्त्यं दिवः प्राप्तिः पुत्रपौत्रप्रपौत्रकैः॥
यस्मात्तस्मात् स्त्रियः सेव्याः कर्तव्याश्च सुरक्षिताः॥ ७८॥

लोकानन्त्यमिति समाहारः। यतो हेतोः पुत्रादिभिस्त्रिभिः क्रमेण(२) स्वर्गलोकस्तस्याऽऽनन्त्यं कल्पव्यापकता दिवः सूर्यविष्टपस्य प्राप्तिश्च भवति। (३)एतदेव मनुः—

पुत्रेण लोकान् जयति पौत्रेणानन्त्यमश्नुते।
अथ पुत्रस्य पौत्रेण ब्रध्नस्याप्नोति विष्टपम्॥

तस्मात् भार्याः सुरक्षिताः कर्तव्याः ऋतुकाले च सेव्याः उपभोक्तव्याः। पुत्रादिनिखिललोकप्राप्त्यादीनां सुरक्षितभार्योपगमसाध्यत्वात्। व्यभिचारिणीपुत्रादेरप्रमत्ता रक्षत तन्तुमेतमित्यादिलोकादिप्राप्तिहेतुत्वाभावावगमादिति। कर्त्तव्या इत्यत्र भर्त्तव्या इति क्वचित्पाठः। रक्षाप्रकारमाह मनुः—

अर्थस्य सङ्ग्रहे चैनां व्यये चैव नियोजयेत्।
शौचे धर्मे च पङ्क्त्यां च पारिणाह्यस्य(४) चेक्षणे॥

---

(१) सर्वथा क।
(२) क्रमेण-इति ख० पुस्तके नास्ति। (३) अत एव-इति ख० पु० पाठः।
(४) पारिणाम्यस्य चेक्षणे—इति क० पु० पाठः।

प्रपञ्चमात्रमेतत्, अतो येन तेनोपायेन रक्षणीया इति ग-म्यते ॥ ७८ ॥

(मिता०) शास्त्रीयदारसङ्ग्रहस्य फलमाह—

लोकानन्त्यमिति । लोके आनन्त्यं वंशस्याविच्छेदः, दिवः प्राप्तिश्च दारसंग्रहस्य प्रयोजनम् । कथमित्याह–पुत्रपौत्रप्रपौत्रैर्लोकानन्त्यम्, अग्निहोत्रादिभिश्च स्वर्गप्राप्तिरित्यन्वयः । यस्मात् स्त्रीभ्य एतद्द्वयं भवति तस्मात् स्त्रियः सेव्या उपभोग्याः प्रजार्थम्, रक्षितव्याश्च धर्मार्थम् । तथा चापस्तम्बेन धर्मप्रजासम्पत्तिः प्रयोजनं दारसङ्ग्रहस्योक्तं 'धर्मप्रजासम्पन्नेषु दारेषु नान्यां कुर्वीत' इति वदता । रतिफलं तु लौकिकमेव ॥ ७८ ॥

(वी० मि०) स्त्रियः सेव्याः इत्युक्तं तत्र विशेषमाह—

षोडशर्तुनिशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् ॥
ब्रह्मचार्येव पर्वाण्याद्याश्चतस्रस्तु वर्जयेत् ॥ ७९ ॥
एवं गच्छन् स्त्रियं क्षामां मघां मूलं च वर्जयेत् ॥
सुस्थ इन्दौ सकृत्पुत्रं लक्षण्यं जनयेत् पुमान् ॥ ८० ॥

रजःसम्बन्धाधिकरणाहोरात्रावधिकाः षोडश निशा अहोरात्राणि स्त्रीणां ऋतुगर्भप्रयोजकः समयविशेषः । इयं(१) च स्मृतौ ऋतुशब्दस्य परिभाषा । अतः 'ऋतुः स्त्रीकुसुमेऽपि च' इति कोशविरोधो नाशङ्कनीयः । केचित्तु स्त्रियाः कुसुमं यस्मिन्काले स स्त्रीकुसुम इत्येव प्रकृतकोशार्थः । अत एव 'स्याद्रजः पुष्पमार्तव'मिति सङ्गच्छते । अन्यथा 'ऋतुः' इत्येव स्यात् । 'ऋतुमत्यप्युदक्यापि' इत्यत्र रजःसम्बन्धविशेषवत्कालीयाविलक्षणसम्बन्ध एव मतुबर्थ इत्याहुः । पक्षद्वयेऽपि ऋतुमतीशब्द उदक्यापर्याय एवेत्यवधेयम् । तस्मिन् ऋतौ युग्मासु द्विचतुरादिषु समासु रात्रिषु संविशेत् पुत्रार्थी भार्यां गच्छेत् । तथा च मनुः—

युग्मासु पुत्रा जायन्ते स्त्रियोऽयुग्मासु रात्रिषु ।
तस्माद्युग्मासु पुत्रार्थी संविशेदार्तवे स्त्रियम् ॥

अत्र ऋतौ गच्छेदिति 'अग्निहोत्रं जुहोति' 'अष्टकाः कर्त्तव्याः' इतिवन्न विधिः, गमनस्य रागप्राप्तत्वात् । न च स्वर्गजनकत्वेनाऽप्राप्त-

(१) इदं-इति क० पुस्तके पाठः ।

त्वात्तथाविधिः, 'ऋतौ (१)च गच्छन्विधिवच्च ब्राह्मणश्चय(२)वते ब्र-ह्मलोका'दिति वसिष्ठवचनादिति द्रष्टव्यम्। वक्ष्यमाणं भट्टाचार्या यदाहुः—

विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति।
तत्र चाऽन्यत्र च प्राप्तौ परिसङ्ख्येति कथ्यते॥

इत्यन्यत्र विस्तारः। नापि 'पञ्च पञ्चनखा भक्ष्याः' इति वत्परि-सङ्ख्या, स्वार्थहानिपरार्थकल्पनाप्राप्तबाधात्मकदोषत्रयदुष्टत्वात्। कि-न्तु नियमविधिः। स चोभयरूपः। ऋतौ गच्छेदेव ऋतावेव गच्छे-दिति। तथा च यमः—

भार्यामृतुमुखे यस्तु सन्निधौ नोपगच्छति।
पितरस्तस्य तं मासं तस्मिन् रेतसि शेरते॥

देवलः—

यः स्वदारानृतुस्नातान् सन्निधौ नोपगच्छति।
भ्रूणहत्यामवाप्नोति गर्भं प्राप्य विना(३)श्य सः॥

बौधायनः—

ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति।
तुल्यमाहुस्तयोर्दोषमनृतौ यश्च गच्छति॥

(४)तत्र ऋतौ गच्छेदेवेति फलितं नियमं प्रतिप्रसूते ब्रह्मचार्येवे-ति। पर्वाणि,

चतुर्दश्यष्टमी चैव अमावास्याऽथ पूर्णिमा।
पर्वाण्येतानि राजेन्द्र! रविसङ्क्रान्ति(५)रेव च॥

इति विष्णुपुराणपरिभाषितानि(६)व्याप्य ब्रह्मचार्येव मैथुन(७)निवृत्त एव स्यात्। कालाध्वनोरत्यन्तसंयोगे (पा० सू० २। ३। ५।) इति द्वितीया। क्वचित्तु पर्वणीति सप्तम्यन्तः पाठः। आद्याः पुष्पोद्गमदि-नमारभ्य चतस्रश्च निशा वर्जयेत्। तुशब्दश्चार्थः। तेन—

पूर्णासु योषित्परिवर्ज्जनीया
योषिन्म(८)घासूत्तरकृत्तिकासु।

(१) च—इति ख० पुस्तके नास्ति। (२) ब्राह्मणः प्रच्यवते—इति ख० पुस्तके पाठः।
(३) विनश्य—इति क० पुस्तके पाठः। (४) अत्र—इति ख० पुस्तके पाठः।
(५) सङ्क्राम एव—इति ख० पु० पाठः। (६) मैथुन एव निवृत्ते स्यात्—इति ख० पु० पाठः।
(७) व्याप्य—इति क० पुस्तके नास्ति।
(८) योषिन्मघाकृत्तिकयोत्तरासु—इति क० पु० पाठः।

बुधे च योषां न समाचरेत—

इत्यादिस्मृत्यन्तरादिव्युदस्तस्याऽत्र विशिष्यते इति पुनस्तस्य समुच्चयः। अत्र चतुर्थरात्रिनिषेध उत्कृष्टपुत्रोत्पत्त्यर्थिन एव। 'लक्षण्यं जनयेत्पुमा'निति वक्ष्यति। अन्यस्य तु—

स्नातां चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः।

इति भारतवचनात्, 'चतुर्थीप्रभृत्युत्तरोत्तरा'मित्यापस्तम्बवचनाच्चाऽनिषेध इति स्मर्त्तव्यम्। क्षामामिति रजस्वलाव्रतेन, तेनाऽप्यदौर्बल्ये अत्रूप्यलघ्वाहारादिना यत्नतः कृतेन दुर्बलामित्यर्थः। सुस्थे गोचारादिशुद्धे इन्दौ सकृदेकवारमेव गच्छन् लक्षण्यं शुभलक्षणयुक्तं पुत्रं जनयेदित्यन्वयः। सुस्थ इन्दाविति पुत्रजन्मप्रदग्रहसंस्थानां पुष्पनक्षत्राद्युपलक्षकम्। 'शस्त इन्दा'विति पाठेऽप्ययमेवार्थः॥ ७९॥ ८०॥

(मिता०) पुत्रोत्पत्त्यर्थे स्त्रियः सेव्या इत्युक्तं तत्र विशेषमाह—

षोडशेति। स्त्रीणां गर्भधारणयोग्यावस्थोपलक्षितः कालः ऋतुः। स च रजोदर्शनदिवसादारभ्य षोडशाहोरात्रस्तस्मिन् ऋतौ युग्मासु समासु रात्रिषु। रात्रिग्रहणाद्दिवसप्रतिषेधः। संविशेत् गच्छेत्पुत्रार्थम्। युग्मास्विति बहुवचनं समुच्चयार्थम्। अतश्चैकस्मिन्नपि ऋतौ अप्रतिषिद्धासु युग्मासु सर्वासु रात्रिषु गच्छेत्। एवं गच्छन्ब्रह्मचार्येव भवति। अतो यत्र ब्रह्मचर्यं श्रा(१)द्धादौ चोदितं तत्र गच्छतोपि न ब्रह्मचर्यस्खलनदोषोऽस्ति। किं च पर्वाण्याद्याश्चतस्रस्तु वर्जयेत्। पर्वाणीति बहुवचनादाद्यर्थावगमादष्टमीचतुर्दश्योर्ग्रहणम्। यथाह मनुः (४। १५५)—'अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम्। ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः'॥ इति। अतोऽमावास्यादीनि, रजोदर्शनादारभ्य चतस्रो रात्रीश्च वर्जयेत्॥ ७९॥

(मिता०) एवमिति। एवमुक्तेन प्रकारेण स्त्रियं गच्छन् क्षामां गच्छेत्। क्षामता च तस्मिन्काले रजस्वलाव्रतेनैव भवति। अथ चेन्न भवति तदा कर्तव्या क्षामता पुत्रोत्पत्त्यर्थमल्पाऽस्निग्धभोजनादिना। 'पुमान्पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियः' इति वचनात्। यदा युग्मायामपि रात्रौ शोणिताधिक्यं तदा स्त्र्येव भवति पुरुषाकृतिः। अयुग्मायामपि शुक्राधिक्ये पुमानेव भवति स्त्र्याकृतिः। का(२)लस्य

(१) श्राद्धादिषु क.। (२) कालस्यानियतत्वात् क.।

निमित्तत्वात् शुक्रशोणितयोश्चोपादानकारणत्वेन प्राबल्यात् । तस्मा-त्क्षामा कर्तव्या । मघामूलनक्षत्रे वर्जयेत् । चन्द्रे चैकादशादिशुभ-स्थानगते चकारात्पुनक्षत्रशुभयोगलग्नादिसम्पत्तौ सकृदेकस्यां रात्रौ न द्विस्त्रिर्वा । ततो लक्षणैर्युक्तं पुत्रं जनयति । पुमानप्रतिहतपुंस्त्वः॥८०॥

(वी० मि०) ऋतावेव गच्छेदिति नियमं प्रति प्रसूयते—

यथाकामी भवेद्वाऽपि स्त्रीणां वरमनुस्मरन् ॥
स्वदारनिरतश्चैव स्त्रियो रक्ष्या यतः स्मृताः ॥ ८१ ॥

काममनतिक्रम्य यथा(१)कामं तदस्यास्तीति यथाकामी । एवञ्च स्त्रीणामिच्छामनतिक्रमन्ननृतावपि गच्छेदित्यर्थः । वाशब्दो यथाश्रुतनियमव्यवच्छेदे विरोधकारणमात्रे वा, न तु विकल्पे । अत्र हेतुगर्भविशेषणं स्त्रीणामित्यादि । वरमिन्द्रदत्तम् । तथा चेन्द्रं स्त्रियश्च प्रकृत्य तैत्तिरीयके श्रूयते—"ता अब्रुवन् वरं वृणीमहै ऋत्वियाः प्रजां विन्दामहै काममाविजनितोः सम्भवामेति तस्मादृत्वियः स्त्रियः प्रजां विन्दन्ते काममाविजनतोः सम्भवन्ति वरं वृतं ह्यासा"मिति । विजनितोरिति भावे तोसुन् । तेनाऽप्रसवान्मिथुनीभवामेत्यर्थः । वसिष्ठश्च—'विज्ञायते हि । इन्द्रस्त्रिशीर्षाणं त्वाष्ट्रं हत्वा पाप्मगृहीतो महत्तमाऽधर्मसम्बद्धोऽहमित्येवमात्मानममन्यत तं सर्वाणि भूतान्यभ्यक्रोशन् भ्रूणहन् भ्रूणहन्निति । स स्त्रिय उपाधावत्, अस्यै मे ब्रह्म(२)हत्यायै तृतीयं भागं प्रतिगृह्णीतेति। ता अब्रुवन् किंशो भूयादिति । सोऽब्रवीत् वरं वृणीध्वमिति । ता अब्रुवन् ऋतौ प्रजां विन्दामह इति काममाविजनितोः सम्भावमेति' । तथेति' । अनुस्मरन् प्रकृतार्थानुगुणतया विचारयन् स्त्रियोऽपि ह्येतादृश्यो मैथुनार्थिन्यो यद् भ्रूणहत्याभागमपि तदर्थमङ्गीकृतवत्यः, तथा च तदसम्पादयितारं पतिं प्रायेण व्यभिचरेयुरिति विचाराकारः । किं च स्वदारनिरत एव भवेत् । स्वदारेष्वेव नितरां रतो मैथुनी स्यादित्यर्थः । स्वस्य भार्याव्यभिचारित्वे तस्या अपि स्वव्यभिचारस्य प्रायिकत्वादिति भावः । अत्र निशब्देन स्वदारानेव गच्छेदिति नियमप्रतिप्रसवः । तेन क्षेत्रजोत्पादनाय (३)देवर दारगमनमनुजानीते । एवं च मैथुनसंवर्द्धनीययो-

(१) यथाकामं तदस्यास्तीति—इति ख० पुस्तके नास्ति ।
(२) भ्रूण—इति-Bom. S. S. पुस्तके पाठः ।
(३) 'वेदस्वदारमन ' मित्युभयपुस्तकपाठः ।

गरहितत्वादिविशेषणविशिष्टः पर्वाद्यतिरिक्तः ऋतौ भार्यामुपगच्छेदेवेति प्रथमनियमपर्यवसितार्थः। स्त्रिया इच्छाविरहे ऋत्वतिरिक्तसमये न गच्छेदिति द्वितीयनियमपर्यवसितार्थः। क्षेत्रजोत्पादनाप्रवृत्तः स्वदारानेव गच्छेदिति तृतीयनियमार्थः। केचित्तु स्त्रियाः सेच्छत्वेऽनृतावप्यवश्यं गच्छेदिति अनृतुग(१)मने नियमं वर्णयन्ति। परे तु विकल्पार्थवाशब्दात् स्त्रियाः सकामत्वे अनृतावपि गच्छेत्। अन्यथाऽनृतौ न गच्छेदिति व्यवस्थामूरीकुर्वते। युग्मास्वित्यादि तु 'पुत्रकामः पुत्रेष्टिं निर्वपे'(२)दिति वत्पुत्रार्थिनं प्रति विरोध एवेति। इदन्तु स्मर्तव्यं-यदा युग्मायामपि रात्रौ रजस आधिक्यं तदा स्त्र्येव जायते परन्तु पुरुषाकृतिः। तथाऽयुग्मायामपि शुक्राधिक्ये पुमानेव जायते परन्तु स्त्र्याकृतिः।

पुमान् पुंसोऽधिके शुक्रे स्त्री भवत्यधिके स्त्रियः।

इति वचनात्। युग्मानिशादिरूपपुत्रनिमित्तकारणापेक्षया तदुपादानशुक्रशोणितयोः प्राबल्यात्। अत एव शुक्रशोणितयोः साम्ये युग्मास्वयुग्मासु च नपुंसक एव जायते। अत एव च पुत्रार्थिनं प्रति युग्मास्वित्युक्त्वाऽपि क्षामामित्यधिकमुक्तम्। अत एव च पुमानित्युक्तं पुत्रजननौपायिकशुक्राधिक्यबोधकतयैव तस्य सार्थकत्वात्।

न चैवं युग्माद्यनुसरणनैरर्थक्यमाशङ्क्यं,स्त्र्याकृतिपुत्रव्यवच्छेदकत्वात्। अत एवोक्तं 'लक्षण्यं जनये'दिति। एवं च कन्यादानजन्यस्वर्गविशेषाद्यर्थितया कन्योत्पत्तिकामं प्रति अयुग्मासु पुष्टां गच्छेदित्यपि विधिरूह्य इत्यास्तां विस्तरः। यथाकामित्वे स्वदारनिरतत्वे चोभयत्र हेतुमाह स्त्रिय इत्यादि। रक्ष्याः स्मृताः,कर्तव्याश्च सुरक्षिता इति। अत्रैव सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः 'स्त्रियो रक्ष्या विशेषतः' इति मन्वादौ चोक्ताः। वस्तुतस्तु स्वदारनिरतः स्वदारेषु निरतान्तरोऽनृतावपि रतिशीलो भवेदिति प्रतिप्रसवः, तं विशिनष्टि यथाकामीति। तत्र हेतुः स्त्रियो रक्ष्या इति कथित इति तत्त्वम्॥ ८१॥

(मिता०) एवमृतौ नियममुक्त्वा इदानीमनृतौ नियममाह—

यथाकामीति। भार्याया इच्छानतिक्रमेण प्रवृत्तिरस्यास्तीति यथाकामी भवेत्। वाशब्दो नियमान्तरपरिग्रहार्थो न पूर्वनियमनिवृ-

(१) गमने-इति ख० पुस्तके नास्ति। (२) निर्वपेय-इति क० पुस्तके पाठः।

त्यर्थः। स्त्रीणां वरमिन्द्रदत्तमनुस्मरन् 'भवतीनां कामविहन्ता पातकी स्यात्' इति। यथा 'ता अब्रुवन् वरं वृणीम(१)हा ऋत्वियात्प्रजां विन्दामहै काममाविजनितोः संभवामेति तस्मादृत्वियाः स्त्रियः प्रजां विन्दन्ते काममाविजनितोः संभवन्ति (२)वारे वृतꣳह्यासाम्' इति। अपि च स्वदारेष्वेव निरतः नितरां रतस्तन्मनस्को भवेदित्यनुषज्यते। एवकारेण स्त्र्यन्तरगमनं निवर्तयति, प्रायश्चित्तस्मरणात्। उभयत्राऽपि दृष्टप्रयोजनमाह—स्त्रियो रक्ष्या यतः स्मृता इति। यस्मात्स्त्रियो रक्ष्याः स्मृता (३)उक्ताः 'कर्तव्याश्च सुरक्षिताः' इति। तत्र सुरक्षितत्वं यथाकामित्वेन स्त्र्यन्तरागमनेन च भवतीति। अत्राह-तस्मिन्युग्मासु संविशेदिति। किमयं विधिर्नि(४)यमः परिसंख्या वा। उच्यते न तावद्विधिः, प्राप्तार्थत्वात्। नापि परिसंख्या, दोष(५)त्रयसमासक्तेः। अतो नियमं प्रतिपेदिरे न्यायविदः। कः पुनरेषां भेदः? अत्यन्ताऽप्राप्तप्रापणं विधिः। यथा 'अग्निहोत्रं जुहुयात्' 'अष्टकाः कर्तव्याः' इति। पक्षे प्राप्तस्याऽप्राप्तपक्षान्तरप्रापणं नियमः। यथा 'समे देशे यजेत' 'दर्शपूर्णमासाभ्यां यजेत' इति यागः कर्तव्यतया विहितः। स च देशमन्तरेण कर्तुमशक्य इत्यर्थाद्देशः प्राप्तः। स च द्विविधः समो विषमश्चेति। यदा यजमानः समे यियक्षते तदा समे यजेतेति वचनमुदास्ते, स्वार्थस्य प्रा(६)प्तत्वात्। यदा तु विषमे देशे यियक्षते तदा समे यजेतेति स्वार्थं विधत्ते, स्वार्थस्य तदानीमप्राप्तत्वात्। विषमदेशनिवृत्तिस्त्वा(७)र्थिकी। चोदितदेशेनैव यागनिष्पत्तेरचोदितदेशोपादानेन यथाशास्त्रं यागो नाऽनुष्ठितः स्यादिति। तथा 'प्राङ्मुखोऽन्नानि भुञ्जीत' इति। इदमपि स्मार्तमुदाहरणं पूर्वेण व्याख्यातम्। एकस्याऽनेकत्र प्राप्तस्याऽन्यतो निवृत्त्यर्थमेकत्र पुनर्वचनं परिसंख्या। तद्यथा 'इमामगृभ्णन्रशनामृतस्येत्यश्वाभिधानीमादत्ते' इत्ययं मन्त्रः स्वसामर्थ्यादश्वाभिधान्या गर्दभाभिधान्याश्च रशनाया ग्रहणे विनियुक्तः पुनरश्वाभिधानीमादत्त इत्यनेनाऽश्वाभिधान्यां विनियुज्यमानो गर्दभाभिधान्याः निवर्तते। तथा(८)'पञ्च पञ्च-

(१) वृणीमहै ख०। (२) वरं वृतं तासां ख०। (३) उक्ताः पूर्वं ७८ श्लोके०।

(४) विध्यादयश्च-'विधिरत्यन्तमप्राप्तौ नियमः पाक्षिके सति। तत्र चाऽन्यत्र वा प्राप्तौ परिसंख्या निगद्यते' इति। (५) दोषत्रयासक्ते क०। (६) प्राप्तार्थत्वात् क०।

(७) त्वर्थात्सिद्धा क०। (८) यथा-इति मुद्रितपुस्तके पाठः।

नखा भक्ष्याः' इत्यत्र हि यदृच्छया शशादिषु श्वादिषु च भक्षणं प्राप्तं पुनः शशादिषु श्रूयमाणं श्वादिभ्यो नि(१)वर्तत इति । किं पुनरत्र युक्तं परिसंख्येत्याह । तथा हि कृतदारसङ्ग्रहस्य स्वेच्छयैवर्तौ गमनं प्राप्तमिति न विधेरयं विषयः । नाऽपि नियमस्य । गृह्यस्मृतिविरोधात् । एवं हि स्मरन्ति गृह्यकाराः—'दारसङ्ग्रहानन्तरं त्रिरात्रं द्वादशरात्रं संवत्सरं वा ब्रह्मचारी स्यात्' इति । तत्र द्वादशरात्रात्संवत्सराद्वा पूर्वमेवर्तुसंभवे ऋतौ गच्छेदेवेति नियमाद्ब्रह्मचर्यस्मरणं बाध्येत । अपि च प्राप्ते भावार्थे वचनं विशेषणपरं युक्तं, प्राप्तं चर्तौ भार्यागम(२)नमिच्छयैव । अतो यदि गच्छेदृतावेवेति वचनव्यक्तिर्युक्ता । किं च नैयमिकात्पुत्रोत्पत्तिविधेरेव ऋतौ गमनं नित्यप्राप्तमेवेति ऋतौ गच्छेदेवेति नियमोऽनर्थकः स्यात् । नियमे चाऽदृष्टं कल्पनीयम् । किं च ऋतौ गन्तव्यमेवेति नियमे असन्निहितस्य व्याध्यादिना असमर्थस्याऽनिच्छोश्चाऽशक्योऽर्थ उपदिष्टः स्यात् । विध्यनुवादविरोधश्च नियमे । तथा हि एकः शब्दः सकृदुच्चरितस्तमेवार्थं पक्षेऽनुवदति पक्षेऽनुविधत्ते चेति । तस्मदृतावेव गच्छेन्नाऽन्यत्रेति परिसंख्यैव युक्ता । तदिदं(३)भारुचिविश्वरूपादयो नाऽनुमन्यन्ते । अतो नियम एव युक्तः । पक्षे स्वार्थविधिसंभवात्, अगमने दोषश्रवणाच्च । 'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति । घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः' ॥ इति । न च विध्यनुवादविरोधः, अनुवादाभावाद्विध्यर्थत्वाच्च वचनस्य । तत्र हि विध्यनुवादविरोधो यत्र विधेयावधितया तदेवानुवदितव्यं, अप्राप्तत(४)याऽन्योद्देशेन विधातव्यं च । यथा वाजपेयाधिकरणपूर्वपक्षे 'वाजपेयेन स्वाराज्यकामो यजेते'ति वाजपेयलक्षणगुणविधानावधित्वेन यागोऽनुवादितव्यः, स एव स्वराज्यलक्षणफलोद्देशेन विधातव्यश्चेति । न चाऽनुवादेनेह कृत्यमस्ति । यत्तु नियमेऽदृष्टं कल्प्यमित्युक्तं तत्परिसंख्यायामपि समानम्, अनृतौ गच्छतो दोषकल्पनात् । यत्तु नैयमिकपुत्रोत्पादनविध्याक्षेपेणैव ऋतौ नित्यगमनप्राप्तेन नियम इति । त(५)दसत् । स एवाऽयं नैयमिकपुत्रोत्पादनाविधिः । स्यान्मतम् 'एवं ग-

(१) निवर्तयति ख० । (२) भार्येच्छयैव क० । (३) भागुरि क० ।

(४) तया फलोद्देशेन क० । (५) तदसदिति फ० नास्ति ।

च्छन् स्त्रियं क्षामां लक्षण्यं पुत्रं जनयेत्' इति स्त्र्यभिगमनातिरिक्तः पुत्रोत्पादनविधिरिति । तन्न, ग(१)मनकरणिकाया भावनाया एव पुत्रोत्पत्तिकर्मता प्रदृश्यते । एवं गच्छन् लक्षण्यं पुत्रं जनयेदित्यनेन यथाऽग्निहोत्रं जुह्वन् स्वर्गं भावयेदिति । न चाऽसंनिहितादेरशक्यार्थविधिप्रसङ्गः सन्निहितशक्तयोरेवोपदेशात् । 'ऋतुस्नातां तु यो भार्यां सन्निधौ नोपगच्छति' इति । 'यः स्वदारानृतुस्नातान्स्वस्थः सन्नोपगच्छति' इति विशेषोपादानात् । अनिच्छानिवृत्तिस्तु नियमविधानादेव । न च विशेषणपरतापि पक्षे भावार्थविधिसंभवात् । नापि गृह्यस्मृतिविरोधः संवत्सरात्पूर्वमेवर्तुदर्शने संविशतो न ब्रह्मचर्यस्खलनदोषो यथा श्राद्धादिषु । तस्मात्स्वर्थहानि-परार्थकल्पना—प्राप्तबाधलक्षणदोषत्रयवती परिसंख्या न युक्ता । एवं 'पञ्च पञ्चनखा भक्ष्या' इत्यत्र यद्यपि शशादिषु भक्षणस्य पक्षे प्राप्तेर्नियमः शशादिषु, श्वादिषु च प्राप्तेः परिसंख्येत्युभयसंभवस्तथाऽपि नियमपक्षे शशाद्यभक्षणे दोषप्रसङ्गः, श्वादिभक्षणे चाऽदोषप्रसङ्गेन प्रायश्चित्त(२)स्मृतिविरोध इति परिसंख्यैवाऽऽश्रिता । एतेन 'सायंप्रातर्द्विजातीनामशनं स्मृ(३)तिनोदितम्' इत्यत्रापि नियमो व्याख्यातः । 'नान्तरा भोजनं कुर्यात्' इति च पुनरुक्तं स्यात्परिसं(४)ख्यायाम् । एवं च नियमे सति ऋतावृताविति वीप्सा लभ्यते, 'निमित्तावृत्तौ नैमित्तिकमप्यावर्तते' इति न्यायात् । 'यथाकामी भवेदि'त्ययमपि नियम एव । अनृतावपि स्त्रीकामनायां सत्यां स्त्रियमभिरमयेदेवेति । 'ऋतावुपेयात्सर्वत्र वा प्रतिषिद्धवर्जम्' इत्येतदपि गौतमीयं सूत्रद्वयं नियमपरमेव । 'ऋतावुपे(५)यादनृतावपि स्त्रीकामनायां सत्यां प्रतिषिद्धवर्जमुपेयादेवे'त्यलमतिप्रसङ्गेन ॥ ८१ ॥

(वी० मि०) स्वदारनिरतश्चेति चशब्देन समुच्चितं रक्षाप्रकारं च स्पष्टयति—

भर्तृभ्रातृपितृज्ञातिश्वश्रूश्वशुरदेवरैः ॥
बन्धुभिश्च स्त्रियः पूज्या भूषणाच्छादनाशनैः ॥ ८२ ॥

(१) यतस्तद्य गमन० क० । (२) प्रायश्चित्तविरोधः क० । (३) श्रुतिचोदितं क० ।
(४) परिसंख्यायाम् । तस्मान्नियमपरमेवेति ग० । (५) वुपेयादेवानृतावपि क० ।

बन्धुभिः ।

आत्ममातुः स्वसुः पुत्रा आत्मपितृष्वसुः सुताः ।
आत्ममातुलपुत्राश्च विज्ञेया आत्मबान्धवाः ॥

इति परिभाषितैः । पूज्याः सत्कार्याः । अत्र भर्तृभिन्नानां प्रसङ्गेनाऽभिधानम् ॥ ८२ ॥

(मिता०) किं च—

भर्त्रिति । भर्तृप्रभृतिभिः पूर्वोक्ताः साध्व्यः स्त्रियो यथाशक्त्यलङ्कारवसनभोजनपुष्पादिभिः संमाननीयाः । यस्मात्ताः पूजिता धर्मार्थकामान्संवर्धयन्ति ॥ ८२ ॥

(वी० मि०) अथ स्त्रीधर्ममाह पञ्चभिः श्लोकैः—

संयतोपस्करा दक्षा हृष्टा व्ययपराङ्मुखी ॥
कुर्याच्छ्वशुरयोः पादवन्दनं भर्तृतत्परा ॥ ८३ ॥

संयतः स्वस्थाने सम्यक् स्थापित उपस्करो मुसलोलूखलशिलापट्टसंमार्जन्यादिर्यया सा तथा । दक्षा गृहव्यापारकुशला । हृष्टा हसन्मुखत्वादिहर्षव्यञ्जकवती । व्ययपराङ्मुखी असद्व्ययविमुखी । श्वशुरयोः श्वश्रूश्वशुरयोः । पादवन्दनं सति सम्भवे प्रत्यहमिति शेषः । भर्तृतत्परा भर्तृशुश्रूषणादिशीला ॥ ८३ ॥

(मिता०) तया पुनः समर्पितगृहव्यापारया किंभूतया भवितव्यमित्यत आह—

संयतोपस्करेति । संयतः स्वस्थाननिवेशितः उपस्करो गृहोपकरणवर्गो यया सा तथोक्ता । यथोलूखलमुसलशूर्पादेः कण्डनस्थाने, दृषदुपलयोरवियोगेन पेषणस्थान इत्यादि । दक्षा गृहव्यापारकुशला । हृष्टा सदैव प्रहसितानना । व्ययपराङ्मुखी न व्ययशीला । सर्वत्र स्यादिति शेषः । किं च श्वश्रूश्च श्वशुरश्च श्वशुरौ 'श्वशुरः श्वश्र्वा' इत्येकशेषः । तयोः पादवन्दनं नित्यं कुर्यात् । श्वशुरग्रहणं मान्यान्तरोपलक्षणार्थम् । भर्तृतत्परा भर्तृवशवर्तिनी सती पूर्वोक्तं कुर्यात् ॥ ८३ ॥

क्रीडां शरीरसंस्कारं समाजोत्सवदर्शनम् ॥
हास्यं परगृहे यानं त्यजेत् प्रोषितभर्तृका ॥ ८४ ॥

(वी० मि०) क्रीडां कन्दुकाक्षादिभिः । शरीरसंस्कारमुद्वर्तनादिभिः । समाजो जनसमूहः, उत्सवो विवाहादिः, तयोर्दर्शनम् । हास्यं,

विजृम्भणम्, परगृहे यानं च। प्रोषितभर्तृका विदेशस्थपतिका त्यजेदित्यर्थः॥ ८४॥

(मिता०) भर्तृसन्निधावुक्तं, प्रोषिते भर्तरि तया किं कर्तव्यमित्यत आह—

क्रीडामिति। देशान्तरगतभर्तृका क्रीडां कन्दुकादिभिः, शरीरसंस्कारमुद्वर्तनादिभिः, समाजो जनसमूहः उत्सवो विवाहादिः तयोर्दर्शनं, हास्यं विजृम्भणं, परगृहगमनं त्यजेदिति प्रत्येकं सम्बध्यते॥८४॥

रक्षेत्कन्यां पिता वि(१)न्नां पतिः पुत्रा(२)स्तु वार्द्धके॥
अभावे ज्ञातयस्तेषां स्वातन्त्र्यं न क्वचित्स्त्रियाः॥ ८५॥

(वी० मि०) स्त्रिया इति कर्तव्यमित्यध्याहृतम्। कृद्योगात् षष्ठी। तेन कस्यामप्यवस्थायां स्त्रियाः स्वातन्त्र्यमपारवश्यं न विधेयमित्यर्थः। न चाऽऽवश्यकयोगक्षेमार्थं स्वातन्त्र्यमन्यथोपपत्तेरित्याह। यतः कन्यामनूढां पिता रक्षेत् बिभृयात् लोकवेदविरुद्धा(३)द्धर्षयेच्च। विन्नां विवाहितां पती रक्षेदिति। सर्वत्राऽन्वययोग्यविभक्तिसाचिव्येनाऽनुषज्यते। वार्द्धके तु रक्षणसमर्थस्य पत्युरभावे पुत्रभावे पुत्राः। एवं रक्षणसमर्थानां पित्रादिपुत्रान्तानामसत्त्वे तदतिरिक्ताः सपिण्डा रक्षेयुरेव स्वदोषपरिहारार्थम्। बहुवचनमिदमाद्यर्थे वेद, तेन पितृपक्षादिपरिग्रहः। तथा च नारदः—

तत्सपिण्डेष्वरक्षत्सु पितृपक्षः प्रभुः स्त्रियाः।
पक्षद्वयाऽवसाने तु राजा भर्ता प्रभुः स्त्रियाः॥
स तस्या भरणं कुर्यान्निगृह्णीयात् पथश्च्युताम्।

एषामित्यत्र क्वचित्तेषामिति पाठः। स निरुक्तार्थक एव। तासामिति पाठे तासां स्त्रीणां स्वातन्त्र्यमिति पर्यवसितार्थः। अन्ये तु पित्रादीन्प्रति पृथगेवैते विधेयाः, तानुपजीव्य 'स्वातन्त्र्यं न क्वचित् स्त्रिया' इत्युक्तमित्याहुः॥ ८५॥

(मिता०) किं च—

रक्षेदिति। पाणिग्रहणात्प्राक् पिता कन्यामकार्यकरणाद्रक्षेत्। तत ऊर्ध्वं भर्ता। तदभावे पुत्राः वृद्धभावे च। तेषामुक्तानामभावे ज्ञातयः। ज्ञातीनामभावे राजा। 'पक्षद्वयावसाने तु राजा भर्ता प्र(४)-

(१) परिणीताम्। (२) पुत्राश्च-इति मुद्रितपुस्तके पाठः।
(३) द्धर्षयेच्च-इति ख० पु० पाठः। (४) पतिः स्त्रियाः क०।

भुः स्त्रियाः' इति वचनात् । अतः क्वचिदपि स्त्रीणां नैव स्वातन्त्र्यम् ॥ ८५ ॥

पितृमातृसुतभ्रातृश्वश्रूश्वशुरमातुलैः ॥
हीना न स्याद्विना भर्त्रा गर्हणीयाऽन्यथा भवेत् ॥ ८६ ॥

(वी० मि०) भर्त्रा विना पतिवियुक्ता स्त्री पित्रादीनामन्यतमेन हीना विरहिता तदनादृता न तिष्ठेत्। अन्यथा तादृशी तिष्ठन्ती शिष्टानां निन्द्या भवेदित्यर्थः । अत्र पत्युर्वियोगो द्वे(१)धा, तस्य देशान्तरे वा लोकान्तरे प्राप्तेः। त(२)त्र प्रथमे तदागमनं यावत् । द्वितीयेऽपि ब्रह्मच(३)र्यपक्षे यावज्जीवं तदाश्रितैव तिष्ठेदिति विशेषणाभावनिबन्धन एव विशिष्टाभावः । पत्यन्वारोहणपक्षे तु विशेष्याभावनिबन्धनः । तथा च विष्णुः-'भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वा' । अत्र च-

ब्रह्मलोकमवाप्नोति न चेहाजायते पुनः ।

इत्यादि ब्रह्मचारिप्रकरणोक्तब्रह्मचर्यफलकामायाः । ब्रह्मचर्यान्तरकामायास्तु गर्भिणीबालापत्याद्यतिरिक्तायाः पत्यन्वारोहणमिति व्यवस्था । तथा च शङ्खलिखितौ—

तिस्रः कोट्योऽर्द्धकोटी च यानि लोमानि मानवे ।
तावत्काले वसेत्स्वर्गे भर्तारं याऽनुगच्छति ॥

तथा --

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः ।
पुनात्यविधवा नारी तमादाय मृता तु या ॥
मृते भर्तरि या नारी समारोहेत् हुताशनम् ।
साऽरुन्धतीसमाचारा स्वर्गलोके महीयते ॥
यावच्चाऽग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत् ।
तावन्न मुच्यते सा हि स्त्रीशरीरात् कथञ्चन ॥

हारीतोऽपि —

मातृकं पैतृकं चाऽपि यत्र चैव प्रदीयते ।
पुनाति त्रिकुलं नारी भर्तारं याऽनुगच्छति ॥

ब्रह्मपुराणे—

देशान्तरमृते पत्यौ साध्वी तत्पादुकाद्वयम् ।

---

(१) द्विधा-इति ख० पुस्तके पाठः । (२) अथ-इति ख० पुस्तके पाठः ।
(३) ब्रह्मचर्यपेक्षया-इति ख० पुस्तके पाठः ।

निधायोरसि संशुद्धा प्रविशेज्जातवेदसम् ॥
ऋग्वेदवादा साध्वी स्त्री न भवेदात्मघातिनी।

व्यासः—

दयितं याऽन्यदेशस्थं मृतं (१)श्रुत्वा पतिव्रता।
समारोहेत दीप्तेऽग्नौ तस्याः शक्तिं निबोधत ॥
यदि प्रविष्टो नरकं बद्धः पाशैः सुदारुणैः।
सम्प्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः ॥
तिष्ठते विवशो दीनो वेष्ट्यमानः स्वकर्मभिः।
व्यालग्राही यथा व्यालं बिलादुद्धरते बलात् ॥
तद्वद्भर्तारमादाय तेनैव सह मोदते।
तत्र सा भर्तृपरमा स्तूयमानाऽप्सरोगणैः।
क्रीडते पतिना सार्द्धं यावदिन्द्राश्चतुर्दश ॥

इत्याद्यलं विस्तरेणेति।

परे पुनर्मृते पत्यौ ब्राह्मण्या ब्रह्मचर्य्यं क्षत्रियादिभिस्त्वन्वारोहणं कार्यमिति व्यवस्था। तथा च पैठीनसिः—

मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्।
इतरेषां तु वर्णानां स्त्रीधर्मोऽयं परः स्मृतः ॥

अङ्गिराः—

या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत्।
सा स्वर्गमात्मघातेन नाऽऽत्मानं न पतिं नयेत् ॥

इत्याहुः, तच्चिन्त्यं लिखितवचनादीनां पृथगिति निषेधमात्रपरत्वात्। अत एव तमादायेति पूर्वलिखितवचने ब्राह्मण्या नियमः। तथा चोशनाः—

पृथक् चितिं समारुह्य न विप्रा गन्तुमर्हति।
अन्यासां चैव नारीणामयं धर्मः परः स्मृतः ॥

अत एव कल्पकाराः-प्रेतस्योत्तरतः पत्नीसंवेशनमविशेषेणैवाऽभिदधति। अत एव च रामायणादौ ब्राह्मणीनां भर्तृशरीरालिङ्गनपूर्वकं स्वशरीरदहनमुपाख्यायते। तदनु 'तस्मादुह न वपुरायुषः स्वःकामी प्रेया'दिति श्रुतिः सर्वाः स्मृतीरनुगमनबोधिकाः सुदूरमुत्सारयतीति कथमेवमिति चेत्-उच्यते। स्वःकामी स्वर्गरूप(२)फलकामः।

(१) वृत्तं-इति क० पुस्तके पाठः। (२) स्वर्गकामः-इति ख० पु० पाठः।

आयुषः पुरा सत्यायुषि स्वेच्छयेति यावत् । प्रेयात् प्राणांस्त्यजेदिति हि श्रुतेरर्थः । एवं च 'न हिंस्यात्सर्वा भूतानी'ति श्रुतेः सामान्यमुखी 'वायव्यं श्वेतमालभेत' इत्यादिश्रौतस्मार्तविशेषविधिविषयीभूतां हिंसामिव प्रकृतश्रुतेरपि तादृशी मृतं पतिं भार्याऽनुगच्छेदिति विशेषविहितातिरिक्तं प्रयाणमवलम्बत इत्यविरोधान्न स्मृतिबाध इति निःपुणमालोचनीयम् । इतरे तु पतिव्रतायाः पत्य(१)नुमरणमन्यस्यास्तु ब्रह्मचर्यमिति व्यवस्था । पत्यनुमरणपर्यन्तत्वात्पातिव्रत्यस्य च । हारीतः—

आर्तार्ते मुदिता तुष्टे प्रोषिते विमना तु या ।
मृते या म्रियते पत्यौ सा विज्ञेया पतिव्रता ॥

यद्वा गर्भिण्यादीनामनुमरणनिषेधोऽन्यासां तद्विधिरित्याहुः, तन्न मनोरमं, सकलदेशीयशिष्टाचारविरोधात् । ये तु—

यावन्नाऽग्नौ दहेद्देहं मृते पत्यौ पतिव्रता ।
तावन्न मुच्यते नारी स्त्रीशरीरात् कथञ्चन ॥

इत्येवमङ्गिरोवचनं पठित्वा तत्प्रमाणयन्तः शिष्टाचारं विप्लावयन्ति, ते प्रकृतवचनाऽव्यवहितपूर्वं स्वयमेव लिखितं,—

सर्वासामेव नारीणामग्निप्रपतनादृते ।
नाऽन्यो धर्मो हि विज्ञेयो मृते भर्तरि कर्हिचित् ॥

इति अङ्गिरोवचनं द्रागेव विस्मृतवन्तः । 'सर्वासामेव नारीणा'मित्युपक्रमस्य बलवत्वा'च्छेदो वे'ति न्यायात् । तस्मात् गर्भिण्यादीनाममहापातकिनीनामा ब्राह्मणीमा च चाण्डालीं पत्यनुमरणेऽधिकारो व्यवस्था ब्रह्मचर्येण समं प्रागेव तस्य दर्शितेति सर्वं चतुरस्रम् ॥ ८६ ॥

(मिता०) किञ्च—

पित्रित्यादि । भर्त्रा विना भर्तृरहिता पित्रादिरहिता वा न स्यात् । यस्मात्तद्र(२)हिता गर्हणीया निन्द्या भवेत् । एतच्च ब्रह्मचर्यपक्षे—'भर्तरि प्रेते ब्रह्मचर्यं तदन्वारोहणं वा' इति विष्णुस्मरणात् । अन्वारोहणे महानभ्युदयः । तथा च व्यासः कपोतिकाख्यानव्याजेन दर्शितवान्—'पतिव्रता संप्रदीप्तं प्रविवेश हुताशनम् । तत्र चित्राङ्गदधरं भर्तारं सान्वपद्यत ॥ ततः स्वर्गं गतः पक्षी भार्यया सह

(१) 'पत्यनु'—इत्यारभ्य 'व्यवस्था'—इत्यंशो नास्ति ख० पुस्तके ।

(२) तद्रहिता पित्रादिरहिता क० ।

सङ्गतः। कर्मणा पूजित(१)स्तत्र रेमे च सह भार्यया' ॥ इति। तथा च शङ्खाङ्गिरसौ—'तिस्रः कोट्योऽर्धकोटी च यानि(२)लोमानि मानुषे। तावत्कालं वसेत्स्वर्गे भर्तारं यानुगच्छति' ॥ इति प्रतिपाद्य तयोरवियोगं दर्शयतः—'व्यालग्राही यथा सर्पं बलादुद्धरते बिलात्। तद्वदुद्धृत्य सा नारी सह तेनैव मोदते ॥ तत्र सा भर्तृपरमा स्तूयमानाप्सरोगणैः। क्रीडते पतिना सार्धं यावदिन्द्राश्चतुर्दश' ॥ इति। तथा—'ब्रह्मघ्नो वा (३)कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः। पुनात्यविधवा नारी तमादाय मृता तु या ॥ मृते भर्तरि या नारी समारोहेद्धुताशनम्। सारुन्धतीसमाचारा स्वर्गलोके महीयते ॥ यावच्चाग्नौ मृते पत्यौ स्त्री नात्मानं प्रदाहयेत्। तावन्न मुच्यते सा हि स्त्रीशरीरात्कथञ्चन' ॥ इति। हारीतोपि—'मातृकं पैतृकं चापि यत्र चैव प्रदीयते। कुलत्रयं पुनात्येषा भर्तारं यानुगच्छति' ॥ इति। तथा—'आर्तार्ते मुदिते हृष्टा प्रोषिते मलिना कृशा। मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता' ॥ इति। (४)अयं च सकल एव सर्वासां स्त्रीणामगर्भिणीनामबालापत्यानामाचण्डा(५)लं साधारणो धर्मः। भर्तारं यानुगच्छतीत्यविशेषोपादानात्। यानि च ब्राह्मण्यनुगमननिषेधपराणि वाक्यानि—'मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्। इतरेषु तु वर्णेषु तपः परममुच्यते ॥ जीवन्ती तद्धितं कुर्यान्मरणादात्मघातिनी। या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत् ॥ सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्' ॥ इत्येवमादीनि तानि पृथक्चि(६)त्यधिरोहणविषयाणि। 'पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति' इति विशे(७)षस्मरणात्। अनेन क्षत्रियादिस्त्रीणां पृथक्चित्यभ्यनुज्ञा गम्यते। यत्तु कैश्चिदुक्तं पुरुषाणामिव स्त्रीणामप्यात्महननस्य प्रतिषिद्धत्वादतिप्रवृद्धस्वर्गाभिलाषायाः प्रतिषेधशास्त्रमतिक्रामन्त्या अयमनुगमनोपदेशः श्येनवत्। यथा 'श्येनेनाभिचरन्यजेत' इति तीव्रक्रोधाक्रान्तस्वान्तस्य प्रतिषे(८)धशास्त्रमतिक्रामतः श्येनोपदेश इति तदयुक्तम्। ये तावत् श्येनकरणिकायां भावनायां भाव्यभूतहिंसायां

(१) पूजितस्तेन।

(२) रोमाणि। (३) वाथ मित्रघ्नः कृतघ्नो वा ख; ब्रह्मघ्नो वा सुरापो वा ग०।

(४) अयं सर्वासा ख०। (५) माचाण्डालानां ख०।

(६) चित्यन्वारोहण। (७) विशेषोपादानात् क०। (८) प्रतिषिद्धशास्त्र ग०।

विधिसंस्पर्शाभावेन प्रतिषेधसंस्पर्शात्फलद्वारेण श्येनस्यानर्थतां व-र्णयन्ति तेषां मते हिंसाया एव स्वर्गार्थतया अनुगमनशास्त्रेण विधी-यमानत्वात्प्रतिषेधसंस्पर्शाभावादग्नीषोमीयवत्स्पष्टमेवानुऽगमनस्यश्ये-नवैषम्यम् । यत्तु मतं हिंसानाम मरणानुकूलो व्यापारः, श्येनश्च पर-मरणानुकूलव्यापाररूपत्वाद्धिंसैव, कामाधिकारे च करणांशे रागतः प्रवृत्तिसम्भवेन विधेरप्रवर्तकत्वात् । रागप्रयुक्तहिंसारूपत्वात् श्ये-नः प्रतिषिद्धः स्वरूपेणैवाऽनर्थकर इति, तत्राप्यनुगमनशास्त्रेण मरण-स्यैव स्वर्गसाधनतया विधानान्मरणे यद्यपि रागतः प्रवृत्तिस्तथा-पि मरणानुकूले व्यापारेऽग्निप्रवेशादावितिक(१)र्तव्यतारूपे विधित एव प्रवृत्तिरिति न निषेधस्यावकाशः, 'वायव्यं श्वेतमालभेत भूति-कामः' इतिवत् । तस्मात्स्पष्टमेवानुगमनस्य श्येनवैषम्यम् । यत्तु 'त-स्मादुह न पुरायुषः (२)स्वःकामी प्रेयात्' इति श्रुतिविरोधादनुगम-नमयुक्तमिति । यश्च 'तदुह न स्वःकाम्यायुषः प्राङ् न प्रे(३)यात्' इति स्वर्गफलोद्देशेनायुषः प्रागायुर्व्ययो न कर्तव्यो मोक्षार्थिना, यस्मादा-युषः शेषे सति नित्यनैमित्तिककर्मानुष्ठानक्ष(४)पितान्तःकरणकलङ्क-स्य श्रवणमनननिदिध्यासनसंपत्तौ सत्यामात्मज्ञानेन निरतिशया-नन्दब्रह्मप्राप्तिलक्षणमोक्षसम्भवः । तस्मादनित्याल्पसुखरूपस्वर्गार्थमा-युर्व्ययो न कर्तव्य इत्यर्थः । अतश्च मोक्षमनिच्छन्त्या अनित्याल्पसु-खरूपस्वर्गार्थिन्या अनुगमनं युक्तमितरकाम्यानुष्ठानवदिति सर्वम-नवद्यम् ॥ ८६ ॥

(वि० मि०)

पतिप्रियहिते युक्ता स्वाचारा संयतेन्द्रिया ॥
इह कीर्तिमवाप्नोति प्रेत्य चाऽनुत्तमां गतिम् ॥ ८७ ॥

प्रियं तत्कालं मनोहरं, हितमुदर्कशुद्धम्, अनयोर्द्वन्द्व इत्येके। वस्तुत-स्तु कर्मधारयः। युक्ता उद्युक्ता। सुष्ठुः आचारो यस्याः सा स्वाचारा । सौष्ठवं चाहतुः शङ्खलिखितौ-'नाऽन्तराद्बहिर्निःक्रामेन्नाऽनुत्तरीया प-रिधावेन्नाऽनुत्सवे गन्धमाल्याभरणानि विकृतानि वासांसि बिभृया-न्न परपुरुषमभिलाषेताऽन्यत्र वणिक्प्रव्रजितवृद्धेभ्यो न नाभिं दर्श-

(१) कर्तव्यतानुरूपं ख० ।
(२) स्वर्गकामः । (३) प्रेयादिति ख० । (४) क्षालितान्तःकरण ख० ।

येत् वधूरागुल्फाभ्यां वासः परिधापयेन्न स्तनौ विवृतौ कुर्यान्न हसेद-पावृतं न भर्तारं तद्बन्धून्वा द्विष्यात् न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायाकुहककारिणीभिः सहैकत्र तिष्ठेत् संसर्गेण किल स्त्रीणां चरित्रं दुष्यती'ति । संयतेन्द्रिया वशीकृतश्रोत्रवाङ्मनःप्रभृतीन्द्रिया । इह लोके । प्रेत्य प्राणापगमानन्तरम् । अनुत्तमां उत्कर्षा(१)प्रतियोगिनीं स्वर्गमोक्षादिकाम् । अयं च सकल एव स्त्रीधर्मो विवाहानन्तरं वोध्यः । भर्तृपदादिसमभिव्याहारेण तथैवागतेः । पातिव्रत्यफलं त्वाह मनुः—

दानात्प्रभृति या तु स्याद्यावदायुः पतिव्रता ।
सा भर्तुर्लोकमाप्नोति यथैवाऽरुन्धती तथा ॥ -॥ ८७ ॥

(मिता०) किञ्च—

पतीत्यादि । प्रियमनवद्यत्वेन मनसोऽनुकूलम् , आयत्यां यच्छ्रेयस्करं तद्धितम् । प्रियं च तद्धितं च प्रियहितं पत्युः प्रियहितं पतिप्रियहितं तस्मिन् युक्ता निरता । स्वाचारा शोभन आचारो यस्याः सा तथोक्ता । शोभनश्चाऽऽचारो दर्शितः शङ्खेन–'नानुक्ता गृहान्निर्गच्छेन्नानुत्तरीया न त्वरितं व्रजेन्न परपुरुषमभिभाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यो न नाभिं दर्शयेदागुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्यान्न हसेदप्रावृता भर्तारं तद्बन्धून्वा न द्विष्यान्न गणिकाधूर्ताभिसारिणीप्रव्रजिताप्रेक्षणिकामायामूलकुहककारिकादुःशीलादिभिः सहैकत्र तिष्ठेत्संसर्गेण हि कुलस्त्रीणां चा(२)रित्रं दुष्यति' इति । विजितेन्द्रिया विजितानि संयमितानि इन्द्रियाणि श्रोत्रादीनि वागादीनि च मनःसहितानि यया सा(३) । इह लोके कीर्तिं प्रख्यातिं परलोके चोत्तमां गतिं प्राप्नोति । अयं च सकल एव स्त्रीधर्मो विवाहादूर्ध्वं वेदितव्यः । 'प्रागुपनयनात्कामचारकामवादकामभक्षाः' इति स्मरणात् । 'वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृतः' इति च ॥ ८७ ॥

(वी० मि०) अनेकभार्यं प्रत्याह—

सत्यामन्यां सवर्णायां धर्मकार्यं न कारयेत् ॥
सवर्णासु विधौ धर्म्ये ज्येष्ठया न विनेतरा ॥ ८८ ॥

---

(१) उत्कर्षकप्रतियोगिनीं—इति क० पुस्तके पाठः ।
(२) हि चरित्रं क० । (३) सा तथोक्ता इह क० ।

सवर्णायां भार्यायामसत्यामसवर्णभार्यासाहित्येन धर्माचरणम-भ्यनुजानाति । शूद्रासाहित्येन तु तत्सर्वथैव निषिद्धम् । तथा च वसिष्ठः—'नष्टवर्णा वामा रमणायैव न धर्माय' इति । नष्टवर्णा शूद्रा न धर्माय द्विजानाम् । सवर्णास्विति बहुवचनमनेकत्वमात्रपरम्, तेन सवर्णानेकभार्यामध्ये ज्येष्ठया प्रथमोढया विनाऽन्यां न धर्मार्थके विधौ कारयेदित्यनुपपद्यते व्यापारयेदिति तदर्थः । ज्ये (१)ष्ठान्यासाहित्येन धर्मं नाचरेदिति तदर्थः । ज्येष्ठान्यासाहित्येन धर्मकर्म नाचरेदिति फलितार्थः ।

अग्निहोत्रादियज्ञेषु द्वितीयां न सहाचरेत् ।
अन्यथा विफलं तस्य स्विष्टैः क्रतुशतैरपि ॥

इति विष्णुवचनात् । अथवा ज्येष्ठया विना तद्साहचर्येणेत्यर्थः । तेन ज्येष्ठासाहचर्येणाऽन्यस्या अप्यधिकारो लभ्यते । अत एव कात्यायनः—

नैकयापि विना कुर्यादाधानं भार्यया बुधः ।
अकृतं (२) तद्विजानीयात् सर्वा नान्वारभन्ति यत् ॥

एवं च विष्णुवचने द्वितीयामसवर्णामित्यर्थः । वस्तुतो ज्येष्ठा-मात्रेणाऽनतिक्लेशानिर्वाहे धर्मकर्मण्यन्यस्या व्युदासोऽन्यत्राऽभ्यनु-ज्ञानम् । अत एव छन्दोगपरिशिष्टे कात्यायनः—

अग्निशिष्टादिकार्याणि बहुभार्यः सवर्णया ।
कारयेत्तदसत्त्वे तु ज्येष्ठया गर्हिता न चेत् ॥
या च स्याद्वीरसूरासामाज्ञासम्पादिता च या ।
दक्षा प्रियंवदा शुद्धा तामत्र विनियोजयेत् ॥
दिनक्रमेण वा कर्म यथाज्येष्ठमशक्तितः ।
विभज्य सह वा कुर्युर्यथाज्ञानमसाध्यतः ॥

गर्हिता धर्माचरणसाहित्यविरोधिनिमित्तवती पत्नी ।

धर्मपत्नी समाख्याता निर्दोषा यदि सा (३)भवेत् ।
दोषे सति न दोषः स्यादन्या कार्या गुणान्विता ॥

इति दक्षवचनेऽपि निर्दोषाशब्दस्याऽप्ययमेवार्थः । द्वितीयादि-भार्याश्रयेऽ(४)न्वाधानादिकर्मविशेष एवेत्यप्याहुः ॥ ८८ ॥

(१) 'ज्येष्ठा'-इत्यारभ्य 'तदर्थः'-इत्यन्तं ख० पुस्तके नास्ति ।
(२) 'अकृतं'-इत्यारभ्य 'इत्यर्थः' इत्यंशः ख० पुस्तके नास्ति ।
(३) या-इति क० पुस्तके पाठः । (४) अन्या धानादि इति पु० पा० ।

(मिता०) अनेकभार्यं प्रत्याह—

सत्यामिति । सवर्णायां सत्यामन्यामसवर्णां नैव धर्मकार्यं कारयेत् । सवर्णास्वपि बह्वीषु धर्म्यै विधौ धर्मानुष्ठाने विना ज्येष्ठां मुक्त्वा इतरा मध्यमा कनिष्ठा वा न नियोक्तव्या ॥ ८८ ॥

(वी० मि०) प्रमीतपतिकाया धर्मः प्रागुक्तः, इदानीं प्रमीतभार्यस्य तमाह—

दाहयित्वाऽग्निहोत्रेण स्त्रियं वृत्तवतीं पतिः ॥
आहरेद्विधिवद्दारानग्नींश्चैवाऽविलम्बयन् ॥ ८९ ॥

वृत्तवतीं सदाचारसम्पन्नां भार्यामर्थान्मृतामग्निहोत्रेण श्रौतेन तदभावे स्मार्तेनाऽग्निना दाहयित्वा पुत्रादिना । अन्यथा तु स्वयमेव दग्ध्वा पतिः स्त्र्यन्तरपरिणयनिमित्तवान् दारान् सति सम्भवे सवर्णानेवाऽन्यथा शूद्रावर्ज्जमसवर्णानपि । यदाह विष्णुः—

मृतायामपि भार्यायां वैदिकाग्निं न हि त्यजेत् ।
उपाधिनाऽपि तत्कार्य्यं यावज्जीवं समापयेत् ॥

उपाधिनाऽसवर्णभार्यादिनेति निबन्धव्याख्यानात् । अग्नीन् श्रौतान् स्मार्तांश्च पुनरन्या आहरेदुपादद्यात् । अविलम्बयन्निति स्वार्थे णिच् बिलम्बमकुर्वाणः । बिलम्बे दारादिसाध्यधर्मशैथिल्यप्रसङ्गात्स्वेच्छामात्रेणाविलम्बेऽनाश्रमित्वापत्तेर्वा । तच्च विरुद्धम्—

अनाश्रमी न तिष्ठे(१)त क्षणमात्रमपि द्विजः ।

इति दक्षात् । ईदृशश्च दाहो यया सहजोऽग्निराहितो ज्येष्ठया कनिष्ठया वा तस्या एव भार्यायास्तेनैवाऽग्निना । एवं च—

द्वितायां चैव यो भार्यां दहेद्वैतानिकाग्निभिः ।
जीवन्त्यां प्रथमायां तु सुरापानसमं हि तत् ॥

तथा—

मृतायां वै द्वितीयायां योऽग्निहोत्रं समुत्सजेत् ।
ब्रह्मोज्झितं विजानीया(२)द्यस्तु कामात् समुत्सृजेत् ॥

तथा—

यो दहेदग्निहोत्रेण स्वेन भार्यां कथञ्चन ।
स स्त्री सम्पद्यते तेन भार्या चाऽस्य पुमान् भवेत् ॥

---

(१) तिष्ठेच्च दिन०-इति क० पुस्तके पाठः ।

(२) 'यस्तु'-इत्यारभ्य 'सम्पद्यते'—इत्यन्तो ग्रन्थः क० पुस्तके नास्ति ।

इत्यादिवचनानि, तदग्न्याधानसाहित्याप्रतियोगिन्यास्तेनाऽग्निना दाहे योजनीयानीति ॥ ८९ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने विवाहप्रकरणम् ॥

(मिता०) प्रमीत(१)पतिकाया विधिमुक्त्वा इदानीं प्रमी(२)तभार्यं प्रत्याह—

दाहयित्वेति । पूर्वोक्तवृत्तवतीं आचारवतीं वि(३)पन्नां स्त्रियमग्निहोत्रेण श्रौतेनाऽग्निना तदभावे स्मार्तेन दाहयित्वा पतिः भर्ता अनुत्पादितपुत्रोऽनिष्टयज्ञो वा आश्रमान्तरेष्वनधिकृतो वा स्त्र्यन्तराभावे पुनर्दारान् अग्नींश्च विधिवदाहरेत् । अविलम्बयन् शीघ्रमेव । 'अनाश्रमी न तिष्ठेत दिनमेकपि द्विजः' इति दक्षस्मरणात् । एतच्चाऽऽधानेन सहाऽधिकृताया एव नाऽन्यस्याः । यत्तु—'द्वितीयां चैव यो भार्यां दहेद्वैतानिकाग्निभिः । जीवन्त्यां प्रथमायां हि सुरापानसमं हि तत्' ॥ इति । तथा—'मृतायां तु द्वितीयायां योऽग्निहोत्रं समुत्सृजेत् । ब्रह्मघ्नं तं विजानीयाद्यश्च कामात्समुत्सृजेत्' ॥ इत्येवमादि, तदाधानेन सहाऽनधिकृताया अग्निदाने वेदितव्यम् ॥ ८९ ॥

इति विवाहप्रकरणम् ।

(वी० मि०) इह वर्णाश्रमधर्मेतरधर्मेषु वक्तव्येषु (४)प्रथमं ब्रह्मचर्यमुक्त्वा ब्राह्मणादीनां क्रमेण चतुर्षु वर्णेषु त्रिषु द्वयोरेकस्मिन् विवाहः पुत्रोत्पादनं चोक्तं, तत्र किंजातीयात् किंजातीयायां किंजातीयो जायत इति शिष्याकाङ्क्षां पूरयन्नेव वर्णानामितरशब्दोपात्तानां सङ्कीर्णानां च सवर्णासवर्णस्त्रीपूत्पत्तिमूलकत्वेन तत्प्रसङ्गात् तद्धर्माणां सुबोधाय शुद्धान् वर्णान् सङ्कीर्णांश्च विविनक्ति सार्द्धैः पञ्चभिः श्लोकैः—

सवर्णेभ्यः सवर्णासु जायन्ते हि सजातयः ॥
अनिन्द्येषु विवाहेषु पुत्राः सन्तानवर्द्धनाः ॥ ९० ॥

वर्णस्तावत द्विविधः शुद्धः सङ्कीर्णश्च । तत्र शुद्धो ब्राह्मणादिश्चतुर्विधः पूर्वं विभज्योद्दिष्टः । सङ्कीर्णश्च (५)द्विविधः-मुख्यगौणभेदात् ।

(१) विधवायाः । (२) विधुरं प्रति । (३) मृतां ।
(४) वक्तव्येषु—इति क० पुस्तके नास्ति । (५) च-इति क० पुस्तके नास्ति ।

भिन्नवर्णाभ्यां मातापितृभ्यां साक्षात्परम्परया चोत्पादितो मुख्यः। परम्परासाधारण्योत्पादनोपादानान्न सङ्करजसङ्कराव्याप्तिः। सोऽपि द्विविधोऽनुलोमजप्रातिलोमजभेदात्। उत्कृष्टवर्णादपकृष्टवर्णायां जातोऽनुलोमजः। वैपरीत्ये (१)प्रतिलोमजः। गौणस्तु व्रात्यादिः शुद्धवर्णमुख्यसङ्कीर्णभिन्नः सर्वोऽपि। यदाह मनुः—

व्यभिचारेण वर्णानामवेद्यावेदनेन च।
स्वकर्मणां च त्यागेन जायते वर्णसङ्करः॥

वर्णानां व्यभिचारोऽसवर्णमैथुनम्। अवेद्या अविवाह्याः सपिण्डादिः। स्वकर्मणामुपनयनादीनाम्। चकारेण शुद्धवर्णताविरोधिनिमित्तान्तरपरिग्रहः। तेन सवर्णयोरपि दाम्पत्यानापन्नयोर्मैथुनसम्भवाः कुण्डगोलकानीनसहोढपौनर्भवादयः सङ्कीर्णेष्वेव प्रविशन्ति। अत एव श्रीमहाभारते—

स्त्रीषु दुष्टासु वार्ष्णेय! जायते वर्णसङ्करः।

इति। दुष्टास्विति सामान्येनैवोक्तम्। तत्र प्रथमतः शुद्धवर्णान् कारणप्रदर्शनमुखेन परिवाचयति। सवर्णेभ्योऽर्थात् भार्यायाः। सवर्णास्वर्थात् पत्युः। ये जायन्ते ते सजातयो जनकजातीयाः। एवमग्रेऽपि यत्तद्भ्यामध्याहृताभ्यामुद्देश्यविधेयभावेनाऽन्वयो बोद्धव्यः। जायन्त इति समान्योक्तेरपत्यमात्रं विवक्षितम्। एवमग्रेऽपि। एवं च ब्राह्मणात् ब्राह्मण्यां जातो ब्राह्मणः। एवं क्षत्रियादिष्वपि द्रष्टव्यम्। अत्रैकेनैव सवर्णपदेन विवक्षितार्थलाभे द्वितीयसवर्णपदं स्पष्टार्थम्। अव्यभिचारबोधनार्थं तदित्यन्ये। अत्र मनुः—

ब्राह्मणादिषु तुल्यासु पत्नीष्वक्षतयोनिषु।
आनु(२)लोम्येन सम्भूता जात्या ज्ञेयास्त एव ते॥

तुल्यासु परिणेतृसवर्णासु पत्नीषु यथाविधि परिणीतासु अक्षतयोनिषु परेणाऽसम्भुक्तासु। अत्र सम्भोगः सम्भूतानां सम्भवहेतुर्द्रष्टव्यः। तेन व्यभिचारितास्वपि पत्युर्जातो जनकसवर्ण एव। अन्यथा व्यभिचारिण्यां कृतप्रायश्चित्तायामुत्पन्नस्य जनकजातीयत्वं सर्वशिष्टानुमतं विरुध्येत। अत एव—

शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः।

(१) वैपरीत्ये प्रतिलोमजः—इति ख० पुस्तके नास्ति।

(२) 'आनुलोम्येन'—इत्यतः 'अक्षतयोनिषु'—इत्यन्तं क० पुस्तके नास्ति।

इति मनावपध्वंसजत्वमेव सङ्करधर्मनिमित्तत्वेनोक्तम्, अपध्वंसशब्दस्य व्यभिचारार्थत्वात्। सर्वथैव त्या(१)ज्यताप्रयोजकदोषविशिष्टायां जातस्य तु न तथात्वं शिष्टविगानादित्येषा दिक्।

एवञ्च मूर्धाभिषिक्तादिभ्योऽपि मूर्द्धाभिषिक्तादिस्त्रीषु जाता मूर्द्धाभिषिक्तादय एव। सूतादिभ्यः सूत्यादिषु सूता एव। व्रात्यादिभ्यो व्रात्यादिषु व्रात्या एव भवन्ति। 'यो यादृशाज्जातः स तादृश एव भवती'ति न्यायात्। अयन्तु विशेषः शास्त्रानुमतेषु सजातीयेषु नेत्यपि सूचितमिति मन्तव्यम्। आनुलोम्येन वयसस्तेन वरापेक्षयाऽल्पवयसि स्त्रियामुत्पन्ना इत्यर्थः। 'गृहस्थोऽवरवयसं भार्यां विन्देत्' इत्यादिवचनबलेन वयोऽधिकाया अवेद्यत्वात्तस्यामुत्पादितस्य सङ्कीर्णप्रवेशात् 'अवेद्यावेदनेन च' इति लिखितवचनादित्याशयः। अन्ये त्वानुलोम्यग्रहणं व्युत्क्रमविवाहितासूत्पन्नानां व्यवच्छेदादाहुः। अत्र पत्नीष्वित्यादिदर्शनात्प्रकृतेऽपि 'विन्नास्वेष विधिः स्मृतः' इति सर्वशेषत्वेनाऽभिधानात् पत्नीविन्नाशब्दयोः सम्बन्धिशब्दत्वेन वेत्तुर्जनकत्वपर्यवसानात् कुण्डगोलकादीनां जनकजातीयत्वाभावः स्पष्टमेव प्रतीयते। दर्शितश्चैषामनुपदमेव सङ्कीर्णातिरिक्तस्य तृतीयस्य प्रकारस्य प्रसक्तिः। अत एव देवलः—

द्वितीयेन तु यः पित्रा सवर्णासु प्रजायते।
आयवेट इति ख्यातः शूद्रधर्मा स जातितः॥

एवमादीनि वचनान्तराण्यपि तत्र द्रष्टव्यानि। क्षेत्रजस्तु मातृ(२)समानजातीयो नियोगस्मरणात् शिष्टाचाराच्च। तथा धृतराष्ट्रपाण्डुविदुराः क्षेत्रजाः सन्तो मातृसमानजातीया इत्याहुः। इदं पुनरत्राऽवधेयम्। सर्वमिदं यथायथं ब्रह्मत्वादिपरिचायकमात्रं, न तु तत्स्वरूपं ब्राह्मणत्वादिघटितत्वपर्यवसानेनाऽऽत्माश्रयापत्तेः। न च जनकयोरपि ब्राह्मण्याद्युक्तेनैव परिचेयमिति, अनवस्थाऽनादित्वात् परिचायकान्तरसम्भवात् व्यञ्जकाननुगमस्याऽदोषत्वादित्यादि तत्तद्दर्शनचतुरैश्चिन्तनीयम्।

जनकसवर्णानामपि स्वमध्ये किञ्चिद्वैलक्षण्यं प्रसङ्गादाह—'अनि-

(१) त्याजकता—इति ख० पु० पाठः।
(२) 'मातृसमानजातीय'-इत्यारभ्य 'सन्तः'-इत्यन्तोऽशों नास्ति क० पुस्तके।

न्द्येष्वि'ति। अनिन्द्येषु ब्राह्मादिषु चतुर्षु। सप्तमी अभिमतसम्बन्धमात्रे। तेनाऽनिन्द्यविवाहेनोढासु ये पुत्रा जायन्ते ते सन्तानवर्द्धनाः सन्ततिवृद्धिहेतवो भवन्ति। उपलक्षणमेतत्—

तथा च मनुः—

ब्राह्मादिषु विवाहेषु चतुर्ष्वेवानुपूर्वशः।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते शिष्टसंमताः॥
(१)कामसत्त्वगुणोपेता धनवन्तो यशस्विनः।
पर्याप्तभोगा धर्मिष्ठा जीवन्ति च शतं समाः॥
इतरेषु तु शिष्टेषु नृशंसाऽनृतवादिनः।
(२)जायन्ते दुर्विवाहेषु ब्रह्मधर्मद्विषः सुताः॥

ब्राह्मणविषयमेतदित्युक्तप्रायम्। तथा—

अनिन्दितैः स्त्रीविवाहैरनिन्द्या भवति प्रजा।
निन्दितैर्निन्दिता नृणां तस्मान्निन्द्यान् विवर्जयेत्॥

अत्राऽवेद्यायामपि विवाहस्य निन्दितस्य सम्भवात्तज्ज्ञानामवेद्यावेदनामूलकत्वाज्जनकासवर्णत्वं सामान्यत एव नाशङ्कनीयमिति। केचित्तु 'अनिन्द्येष्वि'त्यादि पूर्वैकवाक्यतापन्नमेव। अनिन्द्येष्वनिषिद्धेष्वित्यर्थः। पुत्रपदं पुत्रमात्रपरं, सन्तानेत्यादिस्तुतिरित्याहुः॥ ९०॥

(मिता०) ब्राह्मणस्य चतस्रो भार्या भवन्ति क्षत्रियस्य तिस्रो वैश्यस्य द्वे शूद्रस्यैकेत्युक्ता तासु च पुत्रा उत्पादयितव्या इत्युक्तम्। इदानीं कस्यां कस्मात् कः पुत्रो भवतीति विवेक्तु(३)माह—

सवर्णेभ्य इति। सवर्णेभ्यो ब्राह्मणादिभ्यः सवर्णासु ब्राह्मण्यादिषु सजातयो मातृपितृसमानजातीयाः पुत्रा भवन्ति। 'विन्नास्वेष विधिः स्मृतः' इति सर्वशेषत्वेनोपसंहाराद्विन्नासु सवर्णास्विति सम्बध्यते। विन्नाशब्दस्य सम्बन्धिशब्दत्वाद्वे(४)त्तृभ्यः सवर्णेभ्य इति लभ्यते। एकः सवर्णशब्दः स्पष्टार्थः। अतश्चाऽयमर्थः संवृत्तः। उक्तेन विधिनोढायां सवर्णायां वोढुः सवर्णादुत्पन्नास्तस्मात्समानजाती-

(१) इदं सार्द्धं पद्यं ख० पुस्तके नास्ति। रूप-इति मनौ।
(२) अत्र कात्यायनः—इति ख० पुस्तकेऽधिकम्।
(३) विवेकमाह. ख०। (४) वोढृभ्यः. क०।

या भवन्ति। अतश्च कुण्डगोलककानीनसहो(१)ढजादीनामसवर्णत्वमुक्तं भवति। ते च सवर्णेभ्योऽनुलोमप्रतिलोमेभ्यश्च भिद्यमानाः साधारणधर्मैरहिंसादिभिरधिक्रियन्ते। 'शूद्राणां तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः' इति स्मरणात्। अपध्वंसजा व्यभिचारजाताः शूद्रधर्मैरपि द्विजशुश्रूषादिभिरधिक्रियन्ते। ननु कुण्डगोलकयोर(२)ब्राह्मणत्वात् श्राद्धे प्रतिषेधोऽनुपपन्नो, न्यायविरोधश्च। यो यज्जातीयाद्यज्जातीयायामुत्पन्नः स तज्जातीय एव भवति। यथा गोर्गवि गौः; अश्वाद्वडवायामश्वः, तस्माद्ब्राह्मणाद्ब्राह्मण्यामुत्पन्नो ब्राह्मण इति न विरुद्धम्। तथा कानीनपौनर्भवादीननुक्रम्य–'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' (३)इति वक्ष्यमाणवचनाविरोधश्च। नैतत्सारम्। ब्राह्मणेन ब्राह्मण्यामुत्पन्नो ब्राह्मण इति भ्रमनिवृत्त्यर्थः श्राद्धे प्रतिषेधः। यथाऽत्यन्तसन्नासस्य पतितस्य श्राद्धे प्रतिषेधः। न च न्यायविरोधः। यत्र प्रत्यक्षगम्या जातिर्भवति तत्र तथा। ब्राह्मणादिजातिस्तु स्मृतिलक्षणा यथास्मरणं भवति। यथा समानेऽपि ब्राह्मण्ये कुण्डिनो (४)वसिष्ठोऽत्रिर्गौतम इति स्मरणलक्षणं गोत्रम्, तथा मनुष्यत्वे समानेऽपि ब्राह्मण्यादिजातिः स्मरणलक्षणा। मातापित्रोश्चैतदेव जातिलक्षणम्। न चाऽनवस्था अनादित्वात्संसारस्य शब्दार्थव्यवहारवत्। 'सजातीयेष्वयं प्रोक्तस्तनयेषु मया विधिः' इति तूक्तानुवादत्वाद्यथासम्भवं व्याख्यास्यते। क्षेत्रजस्तु मातृसमानजातीयो नियोगस्मरणात् शिष्टसमाचाराच्च। यथा धृतराष्ट्रपाण्डुविदुराः क्षेत्रजाः सन्तो मातृसमानजातीया इत्यलमतिप्रसङ्गेन। किं चाऽनिन्द्येषु ब्राह्मादिविवाहेषु पुत्राः सन्तानवर्धना अरोगिणो दीर्घायुषो धर्मप्रजासम्पन्ना भवन्ति ॥ ९० ॥

(वी० मि०) अथ सङ्कीर्णेषु प्रदर्शनीयेषु प्रथममनुलोमजानाह द्वाभ्याम्—

विप्रान्मूर्द्धाभिषिक्तो हि क्षत्रियायां विशः स्त्रियाम् ॥
जातोऽम्बष्ठस्तु(५)शूद्रायां निषादः पारशवोऽपि वा ॥९१॥

---

(१) सहोढादीनां. क० ।   (२) अब्राह्मणत्वे. ख० ।
(३) इति वचन. ख० ।   (४) वसिष्ठो गौतम. ख० ।
(५) अम्बष्ठः शूद्रयां निषादो जातः पारशवोऽपि वा-इति मुद्रितपुस्तके पाठः ।

ब्राह्मणाद्विन्नासु क्षत्रियावैश्याशूद्रासु जाता यथाक्रमं मूर्द्धाभिषिक्ताम्बष्ठनिषादसंज्ञा भवन्ति । निषादो नामाऽपरोऽपि मत्स्यघातकर्मा, तद्व्यवच्छेदाय प्रकृतनिषादस्य संज्ञान्तरमुक्तम् । 'पारशवोऽपि वा' इति नवाक्षरः पादः । वाशब्दश्चार्थेऽव्ययसमुदायोऽनतिरिक्तार्थः । केचित्तु पारशवो निषादोऽपि; चकारादन्योऽपि निषाद(१) इति व्याचक्षते । यत्तु 'ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव भवति, क्षत्रियेण वैश्यायां वैश्य एव, वैश्येन शूद्रायां शूद्र एवे'तिशङ्ख(२)वचनं तत् क्षत्रियादिधर्मप्राप्त्यर्थमौपचारिकं न पुनर्मूर्द्धाभिषिक्तादिजातिनिषेधार्थं क्षत्रियादिजातिप्राप्त्यर्थं वा विरोधात् । अत एव मनुः—

पुत्रा येऽनन्तरस्त्रीजाः क्रमेणोक्ता द्विजन्मनाम् ।
ताननन्तरनाम्नस्तु मातृदोषात्प्रचक्षते ॥

अनन्तरस्त्रीजाः अनन्तरोक्तास्वनन्तरैकान्तरात् द्व्यन्तर(३)स्त्रीषु जाताः । मातृदोषात् मातृजातिदोषात् अनन्तरनाम्नः अनन्तरस्त्रीजातिनाम्नः । नामग्रहणात् मातापितृव्यतिरिक्तसङ्कीर्णजातित्वेन जनकजात्यभावेऽपि मातृजात्या व्यपदिश्यन्त इत्यर्थः । एतद्विषयमेव मातृतो जातिकल्पनेति । अतश्च मूर्द्धाभिषिक्तादीनां क्षत्रियाद्युक्तैरेव दण्डाजिनोपवीतादिभिरुपनयनादि कार्यमिति नि(४)बन्धारः । अत एव मूर्द्धाभिषिक्तो 'ही'ति हिशब्देनोक्तार्थमेवाऽवधारयति ॥ ९१ ॥

(मिता०) सवर्णानुक्त्वा इदानीमनुलोमानाह—

विप्रादिति । ब्राह्मणात्क्षत्रियायां विन्नायामुत्पन्नो मूर्धावसिक्तो नाम पुत्रो भवति । वैश्यकन्यायां विन्ना(५)यामुत्पन्नोऽम्बष्ठो नाम भवति । (६)शूद्रायां विन्नायां निषादो नाम पुत्रो भवति । निषादो नाम कश्चिन्मत्स्यघातजीवी प्रतिलोमः स माभूदिति पारशवोऽयं निषाद इति संज्ञाविकल्पः । विप्रादिति सर्वत्राऽनुवर्तते । यत्तु 'ब्राह्मणेन क्षत्रियायामुत्पादितः क्षत्रिय एव भवति । क्षत्रियेण वैश्यायामुत्पादितो वैश्य एव भवति । वैश्येन शूद्रायामुत्पादितः (१)शूद्र एव भवति'

---

(१) अत्र 'अपि'—इत्यधिकं ख० पुस्तके । (२) शङ्खवचनं—इति-ख० पुस्तके नास्ति ।
(३) व्यतिरिक्तस्त्रीषु—इति ख. पुस्तके पाठः । (४) निबन्धात्—इति क. पुस्तके पाठः ।
(५) विन्नायामम्बष्ठो. ख० । (६) शूद्रायां निषादो ख० ।
(१) शूद्र इति क० ।

इति शङ्खस्मरणं तत्क्षत्रियादिधर्मप्राप्त्यर्थं न पुनर्मूर्धावसिक्तादिजाति-निराकरणार्थं क्षत्रियादिजातिप्राप्त्यर्थं वा। अतश्च मूर्धावसिक्तादीनां क्षत्रियादेरुक्तैरेव दण्डाजिनोपवीतादिभिरुपनयनादिकं कार्यम्। प्रागुपनयनात्कामचारादि पूर्ववदेव वेदितव्यम्॥ ९१॥

वैश्याशूद्र्योस्तु राजन्यान्माहिष्योग्रौ सुतौ स्मृतौ॥
वैश्यात्तु करणः शूद्र्यां विन्नास्वेष विधिः स्मृतः॥ ९२॥

(वी० मि०) शूद्री शूद्रा। क्षत्रियात्तु वैश्यायां शूद्रायां जातः क्रमेण माहिष्यः उग्रश्च स्मृतिषूक्तौ। वैश्यात्तु शूद्रायां जातः करणः स्मृतः। 'सर्वेणभ्यः सवर्णास्वि'त्यादावुक्ताः सर्वाः स्त्रीर्विशिनष्टि। विन्नास्विति विवाहितास्वित्यर्थः। अविन्नास्वपि जातानां क्षेत्रजादिपुत्राणां वर्णत्वाभ्युपगमाद्विन्नास्विति शास्त्रविहितपुत्रोत्पादनप्रकारोपलक्षणमिति केचित्। एष 'सवर्णेभ्य' इत्यादावुक्तो विधिरपत्यजातिविवेकरूपः। अत्र गौतमः—'अनुलोमानन्तरकान्तरद्व्यन्तरासु जाताः सवर्णाम्बष्ठोग्रनिषाददौष्यन्तपारशवाः'। अस्यार्थः—सवर्णभार्योत्पन्ना अनुलोमाः। तत्र ब्राह्मणस्याऽनन्तरा क्षत्रिया तस्यां तेनोत्पन्नः सवर्णसंज्ञः। क्षत्रियात्तदनन्तरायां वैश्यायामम्बष्ठः, वैश्यात्तदनन्तरायां शूद्रायामुग्रः, ब्राह्मणादेकान्तरायां वैश्यायां निषादः, क्षत्रियादेकान्तरायां शूद्रायां दौष्यन्तः, ब्राह्मणात् द्व्यन्तरायां शूद्रायां पारशवः इति। अत्र संज्ञाविकल्पेन स्मृतीनामविरोध इति। एवमनुलोमजाः सङ्कीर्णाः षडुक्ताः॥ ९२॥

(मिता०) वैश्याशूद्र्योरिति। वैश्यायां शूद्रायां च विन्नायां राजन्यान्माहिष्योग्रौ यथाक्रमं पुत्रौ भवतः। वैश्येन शूद्रायां करणो नाम पुत्रो भवति। एष सवर्णमूर्धावसिक्तादिसंज्ञाविधिर्विन्नासूढासु स्मृत उक्तो वेदितव्यः। एते च मूर्धावसिक्ताम्बष्ठनिषादमाहिष्योग्रकरणाः षडनुलोमजाः पुत्रा वेदितव्याः॥ ९२॥

(वी० मि०) अथ विलोमजानाह द्वाभ्याम्—

ब्राह्मण्यां क्षत्रियात्सूतो वैश्याद्वैदेहकस्तथा॥
शूद्राज्जातस्तु चाण्डालः सर्वधर्मबहिःकृतः॥ ९३॥

ब्राह्मण्यां क्षत्रियवैश्यशूद्रैरुत्पादिता यथाक्रमं सूतवैदेहचाण्डाला

भवन्ति । तथेति स्पृश्यत्वादिना सूतसदृश इत्यर्थः । चाण्डालस्तु सर्वेषां वर्णानां धर्मेभ्यो बहिःकृतः तत्तद्वर्णधर्मानधिकारीत्यर्थः । न तु सामान्यत एव धर्मानधिकारीति स्वजा(१)तिशोधनम् । 'सर्वजनप्रणामस्तितिक्षा व्यवहारशुद्धिरपराऽवमानः स्वभृत्यपरिपोषणं प्रधानकर्मवर्ज्जनमिति चाण्डालधर्माः' इति देवलवचनविरोधात् ॥९३॥

(मिता०) प्रतिलोमजानाह—

ब्राह्मण्यामिति । ब्राह्मण्यां क्षत्रियवैश्यशूद्रैरुत्पादिता यथाक्रमं सूतवैदेहकचण्डालाख्याः पुत्रा भवन्ति । तत्र चण्डालः सर्वधर्मबहिष्कृतः ॥ ९३ ॥

क्षत्रिया मागधं वैश्याच्छूद्रात्क्षत्तारमेव च ॥
शूद्रादायोगवं वैश्या जनयामास वै सुतम् ॥ ९४ ॥

(वी० मि०) क्षत्रिया वैश्यात् मागधं, शूद्रात् क्षत्तारं, वैश्या शूद्रादायोगवं सुतं जनयामासेति वृत्तकीर्त्तनेन पुराकल्परूपेण प्रकृतमर्थं द्रढयति । एवकारेण सर्वेषु प्रतिलोमजेषु व्यपदेशान्तरं व्यवच्छिनत्ति । तेनाऽनुलोमजानामौपचारिकमातृजातिव्यपदेशवत्प्रतिलोमजानां स नास्तीति पर्यवसितार्थः । यद्वा क्षत्रियैव शूद्राद्वेति भिन्नक्रमेणैवकारेण पुराणेषु क्षत्तृपदेनोच्यमानेऽपि विदुरे क्षत्तृत्वजात्यभावमभिप्रैति । अथवा क्षत्तारमेव । न तु प्रकृतपुराणविरोधेनाऽक्षत्तारं(२) क्षत्तृपदस्य नामाऽर्थत्वादित्याशयः । चैवशब्दौ क्षत्रियावैश्यान्वितावन्यव्यवच्छेदार्थौ । एतेषां च—

सूतानामश्वसारथ्यमम्बष्ठानां चिकित्सनम् ।
वैदेहकानां स्त्रीकार्यं मागधानां वणिक्पथः ॥
मत्स्यघातो निषादानां त्वष्टिस्त्वा(३) योगवस्य च ।
क्ष(४)त्त्रुग्रपुक्कसानां तु बिलौकोवधबन्धनम् ॥
चण्डालश्वपचानान्तु बहिर्ग्रामात्प्रतिश्रयः ।
वासांसि मृतचेलानि भिन्नभाण्डेषु भोजनम् ॥
मेदान्ध्रचुञ्चुमद्गूनामारण्यपशुहिंसनम् ।

(१) जाति—इत्याधिकं ख० पुस्तके । (२) विरोधे क्षत्तारं—इति ख० पुस्तके पाठः ।
(३) निषादानामायोगव्यस्य रक्षणम्—इति क० ख० पुस्तकयोः पाठः ।
(४) क्षत्तुश्च पुष्कपुंसां च—इति क० ख० पुस्तकसंमतः पाठः ।

धिग्व(१)णानां चर्मकार्यं वेणानां भाण्डवादनम् ।

इत्यादिभिर्मनुनोशनसा च वृत्तीर्दर्शयतैव(२) द्राक् परिचयप्रकारोऽपि दर्शित इत्यलं विस्तरेण ॥ ९४ ॥

(मिता०) किञ्च—

क्षत्रियेति । क्षत्रिया योषित् वैश्यान्मागधं नाम पुत्रं जनयति । सैव शूद्रात्क्षत्तारं पुत्रं जनयति । वैश्ययोषिच्छूद्रादायोगवं पुत्रं जनयति । एते च सूतवैदेहकचण्डालमागधक्षत्त्रऽयोगवाः षट् प्रतिलोमजाः । एतेषां च वृत्तय औशनसे मानवे च द्रष्टव्याः ॥ ९४ ॥

(वी० मि०) एवं विलोमजाः षट् सङ्कीर्णाः उक्ताः, इदानीं वर्णसङ्कीर्णाभ्यां जातं सङ्कीर्णतरं साक्षादेव वर्णजातत्वाद्वर्णसङ्करोदाहरणेनैवोपलक्षणरीत्योदाहृतं विव(३)क्षन् तमुपेक्ष्यैव सङ्कीर्णाभ्यां जातं सङ्कीर्णतममुदाहरति—

माहिष्येण करण्यान्तु रथकारः प्रजायते ॥

स रथकारसंज्ञ इत्यर्थः । 'वैश्यात् शूद्रायां जातो रथकारः' इति बौधायनोक्तं तु मतान्तरं रथकारशब्दस्य नामार्थत्वादिति स्मर्तव्यम् । तुशब्दो रथकार इत्यनन्तरं योज्यः । तेनाऽन्येऽपि सङ्कीर्णतमा लभ्यन्ते । आनन्त्यात्तु विशिष्य नोपदर्शिताः । रथकारस्तु प्रकर्षाविशेषाद्विशिष्योक्तः, तत्प्रदर्शनार्थमे(४)व प्रजायत इति प्रशब्द उपात्तः । अत एव शङ्खः—'क्षत्रियवैश्यानुलोमानन्तरजो रथकारः, तस्य चेज्यादानोपनयनसंस्कारक्रियाः, अश्वप्रतिष्ठारथसूत्रवास्तुविद्याऽध्ययनवृत्तिता च' इति । तेषु केचित् शास्त्रे संज्ञासंव्यवहारज्ञापनायोपदर्श्यन्ते । तत्र मनुः—

ब्राह्मणादुग्रकन्यायामावृतो नाम जायते ।
आभीरोऽम्बष्ठकन्यायामायोगव्यान्तु धि(५)ग्वणः ॥

उग्रा चाऽसौ कन्या चेति समासः । एवमग्रेऽपि । तथा—

जातो निषादाच्छूद्रायां जात्या भवति पुक्कसः ।
शूद्राज्जातो निषाद्यान्तु स वै कुक्कुटकः स्मृतः ॥

---

(१) धिगणानां—इति ख० पुस्तके, धिग्गानां- इति च क० पुस्तके पाठः ।

(२) दर्शतैव --इति क० पु० पाठः । (३) विवक्षन् -इति ख० पुस्तके नास्ति ।

(४) एव-इति क० पुस्तके नास्ति ।

(५) 'धिग्वणः'-इत्यारभ्य 'निषाद्यां तु'-इत्यन्तो ग्रन्थः ख० पुस्तके नास्ति ।

क्षत्तुर्जातस्तथोग्रायां श्वपाक इति कीर्त्यते ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेण उच्यते ॥

गौणसङ्कीर्णमाह मनुः—

द्विजातयः सवर्णासु जनयन्त्यव्रतांस्तु यान् ।
तान् सावित्रीपरिभ्रष्टान् व्रात्यानिति विनिर्दिशेत् ॥
व्रात्यात्तु जायते विप्रात् पापात्मा भूर्जकण्टकः ।
आवन्त्यवाटधानौ च पुष्पधः शैख एव च ॥

ब्राह्मत्वादिति सवर्णास्वित्यनुषज्यते । तेन व्रात्याद्ब्राह्मणाद् व्रात्यायामेव ब्राह्मण्यामित्यर्थः। एकस्यैव भूर्जकण्टकादीनि पञ्च नामानि देशभेदेन प्रसिद्धानि । एवं व्रात्यक्षत्रियाज्जातेषु झल्लमल्लादिसप्तसु व्रात्यवैश्याज्जातेषु सुधन्वादिपञ्चसु च ज्ञेयमिति कुल्लूकभट्टः । नारायणस्तु भूर्जकण्टकः सवर्णयोरपत्यम्, भूर्जकण्टकस्त्रियां व्रात्याद्ब्राह्मणादावन्त्यः, आवन्त्यायां वाटधान इति पूर्वपूर्वजातिषु स्त्रीषु व्रा(१)त्येन ब्राह्मणेन जननमुत्तरोत्तरेषाम् । एवं झल्ल(२)मल्लादिषु सुधन्वादिषु च स्वयमूह्यमित्याह । तथा—

झल्लो मल्लश्च राजन्याद्व्रात्यान्निच्छिविरेव च ।
नटश्च करणश्चैव खसो द्रविड एव च ॥
वैश्यात्तु जायते व्रात्यात्सुधन्वाचार्य एव च ।
चारूषश्च विजन्मा च मैत्रः सात्वत एव च ॥

नट इत्यत्र सत्य इति चारूष इत्यत्र कारुष इति क्वचित्पाठः । अथोपलक्षणतया कांश्चित्सङ्कीर्णाननुवृत्त्या सह दर्शयति मनुः—

मृतवस्त्रभृत्सु नारीषु गर्हितान्नाशनासु च ।
सैरिन्ध्रं(३) वागुरावृत्तिं सूते दस्युरयोगवे ॥
मैत्रेयकन्तु वैदेहो माधू(४)कं सम्प्रसूयते ।
नॄन् प्रशंसत्यजस्रं यो घण्टा(५)ताडोऽरुणोदये ॥
निषादो मार्गवं सूते दासं नौकर्मजीवनम् ।
कैवर्त इति यं प्राहुरार्यावर्तनिवासिनः ॥

---

(१) वात्येन–इति क० पु० पाठः । (२) झल्लादिषु च स्वय०–इति ख० पुस्तके पाठः ।
(३) सैन्धवं वैधवं–इति क० ख० पुस्तकयोः पाठौ । (४) माधुका–इति ख० पु० पाठः ।
(५) घण्टास्वेताऽरु०–इति क० पु० पाठः ।

प्रसाधनोपचारज्ञमदासं दासजीवनम् ।
भवन्त्यायोगवीष्वेते जातिहीनाः पृथक् त्रयः ॥

दस्युर्वक्ष्यमाणः । माधूकं मधुरस्तुतिपाठकं, दासं दासापरनामानम् । तथा—

कारा(१)वरो निषादाच्च चर्मकारः प्रसूयते ।
वैदेहकादन्ध्रमेदौ बहिर्ग्रामप्रतिश्रयौ ॥
चण्डालात्पाण्डुसोपाकः त्वक्सारव्यवहारवान् ।
आहिण्डिको निषादेन वैदेह्यामेव जायते ॥
चण्डालेन तु सोपाको मूलव्यसनवृत्तिमान् ।
पुक्कस्यां जायते पापः सदा सज्जनगर्हितः ॥
निषादस्त्री तु चण्डालात्पुत्रमन्त्यावसायिनम् ।
श्मशानगोचरं सूते बाह्यानामपि गर्हि(२)तम् ॥
सङ्करे जातयस्त्वेताः पितृमातृ(३)प्रदर्शिताः ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः ॥

गौणसङ्कीर्णान्तरमाह स एव—

शनकैस्तु क्रियालोपादिमाः क्षत्रियजातयः ।
वृषलत्वं गता लोके ब्राह्मणादर्शनेन च ॥
पौण्ड्रकाश्चौड्रद्रविडाः काम्बोजा यवनाः शकाः ।
पारदापह्लवाश्चीनाः किराता दरदाः खशाः ॥
मुखबाहूरुपज्जानां लोके वै जातयः(४)पृथक् ।
म्लेच्छवाचश्चार्यवाचः सर्वे ते दस्यवः स्मृताः ॥

एते प्रसिद्धनामानः सङ्कीर्णाः संव्यहारार्थमुदाहृताः ।

ये त्वनुलोमजाः षट् प्रतिलोमजाश्च षट् व्रात्यास्त्रयः इति पञ्चदश प्रकृतिभूतास्तेषामुच्चनीचासवर्णस्त्रीषु तुल्यासु च ये जायन्ते तेषां तासु तेषामपि तासु जायमानाः सङ्कीर्णप्रभेदा अनन्तप्रकारा इति ॥

(१) कारावधो-इति काराधवो-इति च ख० क० पु० पाठौ ।

(२) गर्हितः-इति क० पु० पाठः ।

(३) विगर्हिताः—इत्युभयपुस्तकसंमतः पाठः ।

(४) या लोके जातयो बहिः—इति मुद्रितमनुपुस्तके पाठः ।

(वी० मि०) एवं सङ्कीर्णानुक्त्वा तद्धर्मानतिसङ्क्षेपेण विवक्षन्नाह—

असत्सन्तस्तु विज्ञेयाः प्रतिलोमाऽनुलोमजाः ॥ ९५ ॥

प्रतिलोमजाः सूतादयोऽनुलोमजा मूर्द्धाभिषिक्तादयः यथाक्रममसन्तोऽसाधवोऽनुलोमजादपकृष्टा मातृवर्णधर्मानधिकारात् सन्तः साधवः प्रतिलोमजादुत्कृष्टा मातृवर्णधर्माधिकारात् विज्ञेया मन्वादिशास्त्रानुसारतो वैविध्येन ज्ञेयाः। अत्र प्रतिलोमानुलोमजा इति साक्षात्परम्परासा(१)धारणं जन्यत्वमभिप्रेतम्। तेन मूर्धाभिषिक्तजातीयस्त्रीपुंसाद्योः सूतजातीयस्त्रीपुंसाद्योर्वा जातानामपि ग्रहणमित्युक्तप्रायम्। तुशब्देन चकारसमानार्थेन प्रतिलोमानुलोमजास्त्विवति क्रमवता सपिण्डस्त्र्यादिवेदेन मूलकान् 'असपिण्डां यवीयसी'मित्यादिना विवाहप्रकरणीयवचनेन कटाक्षितान् 'सावित्रीपतिता व्रात्या' इत्यनेनोपनयनप्रकरणे सूचितान् व्रात्यानन्यांश्चैवंविधान् गौणसङ्कीर्णान् समुच्चिनोति। तेऽपि स्वमध्येऽसत्सन्तो विज्ञेया इत्यर्थः। अत्र शुद्धानां ब्राह्मणादिवर्णानां स्वस्वव(२)र्णधर्माधिकारः स्फुट एव। सङ्कीर्णानां तु धर्मान् वक्तुमाह मनुः—

स्त्रीष्व(३)नन्तरजातासु द्विजैरुत्पादितान् सुतान्।
सदृशानेव तानाहुर्मातृदोषेण दूषितान्॥

स्त्रीषु विवाहितासु ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायामुत्पादितान् मातृदोषेण गर्हितानपि कथञ्चित्सदृशानेवाऽऽहुर्न तु पितृजातीयानपीत्यर्थः। यद्वा मातृदोषेण दूषितान् तत्सदृशान् मातृवर्णधर्माधिकारिण इति वचनात् पितृसदृशानपीति। तथा—

स्वजातिजानन्तरजाः षट् सुता द्विजधर्मिणः।
शूद्राणान्तु सधर्माणः सर्वेऽपध्वंसजाः स्मृताः॥

स्वजातिजाः द्विजैः सवर्णायामुत्पादितास्त्रयः। अनन्तरजाः ब्राह्मणेन क्षत्रियायां क्षत्रियेण वैश्यायां वैश्येन शूद्रायामुत्पादितास्त्रयो मूर्द्धाभिषिक्तमाहिष्यकरणाख्याः सङ्कीर्णाः। एते षट् द्विजधर्मिण

(१) साधनं इति ख० पु० पाठः।

(२) स्वस्ववर्णाधिकारः–इति क० पु० पाठः।

(३) इदं पद्यं नास्ति ख० पुस्तके।

उपनयनमर्हन्तीत्यर्थः इति केचित्, तच्चिन्त्यम् । अन्ये तु स्वजातिजाः सवर्णायामुत्पन्नाः शुद्धवर्णाः अनन्तरजा अनुलोमजाः । तत्किं शूद्रजात्युत्पन्ना अपि नेत्याह षडिति द्विजान्योरेवोत्पन्ना इत्यर्थ इति व्याचक्षते । एतच्च 'पुत्रा येऽनन्तरस्त्रीजाः' इत्यादिवचनानुसारीति मन्तव्यम् । अपध्वंसजा व्यभिचारजाः । उपलक्षणमेतत्, तेन द्विजधर्माधिकारितया शूद्र(१)धर्मानधिकारितया च शास्त्रे प्रतिपादिता इति पर्यवसितार्थः । सर्वपदोपादानप्रयोजनमपीदमेव । सधर्माणः समानधर्माः । तथा—

विप्रस्य त्रिषु वर्णेषु नृपतेर्वर्णयोर्द्वयोः ।
वैश्यस्य वर्णे चैकस्मिन् षडेतेऽपसदाः स्मृताः ॥

सदः सत्त्वं प्रजारूपं अपकृष्टाः प्रजाः अपसदा इति नारायणः । अत्र षण्णामेकरूपेणाऽभिधानं शुद्धशूद्राद्यपेक्षयोत्कृष्टत्वमात्रं सामान्यमादाय । अवान्तरधर्मविशेषस्त्वेषां दर्शित एवेति स्मर्तव्यम् ॥९५॥

(मिता०) सङ्कीर्णसङ्करजात्यन्तरमाह—

माहिष्येणेति । क्षत्रियेण वैश्यायामुत्पादितो माहिष्यः । वैश्येन शूद्रायामुत्पादिता करणी तस्यां माहिष्येणोत्पादितो रथकारो नाम जात्या भवति । तस्य चोपनयनादि सर्वं कार्यं वचनात् । यथाह शङ्खः—'क्षत्रियवैश्यानुलोमान्तरो(२)त्पन्नो यो रथकारस्तस्येज्यादानोपनयनसंस्कारक्रिया अश्वप्रतिष्ठारथसूत्रवास्तुविद्याध्ययनवृत्तिता च' इति । एवं ब्राह्मणक्षत्रियोत्पन्नमूर्धावसिक्तमाहिष्यादनुलोमसङ्करजात्यन्तरता उपनयनादिप्राप्तिश्च वेदितव्या तयोर्द्वि(३)जातित्वात् । संज्ञास्तु स्मृत्यन्तरोक्ता द्रष्टव्याः । एतच्च प्रदर्शनमात्रमुक्तम् । सङ्कीर्णसङ्करजा(४)तीनामानन्त्याद्वक्तुमशक्यत्वात् । अत एतावदत्र विवक्षितम्—असन्तः प्रतिलोमजाः सन्तश्चाऽनुलोमजा ज्ञातव्या इति ॥ ९५ ॥

(वी० मि०) ननु प्रतिलोमजापेक्षयाऽनुलोमजानां सामान्यत एवोत्कृष्टत्वमुक्तं, तच्चाऽयुक्तं निषादजातीयानां सूतादिजातीयेभ्यस्तदसम्भवादुभयेषामपि शूद्रधर्माधिकारादित्याशङ्कायां ब्राह्मणत्वादेः प्रयोजकरूपं परिचायकान्तरं दर्शयन्नेवाऽनुलोमजानां मूर्धाभिषिक्ता-

(१) शूद्रधर्माधिकारितया—इति क० पु० पाठः ।

(२) रोत्पन्नजो ख० । (३) द्विजत्वात क० । (४) जातानां क० ग० ।

दीनां सर्वेषामेव ब्राह्मण्यादिजातिप्राप्तियोग्यतारूपप्रतिलोमजादुत्कर्षान्तरं दर्शयति—

जात्युत्कर्षो युगे ज्ञेयः पञ्चमे (१)सप्तमेऽपि वा ॥
व्यत्यये कर्मणां साम्यं पूर्ववच्चाऽधरोत्तरम् ॥ ९६ ॥

सवर्णेभ्यः सवर्णास्वित्यादिना जातिप्राप्तौ कारणमुक्तमिदानीं कारणान्तरमप्याह जात्युत्कर्ष इत्यादीति केचिदवतारयन्ति। जातयो मूर्धाभिषिक्तादयस्तासामुत्कर्षो ब्राह्मणत्वादिप्राप्तिरूपः स सप्तमे पञ्चमे, अपिशब्दात् षष्ठे वा युगे बोद्धव्यः। 'युगे जन्मनी'ति विश्वरूपः। 'स्त्रीपुंसयुग्मम्' इति केचित्। वाशब्दो व्यवस्थिते विकल्पे। व्यवस्था च–निषादी ब्राह्मणेनोढा दुहितरं काञ्चिज्जनयति साऽपि ब्राह्मणेनाऽन्यामित्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणम्। अम्बष्ठाप्यनेन प्रकारेण पञ्चमी षष्ठं ब्राह्मणम्। मूर्द्धाभिषिक्ताऽप्यनेन प्रकारेण चतुर्थी ता(२)दृशी पञ्चमं ब्राह्मणं जनयति। एवमुग्रापि पञ्चमी क्षत्रियोढा षष्ठं क्षत्रियम्। माहिष्यापि चतुर्थी तादृशी पञ्चमं क्षत्रियं जनयति। एवं करण्यपि चतुर्थी वैश्योढा पञ्चमं वैश्यं जनयतीत्येवमन्यत्राऽप्यूह्यमिति मिताक्षरा। मनुटीकायां तु अपिशब्देन तृतीय इति पक्षान्तरं गृह्यत इत्युक्तमुदाहृतं च–क्षत्रिया(३)ज्जातस्य शूद्रस्य पञ्चमे जन्मन्युत्कर्षापकर्षौ, वैश्याज्जातस्य तृतीये ताविति तुल्यन्यायत्वा(४)त्। ब्राह्मणाद्वैश्यायां जातस्य पञ्चमे क्षत्रियायां जातस्य तृतीये जन्मनि ताविति। एवमन्यत्रापि न्यायतौल्येनोहनीयमिति सङ्क्षेपः। क्षत्रियत्वादेः प्रयोजकं परिचायकान्तरं दर्शयन्नेव 'असत्सन्तस्त्वि'ति। चार्थेतुशब्देन समुच्चितानां मध्ये उक्तप्रायान् व्रात्यादीनुपेक्ष्य सर्वथैवाऽनुजान् विवृणोति। कर्मणां व्यत्यर्थानां याजनादीनां व्यत्यये विपर्ययेऽन्यजातीयेनाऽन्यजातीयवृत्त्युपजीवने साम्यं यज्जातीयवृत्तिमत्तज्जातीयो य उपजीवति तज्जातीयत्वं तस्य भवति। एतच्चोत्कृष्टेनाऽपकृष्टवृत्त्युपजीवने। वैपरीत्ये तु वर्णबाह्यत्वमेव, तच्चशब्देन समुच्चिनोति। अत एव 'वृत्तिमातिष्ठेरन्नि'त्यनुवृत्तौ वसिष्ठः।

(१) पञ्चमे सप्तमेऽपि ख०। (२) सप्तमे पञ्चमेऽपि वा–इति ख० पु० पाठः।
(३) क्षत्रियादुत्कृष्टस्य–इति ख० पु० पाठः। (४) च–इत्यधिकं क० पुस्तके।

न च कदाचिज्ज्यायसीमिति । अत एवाह पूर्ववादित्यादि । पूर्ववद्वर्णसङ्कीर्णेष्विति प्रवृत्तिसङ्कीर्णेष्वपि । अधरत्वमपकृष्टत्वमुत्तरत्वमुत्कृष्टत्वं ज्ञेयम् । एकवद्भावी भावप्रधानो द्वन्द्वः । भवति तु प्रधान एव वा 'स नपुंसकम्' [पा० २ । ४ । १७] इति लिङ्गसङ्गतः । यथा प्रातिलोम्येन वर्णसङ्कीर्णोऽपकृष्टः, आनुलोम्येन तूत्कृष्टस्तथा वृत्तिसङ्की(१)र्णेऽपि । यथा च पूर्वत्र सप्तमादौ जन्मनि ब्राह्मणत्वादिप्राप्तिस्तथोत्तरत्रापीत्यर्थः । तेन ब्राह्मणजाता कन्या शूद्रवृत्तिना ब्राह्मणेन कन्यां प्रसूयते साऽपि शूद्रवृत्तिना ब्राह्मणेन कन्यान्तरमित्येवम्प्रकारेण सप्तमस्य शूद्रत्वम् । एवं च क्षत्रियपरम्परायां षष्ठस्य वैश्यपरम्परायां पञ्चमस्येत्यादि स्वयमूह्यम ।

अन्ये तु शूद्रवृत्तिना ब्राह्मणेन जनितो ब्राह्मणस्तेनाऽपि तादृशेनैव जनितो ब्राह्मण इत्येवम्प्रकारेण सप्तमः शूद्रः । एवं क्षत्रियवैश्यपरम्परायां षष्ठः पञ्चम इत्येवमूह्यमित्याहुः । एतच्चाऽना(२)पदि ।

> अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्मणा ।
> जीवेत्क्षत्रियधर्मेण स ह्यस्य प्रत्यनन्तरः ॥
> उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत् ।
> कृषिगोरक्षमादाय जीवेद्वैश्यस्य जीविकाम् ॥

इति मन्वादिभिरापदि हीनवृत्त्यभ्यनुज्ञानादिति ।

अन्ये तु पूर्ववच्चेति यथा वर्णसङ्कीर्णा अनुलोम(३)जाः प्रतिलोमजाश्च तथा सङ्कीर्णजाता ये दर्शितास्तेषामप्युक्तन्यायेनोत्कर्षापकर्षौ द्रष्टव्यावित्यर्थ इति व्याचक्षते ।

व्यत्यये कर्मणामित्यादि । कर्मव्यत्यये क्रियावैपरीत्ये साम्यम् । कस्य कर्मव्यत्यये केन सह साम्यं तत्राह–अधरोत्तरमिति । उत्तरस्याऽधरजातिसाम्यं तदपि पूर्ववद्विवाहपरम्परया सप्तमे पञ्चमे तृतीये वा जन्मनीत्यर्थ इत्यपरे । अत्र मनुः—

> शूद्रायां ब्राह्मणाज्जातो ब्राह्मणोऽप्येति शूद्रताम् ।
> क्षत्रियाज्जात एवं हि वैश्याज्जातस्तथैव च ॥

अत्र शङ्कते ब्राह्मणत्वादिप्रयोजकत्वेनोक्तानां कारणविशेषाणाम-

---

(१) वृत्तिसङ्कीर्णेऽपि- इति क० पु० पाठः ।

(२) अन्यापदि–इति ख० पु० पाठः ।

(३) वर्णसङ्कीर्णा अनुलोमजाः–इति क० पुस्तके नास्ति ।

ननुगमात्कथं तथात्वमिति, तत्रोच्यते—तृणारणिमणीनां वन्हित्वा-वान्तरतत्तज्जात्यवच्छिन्ने वन्हाविव ब्राह्मणादीनामपि ब्राह्मणादि-कारणानां ब्राह्मणत्वाद्यवान्तरतत्तज्जात्यवच्छिन्ने ब्राह्मणादौ हेतुता । यदाहुर्न्यायकुसुमाञ्जलावुदयनाचार्याः—'उद्भि(१)दवृश्चिकवद्वर्णाः' इति । उद्भि-दस्तण्डुलीयकशाकादयः ते यथाऽऽद्यास्तण्डुलकरणादुत्तरे तण्डुली-यकात् वृश्चिका(२)द्या गोमयादुत्तरे वृश्चिकादेव वर्णा अपि ब्राह्म-णादयः आद्याः समयविशेषसचिवाददृष्टविशेषादुत्तरे ब्राह्मणादिभ्यो जायन्त इत्यर्थः । इदं च प्रलयाङ्गीकर्तृणाम् । अन्यथा तु विश्वामित्रा-दय उदाहर्तव्याः । न चैवं ब्राह्मणादिसामान्येष्वननुगतानि कारणा-न्यसमर्थितान्येवेति शङ्काऽस्त्येव, तेष्वपि तत्तददृष्टविशेषत्वादीनां सा-धारणानां जनकतावच्छेदकत्वात् । नन्वेवमवान्तरकार्यतायां मा-नाभाव इति चेत् मैवं, वन्हौ प्रत्यक्षादिना तृणादीनामिव ब्राह्मणा-दिष्वपि स्मृत्यादिना ब्राह्मणादीनामननुगतानां कारणताबोधनादिति गौतमीयादयः । अननुगतेषु कारणेष्वेकजातीयशक्त्यभ्युपगमान्नाऽन-नुगमशङ्कापीति जैमिनीया इति कृतमतिप्रसक्तानुप्रसक्त्या ॥ ९६ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने वर्णजातिप्रकरणम् ।

(मिता०) सवर्णेभ्यः सवर्णासु जायन्त इत्यादिना वर्णप्राप्तौ कारणमुक्तम् । इदानीं कारणान्तरमाह—

जात्युत्कर्ष इति । जातयो मूर्धावसिक्ताद्यास्तासामुत्कर्षो ब्राह्म-णत्वादिजातिप्राप्तिर्जात्युत्कर्षो युगे जन्मनि सप्तमे पञ्चमे अपिशब्दा-त्षष्ठे वा बोद्धव्यः । व्यवस्थितश्चायं विकल्पः । व्यवस्था च—ब्रा-ह्मणेन शूद्रायामुत्पादिता निषादी, सा ब्राह्मणेनोढा दुहितरं काञ्चि-ज्जनयति, सापि ब्राह्मणेनोढान्यां जनयतीत्यनेन प्रकारेण षष्ठी सप्तमं ब्राह्मणं जनयति । ब्राह्मणेन वैश्यायामुत्पादिता अम्बष्ठा । साप्यनेन

(१) उद्भिद्-इति ख० पु० पाठः ।

(२) वृश्चिकाश्चाऽऽद्या गोमयादुत्तरे-इति क० पुस्तके नास्ति ।

प्रकारेण पञ्चमी प(१)ष्ठं ब्राह्मणं जनयति । मूर्धावसिक्ताप्यनेन प्रकारेण चतुर्थी पञ्चमं ब्राह्मणमेव जनयति । एवमुग्रा क्षत्रियेणोढा माहिष्या च यथाक्रमं षष्ठं पञ्चमं च क्षत्रियं जनयति । यथा करणी वैश्येोढा पञ्चमं वैश्यमित्येवमन्यत्राप्यूहनीयम् । किञ्च कर्मणां व्यत्यये वृत्त्यर्थानां कर्मणां विपर्यासे यथा ब्राह्मणो मु(२)ख्यया वृत्त्या अजीवन् क्षात्रेण कर्मणा जीवेदित्यनुकल्पः । तेनाप्यजीवन् वैश्यवृत्त्या तयाप्यजीवन् शूद्रवृत्त्या । क्षत्रियोऽपि स्वकर्मणा जीवनार्थेनाजीवन् वैश्यवृत्त्या शूद्रवृत्त्या वा । वैश्योऽपि स्ववृत्त्याऽजीवन् शूद्रवृत्त्येति कर्मणां व्यत्ययः । तस्मिन् व्यत्यये सति यद्यापद्विमोक्षेऽपि तां वृत्तिं न परित्यजति तदा स(३)प्तमे षष्ठे पञ्चमे वा जन्मनि साम्यं यस्य हीनवर्णस्य कर्मणा जीवति तत्समानजातित्वं भवति । तद्यथा-- ब्राह्मणः शूद्रवृत्त्या जीवंस्तामपरित्यजन् यदि पुत्रमुत्पादयति सोपि तयैव वृत्त्या जीवन्पु(४)त्रान्तरमित्येवं परम्परया सप्तमे जन्मनि शूद्रमेव जनयति । वैश्यवृत्त्या जीवन् षष्ठे वैश्यम् । क्षत्रियवृत्त्या जीवन् पञ्चमे क्षत्रियम् । क्षत्रियाऽपि शूद्रवृत्त्या जीवन् षष्ठे शूद्रम् । वैश्यवृत्त्या जीवन् पञ्चमे वैश्यम् । वैश्योऽपि शूद्रवृत्त्या जीवंस्तामपरित्यजन्पुत्रपरम्परया पञ्चमे जन्मनि शूद्रं जनयतीति । पूर्ववच्चाधरोत्तरम् । अस्यार्थः—वर्णसङ्करे अनुलोमजाः प्रतिलोमजाश्च दर्शिताः । सङ्कीर्णसङ्करजाताश्च रथकारनिदर्शनेन दर्शिताः । इदानीं व(५)र्णसङ्कीर्णसङ्करजाताः प्रदर्श्यन्ते । अधरे च उत्तरे च अधरोत्तरं यथा मूर्धावसिक्तायां क्षत्रियवैश्यशूद्रैरुत्पादितास्तथाम्बष्ठायां वैश्यशूद्राभ्यां निषाद्यां शूद्रेणोत्पादिता अधराः प्रतिलोमजास्तथा मूर्धावसिक्ताम्बष्ठानिषादीषु ब्राह्मणेनोत्पादिताः, माहिष्योग्रयोर्ब्राह्मणेन क्षत्रियेण चोत्पादिताः, करण्यां ब्राह्मणेन क्षत्रियेण वैश्येन चोत्पादिताः उत्तरे अनुलोमजाः । एवमन्यत्राप्यूहनीयम् । एतदधरोत्तरं पूर्ववदसत्सदिति बोद्धव्यम् ॥ ९६ ॥

इति वर्णजातिविवेकप्रकरणम् ।

---

(१) सप्तमं क० । (२) ब्राह्मणवृत्त्या ग० । (३) पञ्चमे षष्ठे सप्तमे ख० ।
(४) पुनरप्येव ख० । (५) वर्णसंकरजाताः ख० ।

(वी० मि०) गृहस्थस्य धर्मेषु प्रदर्शनीयेषु बहुतमधर्मोपयोगित्वेन प्रथमतः सप्रपञ्चो विवाहो दर्शितः, इदानीं धर्मान्तराण्यनुक्रमिष्यन्नग्निसाध्ये कर्मणि व्यवस्थामाह—

कर्म स्मार्तं विवाहाऽग्नौ कुर्वीत प्रत्यहं गृही ॥
दायकालाहृते वाऽपि श्रौतं वैतानिकाग्निषु ॥ ९७ ॥

स्मार्तमप्रचुरश्रुतिमूलकस्मृतिबोधितं कर्म, गृह्योक्तपाकयज्ञसायम्प्रातर्होमाष्टकादि लौकिकं च यत् प्रत्यहं कर्म पाकलक्षणं तदपि । गृही गृहस्थाश्रमी 'द्विजः' इत्यग्रे वाच्यमिहाप्यन्वेति । वैवाहिके विवाहसमयगृहीते विवाहसंस्कृते वा तदसम्भवे दायविभागकालगृहीते वाऽग्नावावसथ्याख्ये कुर्यादित्यर्थः । तथा च पारस्करः—'आवसथ्याधानान्तरकाले दायाद्यकाल एकेषा'मिति । दारकाले पाणिग्रहणोत्तरकाले दायविभागोत्तरकाले, अपिशब्दात् प्रेते वा हृते । एतेनाऽग्न्याधाने त्रयः काला दर्शितास्तदतिक्रमे प्रायश्चित्तमिति मन्तव्यम् । अत्र मनुः

वैवाहिकेऽग्नौ कुर्वीत गृह्यं कर्म यथाविधि ।
पञ्चयज्ञविधानं च पक्तिं चाऽन्वाहिकीं गृहे ॥

श्रौतमिति । प्रचुरश्रुतिप्रतिपादितमग्निहोत्रदर्शपूर्णमासादि कर्म वैतानिकाग्निषु वितानं यज्ञविस्तरः तत्प्रयोजकेषु गार्हपत्याहवनीयदक्षिणाग्निषु कुर्वीतेत्यर्थः । एतच्च श्रौतकर्मणां गृह्यकर्मणां च विधायकेभ्यः कल्पसूत्रेभ्यो गृह्यसूत्रेभ्यः प्राप्तमेव धर्मशास्त्रपुराणादिविहितानां ग्रहयज्ञादिकर्मणां वैवाहिकश्रौताग्निसम्बन्धनिवृत्त्यर्थमनूद्यते इति केचिदाहुः ॥ ९७ ॥

(मिता०) श्रौतस्मार्तानि कर्माणि अग्निसाध्यानि दर्शयिष्यन् कस्मिन्नग्नौ किं कर्तव्यमित्याह—

कर्मेति । स्मृत्युक्तं वैश्वदेवादिकं कर्म लौकिकं च यत्प्रतिदिनं पाकलक्षणं तदपि गृहस्थो विवाहाग्नौ विवाहसंस्कृते कुर्वीत । दाय काले विभागकाल (१)आहृते वा । 'वैश्यकुलादग्निमानीय' इत्यादिनोक्तसंस्कारसंस्कृते । अपिशब्दात्प्रेते वा गृहपतावाहृते संस्कृते एव । ततश्च कालत्रयातिक्रमे(२) प्रायश्चित्तीयते । श्रुत्युक्तमग्निहोत्रादिकं कर्म वैतानिकाग्निषु आहवनीयादिषु कुर्वीत ॥ ९७ ॥

(१) आहृत आहितः । (२) तिक्रमेण प्राय: ग० ।

(वी० मि०) अथ गृहस्थधर्मेष्वभ्यर्हितत्वादिदानीमाह्निकाऽहोरात्रकृत्यानां यथापूर्वं वक्तव्यत्वेन रात्रिविशेषभागात्मकब्राह्ममुहूर्तकृत्यं प्रबोधादिसर्वशेषे वक्तुमुचितमिति दिनप्रवृत्तिसमयकृत्यां शरीरचिन्तामेवोपक्रम्य तदाह 'शरीरचिन्तां निर्वर्त्य' इत्यादिनी 'यथाशक्ति न हापये'दित्यन्तेन--

शरीरचिन्तां निर्वर्त्य कृतशौचविधिर्द्विजः ॥
प्रातःसन्ध्यामुपासीत दन्तधावनपूर्विकाम्(१) ॥ ९८ ॥

शरीरे चिन्ता 'वेगो वर्तते' इत्यादिनिदानविषयिणी यस्याः क्रियायास्तां मैत्रादिरूपां 'दिवा सन्ध्यास्वि'त्याद्युक्तविधिना कृत्वा । 'गृहीतशिश्न' इत्याद्युक्तरीत्या कृतः शौचस्य विधिः प्रकारो मृज्जलग्रहणादिरूपो येन सः । कृतशौच इति वाच्ये विधिग्रहणं (२)शरीरशुद्धिहेतोः स्नानादेरप्युपग्रहाय । प्रातः पूर्वोक्तसमये सन्ध्यामुपासीत कुर्यात्प्रागुक्तविधिनैव । अनुक्तं तु विशेषमाह दन्तेति । दन्तधावनं पूर्वं यस्याः तादृशीं सन्ध्यां कर्मकलापविशेषरूपाम् । इह ब्रह्मचर्यादिप्रकरणोक्तानां गृहस्थादेरपि गृहस्थादिप्रकरणोक्तानां च ब्रह्मचर्यादेरपि धर्मत्वेन स्मृत्यन्तरेऽभ्यनुज्ञातानामविशेषणोभयत्राऽन्वयं विवक्षन्नपि महर्षिर्य(३)त्क्वचित्प्रकरणे कांश्चिदेव, कांश्चित्तु प्रकरणान्तर एव दर्शयति । सेयं पुराणाचार्याणां ग्रन्थलाघवादिलक्षणं किञ्चित् सौष्ठवमपि सन्दधतां शैलीति । शरीरचिन्तादिकं प्रागुक्तमिहापि प्राप्यत एव । ब्रह्मचारिधर्मानितरत्राऽऽदिशन् गौतमः-'इतरेषां चैतदविरोधी'ति तद्बीजमविरोधमेव पुरस्करोति यद्यपि, तथाप्यादेशापेक्षयोपदेशस्य लघूपायत्वमेव प्रकृते पुरस्कृत्य उक्तमप्युपदिशति। प्रदर्शितलाघवयोस्तु क्वचित्कस्याचिदेव पुरस्कारे विनिगमनाविर्जं स्वयमुत्प्रेक्षणीयं सूक्ष्मेक्षिभिरिति ।

केचित्तु शरीरचिन्ताद्यनुवादेन दन्तधावनपूर्वकत्वमात्रमिह प्रातःसन्ध्यायां विधीयते ब्रह्मचारिण्यप्राप्तत्वात् ।

खट्वासनं च शयनं वर्जयेत् दन्तधावनम् ।

(१) पूर्वकम्--इति ख० पुस्तके पाठः ।
(२) शरीरशुद्धिग्रहणं--इत्यधिकं ख० पुस्तके वर्तते ।
(३) किञ्चित्--इति ख० पुस्तके पाठः ।

इति तस्य दन्तधावननिषेधात् । अनुवादप्रयोजनन्तु दन्तधावनस्य स्थानविशेषनियमनमेवेत्याहुः । अत्र—

यथाऽहनि तथा प्रातर्नित्यं स्नायादनातुरः ।
दन्तान् प्रक्षाल्य नद्यादौ गेहे चेत्तदमन्त्रवत् ॥

इति कात्यायनात् । प्रथमं दन्तधावनं ततः प्रातःस्नानं ततः प्रातःसन्ध्येति क्रमो लभ्यते, तद्बोधनार्थमेव दन्तान् प्रक्षाल्येति दन्तधावनपूर्विकामिति च । न तु स्नाने सन्ध्यायां च दन्तधावनस्याऽङ्गत्वप्रतिपत्तये ।

मुखे पर्युषिते नित्यं भवत्यप्रयतो नरः ।
तस्मात्पूर्वं प्रयत्नेन भक्षयेद्दन्तधावनम् ॥

इति शातातपेनाऽऽचमनवत् स्वतन्त्रस्यैव दन्तधावनस्य शुद्धिहेतुताऽभिधानात् । अत एव—

अलाभे दन्तकाष्ठानां प्रतिषिद्धे तथाऽहनि ।
अपां द्वादशगण्डूषैर्मुखशुद्धिर्विधीयते ॥

इति नारसिंहे दन्तकाष्ठाऽलाभे प्रकारान्तरेण शुद्धिरुक्ता । तस्मात् 'क्त्वादेरिह त्रिवृत्ता यूयं परिहरन्त्रिवृत्ता यूयं परिवीयाऽऽग्नेयं पशुमुपाकरोती'त्यत्रेव कालमात्रे तात्पर्यं न त्वङ्गत्वेऽपि । तथा च भगवान् जैमिनिः—'कृतार्थयोः संयोगयोः' इति ।

यत्र तु प्रयोजनं साकाङ्क्षं सन्निराकाङ्क्षस्य सन्निधौ पठ्यते तत्रैव क्त्वादेरङ्गाङ्गिभावे पर्यवसानम् । यदाहुः—'फलवत्सन्निधावफलं तदङ्ग'मिति । अत्र शयनादुत्थानं, रात्रिवासस्त्यागः, वासोयुगान्तरपरिधानं, पादहस्तमुखनेत्रप्रक्षालनं, द्विराचमनं, सति वेगे मूत्रपुरीषोत्सर्गः, यथाविधि शौचं, द्विराचमनं ततो दन्तधावनमिति क्रमः । तथा च कात्यायनः—

उत्थाय नेत्रे प्रक्षाल्य शुचिर्भूत्वा समाहितः ।

महाभारते—

प्रक्षाल्य हस्तौ पादौ च मुखं च सुसमाहितः ।

दक्षः—

उषःकाले तु सम्प्राप्ते शौचं कुर्या(१)द्यथार्थवत् ।

---

(१) कृत्वा यथार्थवत्—इति ख० पुस्तके पाठः ।

कात्यायनः—

परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ।
आयुर्बलं यशो वर्चः प्रजापशुवसूनि च ॥
ब्रह्म प्रज्ञां च मेधां च त्वं नो धेहि वनस्पते ।

मन्त्रेण 'आयुर्बल'मित्यादिना वक्ष्यमाणेन । अत्र—

दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वन्तरे ततः ।
प्राङ्मुखश्चोपविष्टश्च भक्षयेद्वाग्यतो नरः ॥

इति भारते ।

कनीन्यग्रसमस्थौल्यं सकूर्चं द्वादशाङ्गुलम् ।
प्रातर्भुक्त्वा च यतवाक् भक्षयेद्दन्तधावनम् ॥

इति विष्णुपुराणादौ च भक्षयेदिति, 'दन्तधावनमद्यादुदङ्मुखः प्राङ्मुखो वे'ति विष्णुसूत्रादावद्यादिति च दन्तघर्षणमात्रपरं गौणं पूर्वोक्ताऽचमनादिरूपभोजनधर्मप्राप्त्यर्थम् । 'उपसद्भिश्चरित्वा मासमग्निहोत्रं जुहोती'ति कौडपायिनामयनेऽग्निहोत्रधर्मप्राप्त्यर्थमग्निहोत्रपदवत् । अत एव—

प्रक्षाल्य भुक्त्वा तज्जह्याच्छुचौ देशे प्रयत्नतः ।

इति विष्णुना पश्चाद्दन्तधावनकाष्ठस्य त्याग उक्तः । अत एव—

नारदाद्युक्तवार्क्षयमष्टाङ्गुलमपाटितम् ।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण प्रधावयेत् ॥

इति छन्दोगपरिशिष्टे,

प्रादेशमात्रमथवा तेन दन्तान् विशोधयेत् ।

इति नारसिंहे च विशोधयेत् धावयेदित्येवोक्तम् । कनीनी कनिष्ठा सकूर्चं चूर्णिताग्रं भुक्त्वेति यतिविषयमित्याहुः । नारदाद्युक्तवृक्षाः खदिरादयः । अष्टाङ्गुलमिति, अत्र द्वादशाङ्गुमिति प्रथमः कल्पः प्रादेशमात्रमिति मध्यमः, अष्टाङ्गुलमिति चरमः । केचित्तु—

द्वादशाङ्गुलं विप्राणां क्षत्रियाणां नवाङ्गुलम् ।
अष्टाङ्गुलं तु वैश्यानां शूद्राणां तु षडङ्गुलम् ॥
चतुरङ्गुलमानेन नारीणां विधिरुच्यते ।
अन्तरप्रभवाणां तु षडङ्गुलमुदाहृतम् ॥

इति स्मृतिमञ्जूषालिखितवाक्यानुसारेण व्यवस्थामाहुः । अत्र नानास्मृतिषु दन्तधावने विहितानि खदिराम्रबिल्वाम्रातकापामार्गशि·

रीषतिन्तिणीवेणुपृष्ठवटासनार्ककरञ्जकरवीरशालनिम्बमालत्यर्जुन-कदम्बोदुम्बरकटुतिक्तकषायक्षीर(१)काष्ठानि । विहित(२)निषिद्धानि तु करञ्जतिन्तिणीनिम्बशालवटकाष्ठानि । निषिद्धचोद्धानि तु पलाशकोविदारश्लेष्मातकाबिल्वकतिन्दुकशाकवृ(३)क्षसिन्दुवाराशिखण्डीवेणुगर्भपूषमाषकबदरीशमीशिंशपाकपित्थहरीतक्यश्वकर्णामलकाविभीतकधन्वनपीलुपिप्पलेङ्गुदगुग्गुलुशोभाञ्जनपारिभद्रकदलीशाल्मलीमधुराम्लकाष्ठानि । विहितेष्वपि ओष्ठस्पर्शिग्रान्थिकं (४)वृन्तशुष्कं सच्छिद्रं (५)पूतिगन्धि चिक्कनं त्वग्विहीनं पाटितं सद्यश्छिन्नं सपत्रं रक्तकीटाग्निदूषितमशुच्यपरिचितं च निषिद्धम् । अत्र व्यवस्था—मुख्यतो विहितमुपादेयं तदलाभे विहितनिषिद्धं, तदलाभेऽप्यविहितानिषिद्धं सर्वथा नोपादेयम् । आद्यत्रयालाभे द्वादशगण्डूषैरेव शुद्धिः ।

अलाभे दन्तकाष्ठानां प्रतिषिद्धे तथाऽहनि ।

इत्यादिलिखितनरसिंहपुराणात् । प्रतिषिद्धे प्रतिपदादौ । अत्र नरसिंहपुराणम्—

प्रतिपद्दर्शषष्ठीषु नवम्यां चैव सत्तमाः ।
दन्तानां काष्ठसंयोगो दहत्यासप्तमं कुलम् ॥

महाभारते—पर्वस्वपि च वर्जयेत् । गौडाः—

उपवासे तथा श्राद्धे न खादेद्दन्तधावनम् ।

उपवासे उपवासदिने श्राद्धे श्राद्धदिने । एतद्वचनानुसारिणः सङ्काः श्राद्धादिपूर्वं तदुत्तरं च दन्तधावनं वर्जयन्ति । इहोपवासादौ यत्र दन्तकाष्ठसंयोगो निषिद्धस्तत्र पत्रादिना दन्तमार्जनमावश्यकत्वादेतत्परमेव च ।

गन्धालङ्कारवस्त्राणि पुष्पमाल्यानुलेपनम् ।
उपवासेन दुष्यन्ति दन्तधावनमञ्जनम् ॥

इत्यादिवचनमपीति योगीश्वरः । तदाऽपि द्वादशगण्डूषैरेव सिद्धिः । इदन्तु दन्तधावनानन्तरमकाष्ठकरणकं मङ्गल्यमञ्जनादि सहचर्यादित्यन्ये । अङ्गुल्या दन्तधावनन्तु निषिद्धमेव 'नाऽङ्गुलीभिर्दन्तान् घर्षये'दित्युशनसो वचनादित्यास्तामधिकम् ॥ ९८ ॥

---

(१)क्षीरि-इति ख० पु० पाठः । (२)विहितानिषिद्धानि-इति क० पु० पाठः । (३)वृन्त-इति ख० पु० पाठः । (४)वृक्षशुष्कं-इति क० पु० पाठः । (५) सच्छिद्रं-इति क० पुस्तके नास्ति ।

(मिता०) गृहस्थधर्मानाह—शरीरचिन्तामिति। शरीरचिन्तामावश्य(१)कादिकां 'दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः' इत्याद्युक्तविधिना निर्वर्त्य 'गन्धलेपक्षयकरम्' इत्यादिनोक्तेन विधिना कृतशौचविधिर्द्विजो दन्तधावनपूर्वकं प्रातःसन्ध्यामुपासीत। दन्तधावनविधिश्च—'कण्टकिक्षीरवृक्षोत्थं द्वादशाङ्गुलसंमितम्। कनिष्ठिकाग्रवत्स्थूलं पर्वार्धकृतकूर्चकम्॥ दन्तधावनमुद्दिष्टं जिह्वोल्लेखनिका तथा'॥ इति। अत्र वृक्षोत्थमित्यनेन तृणलोष्टाङ्गुल्यादिनिषेधः। पलाशाश्वत्थादिनिषेधश्च स्मृत्यन्तरोक्तो द्रष्टव्यः। दन्तधावनमन्त्रश्च—'आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च। ब्रह्म प्रज्ञां च मेधां च त्वं नो(२) देहि वनस्पते'॥ इति। ब्रह्मचारिप्रकरणोक्तस्यापि सन्ध्यावन्दनस्य पुनर्वचनं दन्तधावनपूर्वकत्वप्रतिपादनार्थम्, 'दन्तधावननृत्यगीतादि ब्रह्मचारी वर्जये'दिति तन्निषेधात्॥ ९८॥

हुत्वाऽग्नीन् सूर्यदैवत्यान् जपेन्मन्त्रान् समाहितः॥
वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च॥ ९९॥

(वी० मि०) अग्नीनाहवनीयादीन् श्रौतमौपासनं च स्मार्तं स्वशाखानुसारेण हुत्वा हवनक्रियायां (३)कथञ्चिदग्नीनां कर्मत्वं विवक्षित्वा 'पयसाऽग्निहोत्रं जुहोती'त्यादाविव,

सायं प्रातः सदाभ्यस्तं वैतानं जुहुयाद्द्विजः।

इत्यादाविव च द्वितीयानिर्देशः। अयं च होम आहिताग्न्यधिकारिको नित्यो यावज्जीवश्रुतेः। ननु 'अवश्यं ब्राह्मणोऽग्नीनादधीते'-त्यग्न्याधानस्याऽपि नित्यत्वादनाहिताग्नेः शास्त्राऽननुमतत्वात् कथमयं विवेक इति चेत् सत्यं, परं त्वत्कृतदायत्वादिना शास्त्रीयानिमित्तेन लौकिकेन वाऽनाहिताग्निरपि गृहस्थः संभवति। अत एव साग्निनिरग्निपुरस्कारेण भूयांसः शास्त्रे धर्मविकल्पाः। अयं तु विशेषो गृहस्थस्य स्वेच्छामात्रेणाऽग्न्यनाधाने प्रायश्चित्तमिति कल्पसूत्रादौ स्फुटमिति। हुत्वेति सति संभवे स्वयमेव होमः कार्यः। यदाह दक्षः(४)—

सन्ध्याकर्माऽवसाने तु स्वयं होमो विधीयते।

ऋत्विगादिद्वारा तु तदाचरणमनुकल्पः। अत्र सन्ध्याकर्मावसान

(१)आवश्यकी दिशा० क०। (२)नो धेहि ग०।
(३) कश्चिदग्नीनां—इति क० पु० पाठः। (४) दक्षः—इति ख० पु० पाठः।

इत्युक्तेरनुदिते होमिना सूर्योदयात् प्रागेव सन्ध्या समापनीयेति लभ्यते ।

गायत्रीमभ्यसेत्तावद्यावदादित्यदर्शनम् ।

इत्यस्य तदितरपरत्वात् । सूर्योदयादितदस्तपर्यन्तमष्टधा विभक्तस्याऽन्हः प्रथमभागे कृत्यमाह—सूर्यदैवत्यान् सावित्र्यादीन् 'उदुत्यं जातवेदस' इत्यादीन् वा यथाश्रद्धं जपेत् । एतदभिप्रायकमेव बहुवचनं, न तु 'कपिञ्जल'न्यायेन त्रीन् सर्वानेव वाऽऽचारविरोधात् । एतज्जपाकरणपरैव च 'अजपी पूयशोणित'मित्यादि निन्देति केचित् । समाहिततदेकाग्रचित्तत्वादिसकलजपधर्मयोगी । यद्वा समाहितोऽवहितचित्तः । अनेन स्मृत्यन्तरोक्तसदाचारान्तराऽनुपरोधमभिप्रैति । तथा च वाराहे—

उदयाग्निः स्तुतं सूर्यं यस्तु भक्त्या नरो द्विजः ।
दध्यक्षताञ्जलीभिस्तु त्रिभिः सम्पूजयेच्छुचिः ॥
तस्य भावप्रपन्नस्याऽशुभं यत्समुपार्जितम् ।
तत्क्षणादेव निर्दग्धं भस्मीभवति काष्ठवत् ॥

एवं मध्यान्हाविहितेतरदेवपूजा, केशप्रसाधनं, आदर्शादिदर्शनम् ।

स्वमात्मानं घृते पश्येद्यदीच्छेच्चिरजीवितम् ।

इत्युक्ते घृते स्वशरीरदर्शनम्, दूर्वादध्यादि शुभद्रव्यालभनं सौवीराञ्जनादि ।

गोमूत्रं गोमयं सर्पिः क्षीरं दधि च रोचना ।
षडङ्गमेतत्परमं मङ्गलं सर्वदा गवाम् ॥
शृङ्गोदकं गवां पुण्यं सर्वाघे (१)विनिषूदनम् ।

इत्युक्तम् । गोमूत्राद्यालभनादीनि दिनस्य प्रथमभागे कृत्यानि । द्वितीयभागे कृत्यमाह—वेदार्थान् शास्त्राणि व्याकरणनिगमनिरुक्ततर्कमीमांसापुराणभारतादीनि वेदार्थनिर्णायकानि तदनुष्ठानोपयोगीनि शिक्षाकल्पज्योतिषच्छन्दःशास्त्रादीनि । तदेतदुक्तं विविधानीति । अधिगच्छेत् जानीयात् स्वरूपतोऽर्थतश्च । प्रथमचकारेण वेदाभ्यासपरिग्रहः । तथा च दक्षः—

द्वितीये च तथा भागे वेदाभ्यासो विधीयते ।
वेदस्वीकरणं पूर्वं विचारोऽभ्यसनं जपः ॥

---

(१)सर्वाघविनि०—इति ख० पु० पाठः ।

तद्दानं चैव शिष्येभ्यो वेदाभ्यासस्तु पञ्चधा ।
समित्पुष्पकुशादीनां स कालः समुदाहृतः ॥

स्वीकरणमध्ययनम्, एतच्च ब्रह्मचारिणः । गृहस्थस्याऽनधीतभागे । तथा चाऽऽपस्तम्बः—'यया विद्यया न विबाध्येत पुनराचार्यमुपेत्य साधयेत्' । मनुः—

बुद्धिवृद्धिकराण्याशु धन्यानि च हितानि च ।
नित्यं शास्त्राण्यवेक्षेत निगमांश्चैव वैदिकान् ॥
यथा यथा हि पुरुषः शास्त्रं समधिगच्छति ।
तथा तथा विजानाति विज्ञानं चाऽस्य रोचते ॥

बुद्धिवृद्धिराणि तर्कमीमांसादीनि धन्यानि धनाय हितान्यर्थशास्त्राणि हितान्यायुर्वेदादीनि निगमाः पदार्थनिर्णायका निघण्ट्वादयः रोचते दीप्तं भवति । यमः—

दानेन तपसा यज्ञैरुपवासव्रतैस्तथा ।
न तां गतिमवाप्नोति विद्यया यामवाप्नुयात् ॥

विद्यया ब्रह्मविद्ययेति व्याख्यानमशुद्धं शास्त्राऽनुपक्रमे यमाऽभिधानादित्युपाध्यायाः । विविधानि चेति चकारेण समिदाद्युपादानपरिग्रहः ॥ ९९ ॥

(मिता०) हुत्वेति । प्रातःसन्ध्यावन्दनानन्तरं अग्नीनाहवनीयादीन् यथोक्तेन विधिना हुत्वा औपासनाग्निं वा । तदनन्तरं सूर्यदैवत्यान् 'उदुत्यं जातवेदसम्' इत्यादीन्मन्त्रान् जपेत् । समाहितोऽविक्षिप्तचित्तः । तदनन्तरं वेदार्थान्निरुक्तव्याकरणा(१)दीश्च श्रवणेनाऽधिगच्छेज्जानीयात् । चकारादधीतं चाऽभ्यसेत् । विविधानि च शास्त्राणि मीमांसाप्रभृतीनि धर्मार्थारोग्यप्रतिपादकान्यधिगच्छेत् ॥ ९९ ॥

(वी० मि०) तृतीयभागे कृत्यमाह—

उपेयादीश्वरं चैव योगक्षेमार्थसिद्धये ॥
स्नात्वा देवान् पितॄंश्चैव तर्पयेदर्चयेत्तथा ॥ १०० ॥

अलब्धलाभो योगः, लब्धसंरक्षणं क्षेमः, तदुभयरूपोऽर्थः प्रार्थ-

---

(१) करणादिश्रवणेनाधि. ग० ।

नीयस्तन्निर्वाहाय ईश्वरं तन्निर्वाहक्षमं राजानमन्यं वा उपासीत । अर्थग्रहणमावश्यकत्वप्रदर्शनाय । योगादेरन्यथैव सिद्धावप्रार्थनीयत्वे ईश्वरोपासनव्युदासाय च । गौतमः—'योगक्षेमार्थमीश्वरमधिगच्छेन्नाऽन्यमन्यत्र देवगुरुधार्मिकेभ्यः' । अन्यमनीश्वरम् । मनुः—

दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् ।
ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥

एवकारो गच्छेदित्यनन्तरं योज्यः । यद्वा एतद्वाक्योक्तदैवतान्ययोगव्यवच्छेद एवकारार्थः ।

नरं च नारायणमेव चादौ सुतः सुतौ द्वौ जनयाम्बभूव ।

इत्यत्र नरनारायणान्ययोगव्यवच्छेदवत् । एवं च मूलवाक्येऽप्येवकार उ(१)त्तरार्धे एवेति मन्तव्यम् । चकाराद्यथा—श्रुतक्रमात् दैवतादेरुपायाच्चेति योजितात् पोष्यवर्गार्थसाधनादेः समुच्चयः । तथा दक्षः—

तृतीये च तथा भागे पोष्यवर्गार्थसाधनम् ।

पोष्यवर्गः—

माता पिता गुरुर्भ्राता प्रजा दीनः समाश्रितः ।
अभ्यागतोऽतिथिश्चाऽग्निः पोष्यवर्ग उदाहृतः ॥

इत्युक्तः । तस्याऽर्थसाधनं धनोपार्जनं कुर्यादिति शेषः ।

लोकेऽस्मिन्मङ्गलान्यष्टौ ब्राह्मणो गौर्हुताशनः ।
हिरण्यं सर्पिरादित्य आपो राजा तथाऽष्टमः ॥
एतानि सततं पश्येन्नमस्येच्चाऽर्चयेच्च यः ।
प्रदक्षिणं च कुर्वीत तथाऽस्याऽऽयुर्न हीयते ॥

एतानि ब्राह्मणादिदर्शनादीनि तृतीयभाग (२)एव कर्तव्यत्वेन विहितानि । दिनाद्यभागे तु केवलं मङ्गलाद्यालभनमिति मिश्राः । चतुर्थभागकृत्यमाह सार्द्धश्लोकेन । स्नात्वेति स्नात्वा चतुर्थभागे । यदाह दक्षः—

चतुर्थे च तथा भागे स्नानार्थं मृदमाहरेत् ।
समित्पुष्पकुशादीनि स्नानं चाऽकृत्रिमे जले ॥

मृदम्—

शुचौ देशे तु सङ्ग्राह्या शर्कराश्मादिवर्जिता ।
रक्ता गौरी तथा श्वेता मृत्तिका त्रिविधा स्मृता ॥

---

(१) उक्तार्थ–इति क० पु० पाठः ।

(२) 'एवे'त्यादिः 'चतुर्थभागे'त्यन्तो ग्रन्थः क० पुस्तके नास्ति ।

इत्याद्युक्ताम्।

वल्मीकाखूत्करालेपाज्जलाच्च पार्थिवृक्षयोः ।
कृतशौचावशिष्टा हि न ग्राह्याः सप्त मृत्तिकाः ॥
न मृदं नोदकं वाऽपि न निशायां तु गोमयम् ।
न गोमूत्रं प्रदोषे तु गृह्णीयाद् बुद्धिमान्नरः ॥

इति शातातपीये।

मृत्तिकाः सप्त न ग्राह्याः वल्मीके मूषकोत्करे ।
अन्तर्जले श्मशाने च वृक्षमूले सुरालये ॥

इति दक्षीयादिनिषेधाऽस्पृष्टां, विहितालाभेऽन्यामपि।

येषु स्थानेषु यच्छौचं धर्माचारश्च यादृशः ।
तत्र तन्नाऽवमन्येत धर्माचारश्च तादृशः ॥
येषु देशेषु ये देवा येषु देशेषु ये द्विजाः ।
येषु स्थानेषु यत्तोयं या च यत्रैव मृत्तिका ॥

इति मरीचिवचनात्। समिधः प्रसङ्गादुक्ताः। पुष्पाणि सुरभीणि। कुशान् स्मृत्यन्तरे विहितान्। आदिपदात्प्रकृष्टतिलान्।

अमेध्यसेविनी वन्ध्या प्रसूतानां च गोमयम् ।
जीर्णायाश्चोपलेपार्थं न हर्तव्यं कदाचन ॥

इति शाण्ड्यायनादिनिषेधास्पृष्टमनिशाहृतमार्द्रं गोमयं च। अकृत्रिमे परकारितजलाशयासम्बन्धिनि नद्यादौ। तथा च विष्णुः—'परकीयनिपातेषु न स्नानमाचरेद्वा पञ्च पिण्डानुद्धृत्याऽऽपदि'। आपदि जलान्तरस्नानाऽसम्भवे। पञ्च पिण्डानिति सेतुकूपातिरिक्तजलाशये।

निबद्धासु च मृत्पिण्डान् कूपात्तु त्रीन् घटांस्तथा ।

इति बौधायनात्। पिण्डश्च योग्यश्रीफलप्रमाणकः। पिण्डपदान्निरुपधेस्तथैवाऽवगमादिति मिश्राः। हस्ताभ्यां यावानुद्धर्तुं शक्यते तावानिति रत्नाकरादयः। अत्राऽप्रतिष्ठितमात्रे पिण्डाद्युद्धारस्त(१)स्यैव परकीयत्वादिति प्राञ्चः। तत्र 'अनुत्सृष्टं तु मूत्रव'दित्यादिवचनैस्तस्याऽकर्मण्यत्वनिर्द्धारात्। परस्योपयोगे चौर्यापत्तेः।

(१) तथैव-इति क० पु० पाठः।

परकीयनिपातेषु न स्नायाद्धि कदाचन।
निपानकर्तुः स्नात्वा हि दुष्कृतांशेन लिप्यते॥

इति मनुवचनात्। परकृतानीति पैठीनसिबौधायनाऽनुसारेणापि परकृतत्वरूपपरकीयत्वाऽवगमाच्च। अत एव स्वकारितेषु पिण्डघटोद्धारो नास्तीत्युपाध्यायाः। कल्पतरुरत्नाकरादयोऽप्येवम्। मिश्रास्तु-सत्रदक्षिणाबाधं सिद्धान्तसिद्धं दृष्टान्तीकुर्वाणास्तिर्यगधिकरणविरोधेन स्वत्यक्ते स्वोपादानं नाऽनुमन्यन्ते। तच्चिन्त्यमिति कृतं प्रसक्तानुप्रसक्त्या। स्नानं चेति चकारात्स्मृत्यन्तरानिषिद्धे देशे काले च स्नानं कार्यमिति शेषः। तत्र तावद्देशकालेतिकर्तव्यताविशेषविवेकाय स्मृतौ स्नानानि विभक्तानि। तथा च शङ्खः—

स्नानं तु द्विविधं प्रोक्तं मुख्यगौणप्रभेदतः।
तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधं भवेत्॥
नित्यं नैमित्तिकं काम्यं क्रियाङ्गं मलकर्षणम्।
क्रियास्नानं तथा षष्ठं षोढा स्नानं प्रकीर्तितम्॥
अस्नातस्तु पुमान्नाऽर्हो जप्याग्निहवनादिषु।
प्रातःस्नानं तदर्थं तु नित्यस्नानं तदुच्यते॥
चण्डालशवपूयादि स्पृष्ट्वाऽस्नातां रजस्वलाम्।
स्नानार्हस्तु यदा स्नाति स्नानं नैमित्तिकं हि तत्॥
पुष्य(१)स्नानादिकं यत्तु दैवज्ञविधि(२)चोदितम्।
तद्धि काम्यं समुद्दिष्टं नाऽकामस्तत्प्रयोजयेत्॥
जप्तुकामः पवित्राणि अर्चिष्यन्देवताः पितॄन्।
स्नानं समाचरेद्यत्तु क्रियाङ्गं तत्प्रकीर्तितम्॥
मलापकर्षणं नाम स्नानमभ्यङ्गपूर्वकम्।
मलापकर्षणार्थन्तु प्रवृत्तिस्तत्र नाऽन्यथा॥
सरस्सु देवखातेषु तीर्थेषु च नदीषु च।
क्रियास्नानं समुद्दिष्टं स्नानं तत्र क्रिया मता॥

वारुणमेकस्मिन् काले बहिरवच्छेदेन सर्वाङ्गजलसंयोगः। 'अद्भिर्वारुणमुच्यते' इति हारीतात्। 'वारुणं चाऽवगाह्यम्' इति शङ्खोक्ते-

(१) पुष्पहस्तादिकं यत्तु—इति क० पु० पाठः।
(२) दैवज्ञमिति चो०—इति क० पु० पाठः।

रपि तन्मात्रपरत्वात् । अन्यथोद्धृतजलस्नानाऽसङ्ग्रहात् । प्रातःस्नानमित्यादि परिभाषामात्रमतो नित्यस्याऽपि मध्याह्नस्नानस्य क्रियाङ्गत्वेनोक्तस्याऽत्र सङ्ग्रहो न दोषाय । गौणस्नानान्याह योगी—

असामर्थ्याच्छरीरस्य कालशक्त्याद्यपेक्षया ।
मन्त्रस्नानादितः सप्त एक इच्छन्ति सूरयः ॥
मान्त्रं भौमं तथाऽऽग्नेयं वायव्यं दिव्यमेव च ।
वारुणं मानसं चैव सप्तस्नानी प्रकीर्तिता ॥
'आपोहिष्ठे'ति वै मान्त्रं मृदालम्भस्तु पार्थिवम् ।
आग्नेयं भस्मना स्नानं वायव्यं गोरजः स्मृतम् ॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
वा(१)रुणं चाऽवगाह्यं स्यान्मानसं विष्णुचिन्तनम् ॥
शस्तं स्नानं यथोद्दिष्टं मन्त्रस्नानक्रमेण तु ।
देशात्कालादसामर्थ्यात् सर्वं तुल्यफलं स्मृतम् ॥

एवं च गौणमपि स्नानं षोढैव । मुख्यं तु वारुणमन्तर्भाव्य सप्तेत्युक्तम् ।

अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम् ।
आर्द्रेण वाससा वाऽपि मार्जनं दैहिकं विदुः ॥

इति जाबालादिभिरशिरस्कादिकान्यधिकान्यपि गौ(२)णानि स्नानान्युक्तानि । गौणानि योगिनोक्तानि षोढैव । एतानि तु गौणमुख्यपरिभाषानाक्रान्तानि पृथगेवेति केचित् । वारुणस्य चाऽयं विभागः प्रपञ्चार्थं, तेन—

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणं तु भवेत्तस्य अङ्गत्वेन प्रकीर्तितम् ॥

इति ब्रह्मपु(३)राणेन न विरोधस्तत्र त्रिष्वेव सर्वान्तरभावनात् । नित्यं प्रातर्मध्यान्हयोः । नैमित्तिकमुपरागादौ । काम्यं तीर्थादौ । एषां क्रमेणोपदेशः पूर्वपूर्वस्योत्तरोत्तरेण प्रसङ्गसिद्धिज्ञापनार्थः । तथा नित्ये पापानुत्पत्तिः फलम् । काम्ये स्वर्गादिः । तयोर्मध्ये नैमित्तिकस्य पाठस्तदुभयफलप्राप्त्यर्थ इत्यभिनववर्द्धमानादयः । गौणविभागस्तु

(१) 'वारुण'मित्यादि पद्यमेकं नास्ति ख० पुस्तके ।
(२) गौणानि स्नानान्युक्तानि-इति क० पुस्तके नास्ति ।
(३) जल-इति ख० पु० पाठः ।

न्यूनसङ्ख्याव्यवच्छेदमात्रपरः स्मृत्यन्तरानुसारात्। तथा च जावा(१)लः—

अशिरस्कं भवेत्स्नानं स्नानाशक्तौ तु कर्मिणाम्।
आर्द्रेण वाससा वाऽपि दैहिकं मार्जनं विदुः॥

दैहिकं बहिरवच्छेदेन देहव्यापकम्। स्नानाऽनुकल्पप्रकारेण ब्रह्मपुराणम्—

दक्षिणावर्तशङ्खेन पात्र औदुम्बरे स्थितम्।
उदकं यः प्रतीक्षेत शिरसा हृष्टमानसः॥
तस्य जन्मकृतं पापं तत्क्षणादेव नश्यति।

व्यासः—

श्रूयन्ते यानि तीर्थानि त्रिषु लोकेषु नित्यशः।
अभिषेकः समस्तेषां गवां शृङ्गोदकेन च॥

एतच्छक्ताशक्तसाधारणमिति केचित्। तथा—

स चैवाऽवभृथे स्नातः स च गङ्गाजलाप्लुतः।
विष्णुपादोदकं शङ्खे कृत्वा यः स्नाति मानवः॥

तत्र स्नानदेशमाह मनुः—

नदीषु देवखातेषु तडागेषु सरस्सु च।
स्नानं समाचरेन्नित्यं गर्तप्रस्र(२)वणेषु च॥

देवखातेषु तडागेषु देवसम्बन्धितया प्रसिद्धेषु इति रत्नाकरः। देवखातेषु सूर्यादिसमीपगतेषु शिवलिङ्गाश्रमखातेषु वा।

शिवलिङ्गसमीपस्थं यत्तोयं पुरतः स्थितम्।
शिवगङ्गेति सा ज्ञेया तत्र स्नानाद्दिवं व्रजेत्॥

इति भविष्यादित्युपाध्यायाः। सरः तल्ल इति प्रसिद्धो जलाशयः। अल्पगर्त इति कल्पतरुः। गर्तः—

धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते।
न ता नदीशब्दवहा गर्तास्ते परिकीर्तिताः॥

इति छन्दोगपरिशिष्टे लक्षितः। प्रस्रवणं निर्झरः। विष्णुः—'स्नायात्प्रस्रवणनदीदेवखातसरोवरेषूद्धृताद् भूमिष्ठमुदकं पुण्यं, स्थावरात्प्रस्रवत्

(१) जाबालिः—इति क० पु० पाठः। (२) प्रश्रवणेषु—इति क० पु० पाठः।

तस्मान्नादेयं, तस्मादपि साधुपरिगृहीतं, सर्वत एव गाङ्गम्' । साधवः श्रीरामादयस्तत्परिगृहीतं चित्रकूटादौ मन्दाकिन्यादि । शङ्खः—

सर्वतीर्थानि पुण्यानि पापघ्नानि तथा नृणाम् ।
परम्पराऽनपेक्षाणि कथितानि मनीषिभिः ॥
सर्वे प्रस्रवणाः पुण्याः सर्वे पुण्याः शिलोच्चयाः ।
नद्यः पुण्याः सदा सर्वा जाह्नवी तु विशेषतः ॥
नृणां पापकृतां तीर्थे पापस्य शमनं भवेत् ।
यथोक्तफलदं तीर्थं भवेच्छुद्धात्मनां नृणाम् ॥

योगी—

त्रिरात्र(१)फलदा नद्यो याः काश्चिदसमुद्रगाः ।
समुद्रगास्तु मासस्य पक्षस्य सरितां पतिः ॥

विष्णुपुराणे—

कूपेषूद्धृततोयेन स्नानं कुर्वीत वै भुवि ।
स्नायीतोद्धृततोयेन यदि वा भुव्यसम्भवे ॥

कूपेष्विति पञ्चम्यर्थे सप्तमी । कूपसम्बन्धिना उद्धृतेन तोयेन भुव्युपविष्टः स्नायादिति प्रथमखण्डार्थः । अन्यत्राऽपि जलाशयेऽपि प्रविश्य स्नानासम्भवे एवमेवेति द्वितीयखण्डार्थः । पाद्मे—

अनुद्धृतैरुद्धृतैश्च (२)जलैः स्नानं समाचरेत् ।

शङ्खः—

स्नातस्य वह्नितप्तेन तथैव परवारिणा ॥
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं भवे(३)त् ॥

परवारिणा परकृतजलाशयसम्बन्धिना परोपाहृतेन च जलेन स्नानफलं स्वर्गादि । एतच्च विशेषवचनाभावे द्रष्टव्यम् । दक्षः—

मलापकर्षणं तीरे मन्त्रवत्तु जले स्थितम् ।
सन्ध्यास्नानमुभाभ्यां तु स्नानदेशाः प्रकीर्तिताः ॥

मलापकरणस्नानं तीर एव, मन्त्रस्नानं जल एव कर्माङ्गभयान्यतरकार्यमित्यर्थः । निषिद्धं देशमाह योगी—

---

(१) त्रिरात्रि-इति क० पु० पाठः ।

(२) र्वा—इति ख० पु० पाठः । (३) लभेत्—इति ख० पु० पाठः ।

प्रभूते विद्यमाने तु उदके सुमनोहरे ।
नाल्पोदके द्विजः स्नायान्नदीं चोत्सृज्य कृत्रिमे ॥

नदीमकृत्रिमजलाम् । छन्दोगपरिशिष्टे—

यन्मासद्वयं श्रावणादि सर्वा नद्यो रजस्वलाः ।
तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगाः ॥
उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
सूर्यचन्द्रग्रहे चैव रजोदोषो न विद्यते ॥

श्रव्यो मासः स कृष्णादिरिति हरिनाथोपाध्यायाः । शुक्लादिरिति बहवः ।

सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः ।

इति मनुवचनैकमूलकत्वात् । सौरोऽत्र मास इति तत्त्वम् । समुद्रगा गङ्गाद्या एकादश ।

आदौ कर्कटके देवी त्र्यहं यावद्रजस्वला ।
चतुर्थेऽहनि सम्प्राप्ते शुद्धा भवति जाह्नवी ॥
तपनस्य सुता गङ्गा गोमती च सरिद्वरा ।
रजसा न प्रदुष्यन्ति ये चाऽन्ये नदसंज्ञकाः ॥

इति वचनद्वयं प्रचरदपि संहितास्वदर्शनान्महाजनापरिग्रहाच्च नाऽऽद्रियन्ते । अत्र 'रजस्वला' इति 'तासु स्नानं न कुर्वीते'ति हेतुमन्निगदात् स्नानाऽनर्हत्वमात्रं विवक्षितम् । तत्राचमनाद्यनर्हत्वमपीति सम्प्रदायः । एवं च तास्वित्युक्तेर्नदीं प्रविश्यैव स्नानं निषिद्धं न तु तज्जलेनाऽपीत्यपि वदन्ति । पराशरः—

आचान्तमनुगर्ते वा निशि स्नानं न विद्यते ।
स्नानमाचमनं प्रोक्तं दिवोद्धृतजलेन च ॥

निशि अनुगर्ते जलाशयं प्रविश्य आचान्तमाचमनस्नानं वा न कर्तव्यमित्यर्थः । स्नानं चात्राऽप्रायत्यनिमित्तकमभिमतं, 'कथं शुद्धिर्विधीयते' इत्युपक्रमात् । तेन चाऽत्रोपरागादौ निशि जलाशयं प्रविश्य स्नानं निराबाधमिति स्मर्तव्यम् । योगी—

अग्राह्या आगता आपो नद्याः प्रथमवेगिकाः ।
प्रक्षोभिताश्च केनाऽपि याश्च तीर्थाद्विनिःसृताः ॥

प्रथमवेगिकाः शुष्कनद्यां प्रथमप्रवाहरूपाः । अत एव नद्या

इति प्राक् शुष्काया (१) इति कल्पतरुः । केनाऽपि महिषादिना प्रक्षोभिता आविलीकृताः । तीर्थात् गङ्गाया(२)त् । निस्सृता न तु निःसारिताः । विशब्देन प्रवाहसामान्याद्विच्छेदमभिप्रैति । शिष्टाचारोपष्टम्भाच्चैवं व्याख्यातमिति मन्तव्यम् । तीर्थाद्विनिःसृतास्तीर्थत्वेनाऽज्ञायमाना इति कल्पतरुः । पठन्ति चाऽत्र—

गङ्गातो निःसृतं तोयं पुनर्गङ्गां न गच्छति ।
अपेयं तत् द्विजातीनां पीत्वा चान्द्रायणं चरे(३)त् ॥

आचारोद्योते—

प्रत्यावृत्योदके नद्यां वर्ज्यं स्नानं द्विजातिभिः ।
तथा रजकतीर्थे च दश हस्तान् परित्यजेत् ॥
प्रतिस्रोतो रजोयोगो रथ्याजलनिवेशनम् ।
गङ्गायां न प्रदुष्यन्ति सा हि धर्मद्रवः स्वयम् ॥

शिष्टाः—

कर्मनाशाजलस्पर्शात् करतोयाविलङ्घनात् ।
गण्डकीबाहुतरणात् धर्मः क्षरति कीर्तना(४)त् ॥

धर्मः पुण्यम् । उपनयनजनितः संस्कारोऽत्र धर्मः, तेनाऽत्राऽपि पुनःसंस्कार इति केचित् । शङ्खलिखितौ—'अमेध्योदकं परिहरेदल्पोदके न स्नायात्, न समुद्रोदकमवगाहेत' । अमेध्यमशुचि परिहरेत् न तत्र किञ्चित् कुर्यात् । अल्पोदकनिषेधः । प्रभूतसुमनोहरसलिलसम्भवे न समुद्रोदकमवगाहेत । न अन्तः प्रविश्य समुद्रे स्नायादिति मिश्रादयः । रागप्राप्तावगाहमेतत् । न त्वेतद्बलादेवोद्धृतोदकद्वारा समुद्रस्य फलदातृत्वं न स्यादित्युपाध्यायाः । मनुः—'नाऽविज्ञाते जलाशये' । अविज्ञातेऽगाधतया नक्रादिरहिततया च । कृत्रिमे प्र(५)तिष्ठितत्वाप्रतिष्ठितत्वाभ्यामपि । शिष्टाः—'अनुत्सृष्टं तु मूत्रवत्' । तथा—

अप्रतिष्ठितपानीयेष्वपेयं सलिलं भवेत् ।

मार्कण्डेये—

यत्र सर्वार्थमुत्सृष्टं यच्चाऽभोज्य(६)निपानजम् ।
तद्वर्ज्यं सलिलं तात ! सदैव पितृकर्मणि ॥

---

(१) शुद्धाया—इति क० पु० पाठः । (२) गङ्गाया—इति ख० पु० पाठः ।
(३) स्मरेत्—इति ख० पु० पाठः । (४) कीर्तितात्—इति क० पु० पाठः ।
(५) प्रतिष्ठितत्वाभ्यामपि—इति ख०पु० पाठः । (६) यच्चाभोज्यनिपानजम्—इति ख०पु०पाठः ।

'पितृ' इत्युपलक्षणम् । अक(१)र्मण्यत्वे तात्पर्यम् । एवं चविष्णु(?)वापीजलोपादानं यद्याचारविषयः शिष्टानां तत्प्रमाणकमेवेति मन्तव्यम् । योगी–'वृथा तूक्तोदकस्नानम्' । वृथा शरीरशुद्धिकर्माधिकाराद्यतिरिक्तस्वर्गादिफलाजनकं 'स्नातस्य वह्नितप्तेने'त्यादेः । हारीतः–'न चत्वरोपद्वारयोः स्नायात्' । चत्वरं भूतादिबलिस्थानं, उपद्वारं द्वारसमीपम् । स्नानानि विभज्य शङ्खः—

तत्र काम्यं तु कर्तव्यं यथावद्विधिचोदितम् ।
नित्यं नैमित्तिकं चैव क्रियाङ्गं मलकर्षणम् ॥
तीर्थाभावे तु कर्तव्यमुष्णोदकपरोदकैः ।
सरस्सु देवखातेषु तीर्थेषु च नदीषु च ॥
स्नानमेव क्रिया यस्मात् स्नानात्पुण्यफलं स्मृतम् ।

अनेन काम्यं पुष्पस्नानादि, क्रियास्नानं स्वर्गादिफलार्थं, उष्णोदकपरोदकाभ्यां न कार्यमित्युक्तम् । स्नाने विहितं कालमाह व्यासः–

स्नानं म(२)ध्यंदिने कुर्यात्सुजीर्णेऽन्ने निरामयः ।

निरामयः स्नानसंवर्द्धनीयरोगशून्यः । एवं च—

स्वप्नमध्ययनं स्नानमुच्चारं भोजनं गतिम् ।
उभयोः सन्ध्ययोर्नित्यं मध्यान्हे च विवर्जयेत् ॥

इति देवलीयो निषेधो रागप्राप्तस्नाने मध्यान्हेऽभिजिद्वेलापञ्चमभागे भोजनविधानात् । सामान्यत एव दिने स्वप्नस्य निषिद्धत्वाद(३)त्र मध्यान्हग्रहणं दोषाधिक्यप्रदर्शनाय । केचित्तु एकमूलकत्वानिरोधनाऽन्यत्र दिनानिपदं मध्यान्हपरमेव । अत एव महाभारतादौ भृगुरामजरत्कारुप्रभृतीनां दिवा शयनोपाख्यानं न विरुध्यत इत्याहुः । योगी—

उभे सन्ध्ये च स्नातव्यं ब्राह्मणैश्च गृहाश्रितैः ।
तिसृष्वपि च सन्ध्यासु स्नातव्यं च तपस्विना ॥

उभे सन्ध्ये प्रातिर्मध्याह्ने । तपस्विना वनस्थेन यतिना च । दक्षः–

सन्ध्यास्नानं निशान्ते तु मध्यान्हे च ततः पुनः ।

---

(१) 'अकर्मण्यत्वे' इत्यारभ्य 'तत्प्रमाणकं' इत्यन्तो ग्रन्थः क० पु० नास्ति ।
(२) मध्येदिनं—इति क० पु० पाठः । (३) बहुक्तमध्या०—इति क० पु० पाठः ।

अथ 'न(१)रात्रौ न सन्ध्यायां प्रातःस्नाय्यरुण(२)करग्रस्तां प्राचीमवलोक्य स्नाया'दिति विष्णुविरोधात्कथं सन्ध्यायां स्नानमिति चेदुच्यते–'न सन्ध्याया'मिति विष्णुना सायंसन्ध्यायां गृहस्थस्य स्नानं निषिध्यते न तु सामान्यत एव, 'अरुणकरग्रस्ता'मिति स्ववचनविरोधात्। यदि तु 'सन्ध्ययो'रिति पाठस्तदा वैधातिरिक्तस्नानविषयतया निषेधः समर्थनीयः। नन्वेवं प्रकरणबाधः स्यादिति चेद्भवतु, अन्यथा नाऽत्र पर्युदासलक्षणा स्यादित्युपाध्यायाः। एवं चारुणकरग्रस्तामिति। प्रातःस्नानविधायकवाक्येषु सन्ध्यापदानि प्रातःसन्ध्याऽव्यवहितपूर्वकालस्योपलक्षकाणीत्यपि निरस्तं लक्षणापत्तेः, तस्यापि रात्रिस्नाननिषेधाक्रान्तत्वाच्च। केचित्तु तानि तदव्यवहितोत्तरकालपराण्येव, अन्यथा—

सूर्योदयं विना नैव स्नानदानादिकाः क्रियाः।

इति मार्कण्डेयपुराणविरोधादिति वर्णयन्ति। तन्मन्दं लिखितवाक्येषु 'सन्ध्यास्नायी शौचपर' इति,

स्नातो यः पूर्वसन्ध्यायां सदा मामुपगच्छति।

इत्यादिबहुतरवचनेषु मुख्यार्थबाधापेक्षयोक्तप्रकरणबाधस्यैव न्याय्यत्वात्। न च सन्ध्यापदस्य मुख्यार्थत्वेऽपि। 'आधारोऽधिकरणम्' (पा० १।४।४५) इति, 'सप्तम्यधिकरणे च' (पा० सू० २।३।३६) इत्यनुशासनसिद्धचतुर्विधाधारसाधुत्वकायां सप्तम्यां प्रकृते सामीप्यकरूपाधारपरतयैवोपपत्तेः।(३)कथमेवमिति केषाञ्चित्कुदेश्यमिह न श्रद्धेयं सामीप्यकादिसाधारणस्यैकस्याधारत्वस्याभावाच्छब्दादप्रतीतेः 'गङ्गायां घोषः' इत्यादौ सामीप्यकादिप्रत्ययस्य लक्षणतयैवोपपत्तेः। 'अन्यायश्चानेकार्थत्व'मिति न्यायात्। व्याकरणस्य साधुत्वमात्रव्युत्पादकत्वादनन्यलभ्यत्वादिसाचिव्येन शक्तेः पर्यवसानात्। मुख्याधिकरणत्वे तु शक्तौ प्रयोगप्राचुर्यादेव विनिगमकमित्यन्यत्र विस्तरतः। किञ्च—

उपस्युपसि यत्स्नानं सन्ध्यायामुदिते रवौ।
प्राजापत्येन तत्तुल्यं महापातकनाशनम्॥

---

(१) च-इति क० पुस्तके पाठः।

(२) करग्रस्तामित्यतः चेदित्यन्तं नास्ति क० पुस्तके।

(३) कथमेवमित्यारभ्य-शब्दादप्रतीतेरित्यन्तं क० पुस्तके नास्ति।

इति दक्षः सन्ध्यास्नानं स्फुटमेव द्रढयति तदुत्तरकालस्य पृथग्विधानात्। उषसि अरुणोदये। सन्ध्यायां प्रभाते प्रागुदयात्। उदिते रवावुदयादूर्ध्वं मुहूर्ते। एत(१)च्च पूर्वापूर्वासम्भवे द्रष्टव्यमिति निबन्धृभिर्व्याख्यानादिति नायं पन्थाः। 'सूर्योदयं विना नैवे'त्यादि तु विशेषविहितेतरपरम्, अन्यथा चन्द्रोपरागादौ रात्रिस्नानादेरपि बाधापत्तेरिति सर्वं चतुरस्रम्। मनुः—

मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम्।
पूर्वाह्ण एव कुर्वीत देवतानां च पूजनम्॥

स्नानं देवतानां च पूजनं च मध्यान्हादिविहितेतरदिति।

अथ निषिद्धकालः। (२)अत्र बौधायनः—'न निशि स्नायात्'। मनुः—

न स्नानमाचरेद् भुक्त्वा नातुरो न महानिशि।

अत्र भोजनोत्तरकाले स्नाननिषेधो रागप्राप्तलौकिकस्नानविषयः पर्यवस्यति। नित्यकाम्ययोस्तयोर्भोजनानन्तरमप्रसक्तेः।

ततः शरीरस्रोतोभ्यो मलान्निःस्यन्दविस्रवात्।
अन्नादीनां प्रवेशाच्च स्यादशुद्धिर्विशेषतः॥

इति वचनात्। नैमित्तिकस्य निषेद्धुमशक्यत्वात्।

नैमित्तिकानि कर्माणि निपतन्ति यदा यदा।
तदा तदैव कर्माणि न कालस्तु विधीयते॥

इति दक्षात्। आतुरस्य जलसंवर्द्धनीयव्याधिकस्य सदैव वारुणस्नानं (३)निषिद्धम्। महानिशा रात्रिमध्यप्रहरद्वयम्।

महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयम्।
तस्यां स्नानं न कुर्वीत काम्यनैमित्तिकादृते॥

इति देवल वचनात्। काम्यं महानिशाविहितम्। अत्र विवक्षितं यद्यपि स्नानं निशा सामान्यत एव निषिद्धा 'न रात्रा'विति 'न निशी'ति 'नास्त'मित्यादि भूयशः सामान्यनिर्देशात्।

दिवाकरकरैः पूतं दिवास्नानं प्रशस्यते।
न प्रशस्तं निशास्नानं राहोरन्यत्र दर्शनात्॥

---

(१) एतच्च-इत्यारभ्य-सूर्योदयं विना नैवेत्यन्तो ग्रन्थः ख० पुस्तके नास्ति।

(२) तत्र-इति ख० पुस्तके पाठः।

(३) निषिद्धमित्यतः तस्यां स्नानमित्यन्तं नास्ति क० पुस्तके।

इति हेतुमन्निगदबलाचारानुग्रहाच्चेति। तथाऽपि दोषाधिक्य-प्रतिपादनाय महानिशाग्रहणं दृष्टार्थं वा। अत्र देवलः-

राहुदर्शनसङ्क्रान्तिविवाहात्ययवृद्धिषु।
स्नानदानादिकं कुर्यान्निशि काम्यव्रतेषु च॥

चकारात् 'मुक्त्वा च जन्म(१)र्क्षगतं शशाङ्क'मित्यादिभी रात्रि-निषेधे पर्युदस्तानां समुच्चयः। जाबालः-

त्रयोदश्यां तृतीयायां दशम्यां तु विशेषतः।
शूद्रविट्क्षत्रियाः स्नानं नाऽऽचरेयुः कथञ्चन॥
अम्भोऽवगाहनं स्नानं विहितं सार्ववर्णिकम्।

इत्यनेन विहितस्य निषेधोऽयमिति कल्पतरुप्रभृतयः। परमार्थस्तु रागप्राप्तस्यैव प्रतिषेधः। वैधनिषेधे विकल्पपर्युदासयोरन्यतरप्रस-ङ्गात्। एवं च गौडनिबन्धधृतो जीवत्पितृकाऽमावास्यास्नाननिषेधो यदि समूलस्तदा रागप्राप्तस्नानविषयो, नो चेद्धेय एवेत्युपाध्यायप्र-भृतयः। स्त्रीणां शतभिषास्नाननिषेधोऽप्येवमेव बोद्धव्यः। स्नानान्तर-निषेधोऽपि रागप्राप्तविषय एव। एकस्मिन् दिने नानातीर्थप्राप्तस्य वैधस्य निषेद्धुमशक्यत्वादिति। सायान्हमुपक्रम्य—

राक्षसी नाम सा वेला गर्हिता सर्वकर्मसु।

इति श्राद्धमात्रविषयं प्रकरणादिति बहवः। परिभाषारूपमिदं वचनमिति विशेषविहितेतरसकलवैदिककर्मपरं प्रकृते हेतुमन्नि-गदसम्पादकतयोपयुज्यत इति मिश्रादयः। उपाध्यायैरप्याह्निके मध्या-ह्नोत्तरमासुरीं वेलां परित्यज्य स्नानमाचरन्तीत्युक्तम्। स्नानेतिकर्त्त-व्यतायाः संहितान्तरे प्रपञ्चितत्वाचामदर्शयन्नेव मध्याह्नकृत्यं प्रधा-नभूतं स्नानमात्रं स्मारयति स्नात्वेति। एवं तर्पणादावपि द्रष्टव्यम्। स्नानादिप्रकारस्तु स्वप्रकरण एव मया संक्षिप्य दर्शित इति। देवान् पितॄन् चकारो यथाश्रुतक्रमो मनुष्यानृषींश्च समुच्चिनोति। स्नात्वा चेति भिन्नमस्तु। पूर्वकथितसन्ध्यावन्दनादीन्। एवकारस्तु स्नान-सन्ध्यादिषु पञ्चमहायज्ञादिषु चाऽऽवश्यकेषु समुचितक्रमो नित्यतां दर्शयति। अर्चयेत् ब्राह्मणादीनिति शेषः। तथा च कात्यायनः-'निः-पीड्य वस्त्रमाचम्य ब्राह्मवैष्णवरौद्रसावित्रमैत्रावारुणैस्तल्लिङ्गैरर्चयेत्'

(१) जन्मनक्षत्रं गतं-इति क० पुस्तके पाठः।

(मिता०) देवेभ्य इति । स्वगृह्योक्तविधिना वैश्वदेव(१)होमं कृत्वा तदवशिष्टेनान्नेन भूतेभ्यो वलिं हरेत्। अन्नग्रहणमपक्वव्युदासार्थम्। तदनन्तरं यथाशक्ति भूमावन्नं श्वचण्डालवायसेभ्यो निक्षिपेत्। चशब्दात्कृमिपापरोगिपतितेभ्यः । यथाह मनुः (३।९२)·
'शुनां च पतितानां च श्वपचां पापरोगिणाम्। वायसानां कृमीणां च शनकैर्निक्षिपेद् भुवि' ॥ इति । एतच्च सायम्प्रातः कर्तव्यम्। 'अथ सायम्प्रातःसिद्धस्य हविष्यस्य जुहुयात्' इत्याश्वलायनस्मरणात्। इह केचिद्वैश्वदेवाख्यस्य कर्मणः पुरुपार्थत्वमन्नसंस्कारकर्मत्वं चेच्छन्ति। 'अथ सायंप्रातः सिद्धस्य हविष्यस्य जुहुयादित्यन्नसंस्कारकर्मकता प्रतीयते। अथातः पञ्च महायज्ञा इत्युपक्रम्य तानेतान्यज्ञानहरहः कुर्वीतेति नित्यत्वाभिधानात्पुरुषार्थत्वं चावगम्यते' इति । तदयुक्तं पुरुषार्थत्वेऽन्नसंस्कारकर्मत्वानुपपत्तेः । तथा हि—द्रव्यसंस्कारकर्मत्वपक्षेऽ(२)न्नार्थता वैश्वदेवकर्मणः, पुरुपार्थत्वे वैश्वदेवकर्मार्थता द्रव्यस्येति परस्परविरोधात्पुरुपार्थत्वमेव युक्तम्। 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः' इति। तथा 'वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिराव्रजेत्। तस्मा अन्नं यथाशक्ति प्रदद्यान्न वलिं हरेत्' ॥ इति (३।१०८) मनुस्मरणात्। पुरुषार्थत्वे वैश्वदेवाख्यं कर्म न प्रतिपाकमावर्तनीयम्। तस्मादथ सायंप्रातरित्यादिनोत्पत्तिप्रयोगौ दर्शितौ, तानेतान्यज्ञानहरहः कुर्वीतेत्यधिकारविधिरिति सर्वमनवद्यम् ॥१०३ ॥

(वी० मि०) अत्र सति सम्भवे स्वधादिकमन्येनैव कार्यमन्यथा तु जलादिनापीत्याह—

अन्नं पितृ(३)मनुष्येभ्यो देयमप्यन्वहं जलम् ॥
स्वाध्यायं सततं कुर्यान्न पचेदन्नमात्मने ॥ १०४ ॥

जलमपीत्यन्वयः। बहुवचनमत्राऽप्याद्यर्थं। पञ्चमहायज्ञाशक्तौ स्वाध्यायमात्रमपि कर्तव्यमिति बोधयितुं विहितमपि स्वाध्यायं पुनराह स्वाध्यायमिति । केचित्तु नित्यताबोधनार्थं पुनर्वचनमित्याहुः। अविस्मरणार्थं सततं स्वाध्यायं कुर्यादिति तु मिताक्षरा। एवमन्नस्य वैश्वदेवाद्यर्थतामुक्त्वा तदसम्भवे तदधिकारिणः पाकं निषेधयति न पचेदिति ॥ १०४ ॥

---

(१) अन्नं प्रति मनु०—इति क० पु० पाठः। (२) वैश्वदेवं कृत्वा क०।
(३) दम्पत्योः शेषभोजनम्—इति मुद्रितपुस्तके पाठः।

(मिता०) अन्नमिति । प्रत्यहमन्नं पितृभ्यो मनुष्येभ्यश्च यथाशक्ति देयम् । अन्नाभावे कन्दमूलफलादि । तस्याप्यभावे देयं जलमपिशब्दात् । स्वाध्यायं सततं कुर्यादविस्मरणार्थम् । न पचेदन्नमात्मार्थम् । अन्नग्रहणं सकलाऽदनीयद्रव्यप्रदर्शनार्थम् । कथं तर्हि देवताद्युद्देशेनैव ॥ १०४ ॥

बालस्ववासिनीवृद्धगर्भिण्यातुरकन्यकाः ॥
सम्भोज्याऽतिथिंभृत्यांश्च(१)गृहस्थः शेषभुग्भवेत् ॥१०५॥

(वी० मि०) स्ववासिनी परिणयानन्तरं पितृगृहस्थिता । कन्यका कुमारी । सम्भोज्य भोजयित्वा । अतिथिर्वक्ष्यमाणः । भृत्याः पोष्याः पुत्रादयः । शेषभोजनमित्यनन्तरं कर्तव्यमिति शेषः ॥ १०५ ॥

(मिता०) बालेति । परिणीता पितृगृहे स्थिता स्ववासिनी । शेषाः प्रसिद्धाः । बालादीनतिथिभृत्यांश्च सम्भोज्य भोजयित्वा दम्पत्योः शेषभोजनं कर्तव्यम् । '(२)प्राणाग्निहोत्रविधिनाऽश्नीयादन्नमनापदि । मतं विपक्वं विहितं भक्षणं प्रीतिपूर्वकम्' ॥१०५॥

(वी० मि०) भोजनेतिकर्तव्यतामाह—

अपोशानेनोपरिष्टादधस्तादश्नता तथा ॥
अनग्नममृतं चैव कार्यमन्नं द्विजन्मना ॥ १०६ ॥

'अमृतोपस्तरणमसि स्वाहा' इति मन्त्रेण जलपानं(३)भोजनारम्भकालीनमाद्यमपोशानम् । 'अमृतापिधानमसी'ति भोजनशेषे जलचुलकपानं चाऽपरमपोशानम् । ताभ्यामाच्छादनोत्तरीयरूपाभ्याम् । अनग्नममृतं पवित्रमिति यावत् । एवकारः कार्यमेवेत्यावश्यकत्वप्रदर्शनार्थः । अश्नता भुञ्जानेन । वर्तमानसामीप्ये प्रत्ययः । द्विजन्मना उपनीतेन ॥ १०६ ॥

(मिता०) अपोशानेति । भुञ्जानेन द्विजन्मना उपरिष्टादधस्ताच्चाऽपोशानाख्येन कर्मणाऽन्नमनग्नममृतं च कार्यम् । द्विजन्मग्रहणमुपनयनप्रभृतिसर्वाश्रमसाधारणम् ॥ १०६ ॥

(वी० मि०) उक्त एवाऽतिथिभोजने विशेषमाह—

अतिथित्वेन वर्णेभ्यो देयं शक्त्यानुपूर्वशः ॥

---

(१) एतेन काम्यत्वमपि प्रतिपादितं भवति ।

(२) अत्र-'चाऽपरमपोशानं'—इति क० पुस्तकेऽधिकम् ।(३) भोजनस्यादावित्यधिकं क० पुस्तके ।

अतिथित्वेनोपस्थितानां ब्राह्मणादीनां वर्णानुपूर्व्यं यथाशक्त्यन्नं देयमित्यर्थः ॥

(वी० मि०)सायमतिथौ विशेषमाह—

अप्रणोद्योऽतिथिः सायमपि वाग्भूतृणोदकैः ॥ १०७ ॥

सूर्यास्तसमयानन्तरमागतोऽतिथिरन्नदानासम्भवे वाचा सूनृतया तृणैरासनादिरूपैरुदकैश्च पानाद्यर्थैरप्यप्रणोद्योऽप्रत्याख्येयः ॥१०७

(मिता०) अतिथित्वेनेति । वैश्वदेवानन्तरं वर्णानां ब्राह्मणादीनामतिथित्वेन युगपत्प्राप्तानां ब्राह्मणाद्यानुपूर्व्येण यथाशक्ति देयम् । सायङ्कालेऽपि यद्यतिथिरागच्छति तदासावप्रणोद्योऽप्रत्याख्येय एव । यद्यप्यदनीयं किमपि नास्ति तथापि वाग्भूतृणोदकैरपि सत्कारं कुर्यात् । (१)यथाह मनुः (४।१०१)-'तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता । एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन' ॥ इति॥१०७॥

(वी० मि०) यत्यादिरूपेऽतिथौ विशेषान्तरमाह—

सत्कृत्य भिक्षवे भिक्षा दातव्या स(२)व्रताय च ॥

भिक्षवे संन्यासिने सव्रताय ब्रह्मचारिणे च सत्कृत्य स्वस्तिवाच्य जलं हस्ते दत्त्वा भिक्षा दातव्या ॥

(वी० मि०) अतिथिवदन्येषामप्यवश्यभोजनीयतामाह—

भोजयेच्चाऽऽगतान् काले सखिसम्बन्धिबान्धवान् ॥ १०८

काले भोजनसमये । सखा मित्रम् । सम्बन्धिनः श्वशुरादयः । बान्धवा मातुलपुत्रादयः ॥ १०८ ॥

(मिता०) सत्कृत्येति । भिक्षवे सामान्येन भिक्षा दातव्या । सुव्रताय ब्रह्मचारिणे यतये च सत्कृत्य स्वस्तिवाच्य भिक्षादानमपूर्वमित्यनेन विधिना भिक्षा दातव्या । भिक्षा च ग्राससंमिता । ग्रासश्च मयूराण्डपरिमाणः । 'ग्रासमात्रा भवेद्भिक्षा पुष्कलं तच्चतुर्गुणम् । हन्तस्तु तैश्चतुर्भिः स्यादग्रं तत्त्रिगुणं भवेत्' ॥ इति शातातपस्मरणात् । भोजनकाले चागतान् सखिसम्बन्धिबान्धवान् भोजयेत् । सखायो मित्राणि । सम्बन्धिनो येभ्यः कन्या गृहीता दत्ता वा । मातृपितृसम्बन्धिनो बान्धवाः(३) ॥ १०८ ॥

---

(१) यथाहेत्यादि मनुवचनं क० ग० नैवास्ति । (२) सुव्रताय-इति मुद्रितपुस्तके पाठः

(३) सम्बद्धा बान्धवाः क० ।

हरिदाससंस्कृतग्रन्थमालासमाख्य-
काशीसंस्कृतसीरीज् पुस्तकमालाः ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परं तु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।		रु. आ. पा.
१ नलपाकः नलविरचितः । संपूर्णः	(पाकशास्त्रम १)	१—८—०
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृताऽन्वयार्थबोधिनीटीकासहितम् ।	(वेदान्तं १)	१०—०—०
३ वैशेषिकदर्शनम् । सटीक-प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् ।	(वैशेषिकं १)	३—८—०
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधराद्याचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम्	(वैदिकं १)	०—६—०
५ लघुशब्देन्दुशेखरः चन्द्रकलाटीकासहितः तत्पुरुषादिसमासिपर्यन्तः ।	(व्याकरणं १)	१०—०—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपण" दिनकरीय महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिव्याख्यासहिता ।	(न्यायं १)	६—०—०
७ पञ्चीकरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणन च समन्वितम् ।	(वेदान्तं २)	०—८—०
८ अलङ्कारप्रदीपः पण्डितवर विश्वेश्वरपाण्डेयनिर्मितः ।	(काव्यं १)	०—८—०
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः ।	(कामशास्त्रं १)	०—१२—०
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः ।	[ज्यो० १]	२—०—०